'लाक्षाकसवमदधारकपोलभागा सम्पादयन्ति करिण
करणोत्तम न" धनञ्जयविज० । २देवताभेदे शब्दचि० ।

करिदारक पु०१करिणं दारयति हिनस्ति ड-ण्वुल् । सिंहे ।
शब्दर०स्त्रियां टाप् अत इत्त्वम् । [शब्दचि०

करिनासिका स्त्री करिणोनासेवाकारोऽस्याः । यन्त्रभेदे

करिन् पु स्त्री कर प्रशस्तो शुण्डाकारो हस्तोऽस्य इनि । हस्तिनि
गजे "हस्तिन करिणजितम् अमरः 'मुक्ताफलाय करि-
णम् हरिणं पलाय" व्या०टद्वा० । "करिकरिशरगाधि
योजनानामयोध्या" सोला० । "करीव सिक्त ष्टपते

पयोमुचाम्" "कटप्रभेदेन करीव पार्थिव रघु 'छाया-
मवह्नि करिणा घटापते "माघ । २पदत्वसंख्यायाम् एका-
ष्यादिशब्दे विवृतिः । करिभेदादिकम् पृ० ८५८ दृश्यशब्दे
उक्तम् । तन्नामनामके ३नागकेसरे पु० ।

करिप पु० करिणं पाति पा--क । हस्तिपके (माहुत) । भू-
सर्वादि० अमाणिवाचकषष्ठ्यन्तात् भवाद्युदात्तता । वन
करिप इत्यादि । [राजनि०

करिपत्र न० करो तत्कर्णं इव पत्रमस्य । तालिपत्रवृक्षे

करिपथ पु० ६त०अच् समा०। हस्तिगमनयोग्ये पथि-तत
मस्ज्ञाया कन् देवपथादि०तस्य लुक् । करिपथनामके
देशभेदे पु०। [पिप्पल्याम् अमर-

करिपिप्पली स्त्री करिपूर्वपदयुक्ता पिप्पली शा०त०। गज

करिपोत पु० ६त० । हस्तिशावके हारा० ।

करिबन्ध पु० करिणं बध्नात्यत्र बन्ध-आधारे घञ् । १हस्ति
बन्धस्तम्भे हारा० । भावे घञ् ६त० । २गजबन्धने च

करिभ न० करीव भाति भा--क । कुञ्जभेदे त्रिका० ।

करिमाचल पु स्त्री मच-शाठ्ये घञ् करिणि माचं शाठ्य
लाति ला क । १सिंहे त्रिका० गजमाचलादयोऽप्यत्र
स्त्रियां जातित्वात् ङीष् ।

करिमुख पु० करिणोमुखं मुखमस्य । १गणेशे यथा चास्य
गजवक्त्रता तथा इभाननशब्दे ८८१पृ०उक्तम् । ६त० ।
२गजस्य मुखे न० ।

करिर पु न० कृ-इरन् । गूढपत्रे उष्ट्रप्रिये मरुभूमिजे
करीरे वृक्षभेदे । शब्दरत्ना० । करीरशब्दे गुणादि ।

करिरत न० "भूगतस्तनमुखाश्रयकाउन्नता स्वयमधोमुखी
स्त्रियम् । क्रामति स्वकरलक्ष्मेहने वल्लभे करिरत तदु
च्यते" इत्युक्तलक्षणे रतिबन्धभेदे शब्दचि० करिपदमिति
पाठान्तर"करिपदमित्यपि तत्रार्थे। ६त०२गजरमणे च ।

करिव त्रि० करिणं वाति वा--क । करिगते अमाणिषष्ठ्य-
न्तात्तस्य पूर्वा० भाद्युदात्तता । एककरिव इत्यादि

करिशावक पु० गजशिशौ "यावत्पञ्चाब्दमेतस्मिन् क
रभ कलभोऽपि च" शब्दर० उक्ते पञ्चाब्दपर्यन्ते हस्ति
बालके ।

करिष्ठ त्रि० अतिशयेन कर्ता इष्ठन् तृणोलोपः । कृत तमे
"गुरू वर्णिमथ्य आसुति करिष्ठ" ऋ०७,९७,७, । इय-
सुन् । करीयस् कर्तृतरे त्रि० स्त्रियां ङीप् ।

करिष्यमाण त्रि०कृ--भविष्यति शानच् स्यट् । कर्त्तव्ये । वेदे
तु नि० मागलोपः । 'यानि करिष्या कृणुहि मह्न।"

[illegible]

करिसुन्दरिका स्त्री [illegible]

करिस्कन्ध [illegible]

करीर [illegible]

करीरकुञ्ज [illegible]

करीरिका स्त्री [illegible]

करीरी स्त्री [illegible]

करीष [illegible]

करीषङ्कषा स्त्री [illegible]

करीषिन् [illegible]

करुण [illegible]

करुणमल्ली स्त्री [illegible]

प्रयत्नेन प्रदय पीयमानतया तस्यास्तथात्वं तत्वम् ।

करुणविप्रलम्भ पु० शृङ्गाररसभेदे । शृङ्गारशब्दे” सा०द० उक्तो यथा

“विप्रलम्भोऽथ सम्भोग इत्येष द्विविधो मतः । तत्र यत्र तु रतिः प्रकृष्टा नाभीष्टमुपैति विप्रलम्भोऽसौ । अभीष्टं नायकं नायिका वा । स च पूर्व्वरागमान-प्रवासकरुणात्मकश्चतुर्द्धा स्यात्” ।

करुणानिधि पु० करुणा निधीयतेऽत्र नि+धा—आधारे कि उप०स० । करुणाधारे दयायुक्ते करुणानिधानादयो-ऽप्यत्र । [यस्य ; अत्यन्तकरुणायुक्ते ।

करुणापर त्रि० करुणायां परः आसक्तः करुणा परा वा

करुणामय त्रि० करुणा+प्राचुर्य्ये मयट् । प्रचुरकरुणान्विते “काकुत्स्थं करुणामयं गुणनिधिम्, विप्रप्रियं धार्मिकम्” महाना०स्त्रियां ङीप् करुणामयी ।

करुणिन् त्रि० करुणाऽस्त्यस्य सुखा० इनि । कृपायुक्ते स्त्रियां ङीप् । सिद्धे सुखादिग्रहणम् ठनादिनिवृत्त्यर्थमिति सि०कौ० । तेन सुखादिभ्यो न मतुप् । आर्षे तु क्वचि-दिष्यते ।

करुत्थाम पु० तुर्वसुवंश्ये दुष्मन्तपुत्रभेदे । “तुर्वसोस्तु सुतो-वह्निरित्युपक्रम्य “दुष्मन्तस्य तु दायादः करुत्थामः महे-श्वरः” हरिव०३२अ० ।

करुन्धम पु०तुर्वसुवंश्ये त्रैसानो पुत्रे नृपभेदे । “करुन्ध-मस्तु त्रैसानोर्मरुत्तस्य चात्मजः” हरिव०३२अ० ।

करुम पु०पिशाचभेदे । ये शाला परिनृत्यन्ति सायं गर्दभ-नादिनः । कुसूला ये च कुक्षिला ककुभा करुमा स्त्रिमा । तानोषधे ! त्वं गन्धेन विषूचीनान् विनाशय” अथ०८,६,१० ।

करू स्त्री कृ–हिंसायाम् ऊ । १कर्त्तने । “चतुर्दश वा अस्मा करूकराणि”शत०ब्रा०२२,३,४,१०। कर्मणि ऊ । २कृते च ।“धाम देव करूळती”ऋ०४,२०,२४ । “करूळती कृतदन्तः” भा०ट्यो०दन्तस्य स्थादेशे पृषोदरत्वात् ढत्वे तथात्वम् ।

करूष पु० कृ–ऊषन् । १देशभेदे यस्याधिपतिर्दन्तवक्त्रः “एष महान् वने हत्वा कुरूंश्च सह सोमकैः । चेदि-कारूषकरूषांश्च कुरुसत्तमो भविष्यति” भा०आ०१२२अ० । “शिशुपालस्य सहितः करूषाधिपतिस्तथा” भा० स०४अ०। करूषाणां जनपदानां राजा अण् तद्राजत्वात् बहुषु तस्य लुक् । करूषाः तद्राजेषु “दन्तवक्त्रो करूषस्य करभोमेघवाहनः” भा०स०१३अ० । एकत्वेऽपि लुक् आर्षं । अस्य तालव्यमध्यताऽपि भर्गादिगणे तथापाठात् ततो भर्गा०स्त्रियां न तद्राजप्रत्ययस्य लुक्” सि० कौ० ।

करूषज पु० करूषदेशे जायते जन—ड । दन्तवक्त्रे नृपभेदे “तावेवाथ पुनर्जातौ शिशुपालकरूषजौ” भा० सा०७ १०,२० । तौ जयविजयौ विष्णोः पार्षदौ ।

करूषाधिपति पु०६त० । दन्तवक्त्रे नृपे । “काश्मीरराजो-गोनर्दः करूषाधिपतिस्तथा” हरिव० ६ । करूषाधिपा-दयोऽप्यत्र ।

करेऽट पु०करे अटति अट–अच् अलुक् स० । नखे त्रिका०

करेऽटव्या स्त्री करेऽटन व्ययति व्ये–ड टाप् । धनञ्जय विपि त्रिका० । [ख्याते खगे । अमरः ।

करेटु पु० केन मस्तकेन रेटति रेट–कु । (करकटिया) इति

करेणु पु०क–एणु(नु)के मस्तके रेणुरस्य वा । १गजे अमरः । “त्रस्तः समस्तजनहासकरः करेणोः” माघः । उत्-क्षिप्तगात्रः स विडम्बयन्नभ–करेणुरारोहयते निषादि-नम्” माघः “स्वातन्त्र्यमुज्झन्करभाय करेणुराजः”माघः । २कर्णिकारद्रुमे विश्वः । ३गजस्त्रियां स्त्री अमरः ।“ ग-जाय गण्डूषजलं करेणुः”कुमा० । “करेणुभिर्दन्तनूपुरा-समङ्गाः” रघुः । करेणुदुग्धगुणाश्च सुश्रुते “अश्वायाश्चैव भार्य्यायाः करेणूनाञ्च यत् पयः । तत्त्वनेकौषधिरसप्रसादं प्राणदं गुरु । मधुरं पिच्छिलं शीतं स्निग्धं श्ल-क्ष्णं मृदु स्थिरम्”सामान्यत उक्त्वा । “हस्तिन्या मधुरं वृष्यं कषायानुरसं गुरु । स्निग्धं स्थैर्य्यकरं शीतं च-क्षुष्यं बलवर्द्धनम्” उक्तम् । “करेणुः समसुद्धर्द्धरा कन्दे-न गजरूपिणी । हस्तिकर्णपलाशस्य तुल्यपर्णा द्विपर्णि-नी”सुश्रुतोक्तमहौषधाद्याम् ४ओषधौ स्त्री तद्रूपस्थितिकालश्च तत्रैवोक्तः । ‘ करेणुस्तत्र कन्या च छत्रातिच्छत्रके तथा । गोलोमी चाजलोमी च महती श्रावणी तथा । वसन्ते कृष्णसर्पाख्यो गोलोमी च प्रजायते” स्वार्थे कन् करेणु-कायामपि स्त्री । रायमुकुटस्तु करेणुशब्दं दीर्घान्तं पठित्वा हस्तिनि पु स्त्रीत्याह ।

करेणुभू पु० करेणौ भवति भू–क्विप् । १हस्त्यायुर्वेदप्रवर्त्तके पालकाप्यमुनौ हेमच० । २हस्तिजातमात्रे त्रि० ।

करेणुमती स्त्री नकुलस्य भार्य्याभेदे । “नकुलस्तु चैद्यां करे-णुमतीं भार्य्यामुदावहत्तस्यां पुत्रं निरमित्रं नामाजनयत्’ भा० आ० ९५ अ० ।

करेणुसुत पु० ६त० । पालकाप्ये मुनौ त्रिका० ।

[illegible]

कर्कटशृङ्गी च स्यात् कुलीरविषाणिका । अजशृङ्गी च वक्रा च कर्कटाख्या च कीर्त्तिता । शृङ्गी कषाया तिक्तोष्णा कफवातक्षयज्वरान् । श्वासोर्द्ध्ववाततृट्कास हिक्कारुचिवमीन् हरेत्" भावप्र० तद्गुणादि उक्तम्

कर्कटाक्ष पु० कर्कट इवाक्षि ग्रन्थिभेदोऽस्य । कर्कटाक्षम् (काकड़) रक्तमाला । [शृङ्गाम् भावप्र० ।

कर्कटाख्या स्त्री कर्कटस्याख्याख्या यस्याः । (काकड़ाशिङा)

कर्कटाङ्गा स्त्री कर्कटस्याङ्गं शृङ्गमिव शृङ्गमस्याः अजा० टाप् । शृङ्गाम् । राजनि० । [शिलाटके राजनि० ।

कर्कटाह्व पु० कर्कटमाह्वायते कण्टकाकारत्वात् आ+ह्वे–क ।

कर्कटि स्त्री कर्क कण्टकमटति इन् शक० । (काँकुड) १एर्वारौ शब्दचि० । वा ङीप् स्वार्थे, २शाल्मलीवृक्षे ३कर्कटशृङ्ग्याञ्च । मेदि० ।

कर्कटिनी स्त्री कर्कटस्येवाकारोऽस्त्यस्याः इनि ङीप् । दारुहरिद्रायाम् राजनि० । [शब्दरत्ना० ।

कर्कटु पु० कर्क– बाहुल्या० मि० । (करकटिया) पक्षिभेदे

कर्कन्धु स्त्री कर्क कण्टक दधाति धा–कु नि०सुम् । १बदर्याम् (कुल) "कर्कन्धूफलमुच्चिनोति शबरी मुक्ताफलाशङ्कया" सा०द० । तस्य पुस्त्वमपि । "पुंसि स्त्रियाञ्च कर्कन्धूर्बदरी कोलमित्यपि । फेनिलं कुवलं घोंटा सौवीरं बदरं महत् । अजप्रिया कुहा कोली विषमोभयकण्टका । पच्यमानं सुमधुरं सौवीरं बदरं महत् । सौवीरं बदरं शीतं भेदनं गुरु शुक्रलम् । बृंहणं पित्तदाहास्रक्षयतृष्णानिवारणम् । सौवीरं लघु संपक्वं मधुरं कोलमुच्यते । कोलन्तु बदरं ग्राहि रुच्यमुष्णञ्च वातलम् । कफपित्तकरञ्चापि गुरु सारकमीरितम् । कर्कन्धूः क्षुद्रबदरं कथितं पूर्वसूरिभिः । अम्लं स्यात् क्षुद्रबदरं कषायं मधुरं मनाक् । स्निग्धं गुरु च तिक्तञ्च वातपित्तापहं स्मृतम् । शुष्कं भेद्यग्निकृत्सर्वं लघु तृष्णाक्लमास्रजित्" फले न० । "ददृशेऽथ कर्कन्धूमि" यजु० १९,२२, कर्कन्धूनां पाकः पील्वादि० कुणच् । कर्कन्धूकुणः तत्पाके न० । प्रस्थपरे कर्क्यादि० कर्कन्धूप्रस्थइत्यादौ माद्युदात्तता । तत्र भवा० चतुरर्थ्यां मतुप् । कर्कन्धूमत् तत्सन्निकृष्टदेशादौ त्रि० स्त्रियां ङीप् । कर्कन्धूमती । तस्या अदूरभवः सुवास्त्वा० अण् । कार्कन्धूमत तददूरदेशभवे त्रि० ।

कर्कफल न० कर्क–हासे अच् कर्क मकायाम्मित यत् फलति फल–अच् । क्षुद्रामलके राजनि० ।

कर्कर पु० कर्क–हासे–अरन् ।१दर्पणे, मेदि० २चूर्णसाधने क्षुद्रपाषाणखण्डे कङ्करे (काँकर) । कर्क–घञ् कर्कं हासं राति–रा–क । ३हठे ४कठिने त्रि० मेदि० । "किं नो मर्करकर्करैः प्रियशतैराक्रम्य विक्रीयते" अमरुश० । "करीर ककरोऽर्करुक्" माघ । ५मुद्गरे शब्दचि० ।

कर्कराङ्ग पु० कर्करद्याङ्गं यस्य । खञ्जने काककदलचिह्नकर्मे शब्दमा० ।

कर्कराट पु० कर्कं हासं रटति रट–कु । कटाक्षे जटाधर ।

कर्कराटुक पु० कर्क कठिनं रटति रट–उकञ् । (करकटिया) पक्षिभेदे शब्दर० ।

कर्करान्धुक पु० कर्कर कठोर अतिशयितान्धाकारवत्त्वात् अन्धः कूपः स इवाथ कन । अत्यन्तान्धकारवति कूपे । त्रिका० ।

कर्कराल पु० कर्करं सन् अलति अल–अच् । चूर्णकुन्तले हेमच० । तस्य इतरकेशापेक्षया कठिनत्वात्तथात्वम् ।

कर्करिका स्त्री कर्करः इवास्त्यस्याः अच् संज्ञायां कन् अत इत्त्वम् । नेत्रखर्जूभेदे शब्दचि० । तत्र हि नेत्रे कङ्करयुक्ततेवोपलभ्यत इति तस्यास्तथात्वम् ।

कर्करी स्त्री कर्कं हासं राति रा–क गौरा० ङीप् । (झारी) १गलन्तिकायां, अमर कन्दोष्णतादिपकमिषुकाशमसाधने (झाजरा) २वृक्षे च शब्दचि० । कर्कं राति रा–ईकक् । कर्करीकोऽप्यत्र । कर्करी+स्वार्थे कन् न ह्रस्व कर्करीका तदर्थे स्त्री । [उज्ज्वल० ।

कर्करीक न० कर्क–फर्फरीका० ईकन् नि० । शरीरे

कर्करेट पु० कर्क कर्केति शब्दं रेटत्यस्मात् रेट–अपादाने घञ् । अर्द्धचन्द्रे गलहस्ते (गलाटिपि) गलामर्दने हि कर्कशब्दकरणात्तस्य तथात्वम् ।

कर्करेटु पु० कर्केति शब्दं रेटति उन् उणा० स० । (करकटिया) पक्षिभेदे अमर ।

कर्कश पु० कर्क् हिंसायां क्विप् क सन्+कशति–कर्क–अच् कर्क+लोमादि० श, करे कशति कश–शब्दे अच् शक० वा । १काम्पिल्लवृक्षे (गुड़ारोचनी) अमर । २कासमर्दे । (कास्कासेन्दा) ३इक्षुवृक्षे ४खड्गे च हेम० । ५साहसिके कठोरे च त्रि०अमर "वेणुकर्कशपर्वया" रघुः । "ऐरावतास्फालनकर्कशेन" कुमा० । "तृष्णा सत्यावलिप्ता या जिह्वा भूनाच यस्य वै । कर्कशा या भवेद्यस्य सोऽचिरात् हिमहाप्स्यन्" सुश्रु० । कर्कश परिक्षीणश्च हमिलुप्त देयलम् । वर्जयेत् पत्र याचन्त्"सुश्रु० "सुरहिपास्फालन-

करीमर ३ ... करीरोऽस्य टाभि ।
करीरम् ३ ... वाति व-ञ । ... टाभि ।
करीट न ... [illegible] । (कथाकथि) ... ।
... [illegible]
करीटच ३ ... ११ ... [illegible]
... [illegible] [प्रतिकर्मे ।
... [illegible]
कर्म ३ ... [illegible] (वाचस्पति) ... ।
... [illegible]
... ११२४
... [illegible] । टाभि ।
कर्मट ३ ... [illegible] (वाचक) ... (वरवशिष्ट) ... [illegible]
... ११ ... ८ ... [illegible]

परिधान । ... [illegible]
... [illegible] (वाचक) ... [illegible]
... [illegible]
कर्मठचा न ... (वाचस्पति) ... [illegible]
कर्मठवाडी ... । (वाचस्पति) ... [illegible]

विकृताकुसुमोत्सभास प्रभामरागसुषिता कलुषा विरूपा । तेजोऽतिदीप्तिकुन्तपुष्टविहीनवर्णा कर्कतमस्य महय वपुरुद्वहन्ति । कर्कतम यदि परोचितवर्णरूप प्रभ-प्रभास्वरदिवाकरसुप्रकाशम् । तथोत्तमस्य मणिशास्त्रविदा महिम्ना तुल्यन्तु मूल्यमुदितं तुलितस्य कार्य्यम्" ७५अ०

कर्कोट(क) पु॰ कर्क—अट । नागभेदे स च अष्टनागान्तर्गतः ।
"अनन्तो वासुकि पद्मो महापद्मोऽपि तक्षक । कर्कोट कुलिक शङ्ख इत्यष्टौ नागनायका" त्रिका॰ । ति॰त॰ पुराणान्तरे गारुडे च द्वितीयार्द्धे "कुलिक कर्कट शङ्ख इति पाठ । अयञ्च नागपञ्चम्या पूज्य यथाह तत्रैव । "शेष पद्मो महापद्म कुलिक शङ्खपालक वासुकि शङ्खचूडश्चैव कालियो मणिभद्रक । ऐरावतो धृतराष्ट्र, कर्कोटकधनञ्जयौ" इति । अयञ्च कद्रूपुत्रभेद । "शेष प्रथमतो जातो वासुकिस्तदनन्तरम । ऐरावतस्तक्षकश्च कर्कोटकधनञ्जयौ" भा॰ आ॰ ३५अ॰ नागनामकथने । कर्कोटकनागस्य नारदशापेन जडतामापन्नस्य नलेन सह सम्वादश्च भा॰ व॰ ६६अ॰
"उत्सृज्य दमयन्तीन्तु नलो राजा विशाम्पते । ददर्श दाव दह्यन्त महान्त गहने वने । तत्र शुश्राव शब्द वै मध्ये भूतस्य कस्यचित् । अभिधाव नलेत्युच्चै पुण्यश्लोकेति चासकृत् । मा भैरिति नलश्चोक्त्वा मध्य-मग्ने प्रविश्य तम् । ददर्श नागराजान शयान कुण्डलीकृतम् । स नाग प्राञ्जलिर्भूत्वा वेपमानो नलं तदा । उवाच विद्धि मा नाम्ना नाग कर्कोटक नृप । मया प्रलब्धो महर्षिर्नारद सुमहातपा । तेन मन्युपरीतेन शप्तोऽस्मि मनुजाधिप । तिष्ठ त्व स्थावर इव यावदेव नल क्वचित् । इतो नेता हि तत्र त्व शापान्मोक्ष्यसि मत्कृतात् । तस्य शापान्न शक्नोमि पदाद्विचलितु पदम् । उपदेक्ष्यामि ते श्रे-यस्त्रातुमर्हति मा भवान् । सखा च ते भविष्यामि मत्समो नास्ति पन्नग । लघुश्च ते भविष्यामि शीघ्र-मादाय गच्छ माम् । एवमुक्त्वा स नागेन्द्रो बभूवा-ङ्गुष्ठमात्रक । त गृहीत्वा नल प्रायाद्देश दावविव-र्जितम् । आकाशदेशमासाद्य विमुक्त कृष्णवर्त्मना । उत्स्रष्टुकाम त नाग पुन कर्कोटकोऽब्रवीत् । प-दानि गणयन् गच्छ स्वानि नैषध कानिचित् । तत्र तेऽहं महाबाहो श्रेयो धास्यामि यत् परम् । तत: सङ्ख्यातुमारब्धमदशद्दशमे पदे । तस्य दष्टस्य रूप तत् क्षिप्रमन्तरधीयत । स दृष्ट्वा विस्मितस्तस्थावात्मानं विकृत नल । स्वरूपधारिण नाग ददर्श स महीपति । तत कर्कोटको नाग सान्त्वयन् नलमब्रवीत् । मया तेऽन्तर्हित रूप न त्वा विद्युर्जना इति । यत्कृते चासि निकृतो दु खेन महता नल । विषेण स म-दीयेन त्वयि दु ख निवत्स्यति । विषेण संवृतैर्गात्रै-र्यावत् त्वा न विमोक्ष्यति । तावत्त्वयि महाराज । दु खं वै स निवत्स्यति । अनागा येन निकृतस्त्वमनर्हो ज-नाधिप । क्रोधादसूययित्वा त रक्षा मे भवत कृता । न ते भय नरव्याघ्र । दष्ट्रिभ्य शत्रुतोऽपि वा । ब्रह्मविद्भ्यश्च भविता मत्प्रसादान्नराधिप । राजन् । वि-षनिमित्ता च न ते पीडा भविष्यति । सङ्ग्रामेषु च राजेन्द्र । शश्वज्जयमवाप्स्यसि । गच्छ राजन्नित सूतो बाहुकोऽहमिति ब्रुवन् । समीपमृतुपर्णस्य स हि वेदाक्षनै पुण । अयोध्या नगरीं रम्यामद्य वै निषधेश्वर । स तेऽक्षहृदय दाता राजाश्वहृदयेन वै । इक्ष्वाकुकुलज श्रीमान् मित्रञ्चैव भविष्यति । भविष्यसि यदाक्षज्ञ श्रे-यसा योक्ष्यसे तदा । समेष्यसि च दारैस्त्वं मा स्म शोके मन कृथा । राज्येन तनयाभ्याञ्च सत्यमेत द्ब्रवीमि ते । स्वरूपञ्च यदा द्रष्टुमिच्छेथास्त्व नरा-धिप । संस्मर्त्तव्यस्तदा तेऽहं वासश्चेदं निवासये । अनेन वाससाच्छन्न स्व रूप प्रतिपत्स्यसे । इत्युक्त्वा प्रददौ तस्मै दिव्य वासोयुग तदा । एव नल स-मादिश्य वासो दत्त्वा च कौरव । नागराजस्ततो राज-स्तत्रैवान्तरधीयत" ।
७२अ॰ "तस्याक्षहृदयज्ञस्य शरीरान्निःसृत कलि । कर्कोटकविष तीक्ष्ण मुखात् सततमुद्वमन्" । ७८अ॰ । "कर्को-टकस्य नागस्य दमयन्त्या नलस्य च । ऋतुपर्णस्य राजर्षे कीर्त्तन कलिनाशनम्" भक्षाया कन् २बिल्ववृक्षे पु॰ राजनि॰ । ३फलवल्लीभेदे (काँकुड) गौरा॰ ङीष् "कर्कोटकीफल कुष्ठहृल्लासारुचिनाशनम् । श्वासकासज्व-रान् हन्ति कटुपाकञ्च दीपनम् । ईषद्विभिन्नपरिच परि-पूर्णगर्भं तैलेन रञ्जितचणकास्यपातयोगम् । बाह्लीकयुक्त-पयसा विहिताभिषेक कर्कोटकीफलमिद रुचिकृत्सक-त्यम्" । वैद्यके तद्गुणपाकादि । ४पीतघोषावृक्षे स्त्री रा-जनि॰ । स्वार्थे कन् अत इत्त्वम् । कर्कोटिका (काकरोल) वृक्षे (काँकुड) ५कुष्माण्डाद्ध स्त्री राजनि॰ ।

कर्कोटवापी स्त्री कर्कोटनागवासेन ख्याता वापी । काशीस्थे

[illegible]

कर्मसार [illegible]

[illegible]

कर्मी [illegible]

कर्मेन्द्रिय [illegible]

[illegible]

शिलताकुसुमोत्तभास प्रस्तामरागलुलिताः कलुषा विरूपाः। तेजोऽतिदीप्तिकुलपुष्टिविहीनवर्णा कर्केतनस्य सदृश वसुरुद्वहन्ति। कर्केतनं यदि परीक्षितवर्णरूपं प्रत्यग्रभास्वरदिवाकरसुप्रकाशम्। तस्योत्तमस्य मणिशास्त्रविदः महिम्ना तुल्यन्तु मूल्यमुदितं तुलितस्य कार्य्यम्" ७५अ०

कर्कोट(क) पु० कर्क–अ'ट। १नागभेदे स च अष्टनागान्तर्गतः। "अनन्तोवासुकिः पद्मो महापद्मोऽपि तक्षकः। कर्कोटः कुलिकः शङ्ख इत्यष्टौ नागनायकाः" तिका०। ति॰त० पुराणान्तरे गारुड़े च द्वितीयार्द्धे "कुलिकः कर्कटः शङ्खः" इति पाठः। अयञ्च नागपञ्चम्यां पूज्यः यथाह तत्रैव। "शेषः पद्मो महापद्मः कुलिकः शङ्खपालकः वासुकिस्तक्षकश्चैव कालियो मणिभद्रकः। ऐरावतो धृतराष्ट्रः कर्कोटकधनञ्जयौ" इति। अयञ्च कद्रूपुत्रभेदः। "शेषः प्रथमतोजातोवासुकिस्तदनन्तरम्। ऐरावतस्तक्षकश्च कर्कोटकधनञ्जयौ" भा० आ० ३५अ० नागनामकथने। कर्कोटकनागस्य नारदशापेन जडताप्राप्तिकथा नलेन सह संवादश्च भा० व० ६६अ०

"उत्सृज्य दमयन्तीन्तु नलो राजा विशाम्पते!। ददर्श दावं दह्यन्तं महान्तं गहने वने। तत्र शुश्राव शब्दं वै मध्ये भूतस्य कस्यचित्। अभिधाव नलेत्युच्चैः पुण्यश्लोकेति चासकृत्। मा भैरिति नलश्चोक्त्वा मध्यमग्नेः प्रविश्य तम्। ददर्श नागराजानं शयानं कुण्डलीकृतम्। स नागः प्राञ्जलिर्भूत्वा वेपमानो नलन्तदा। उवाच विद्धि मां नाम्ना नागं कर्कोटकं नृप!। मया प्रलब्धो ब्रह्मर्षिर्नारदः सुमहातपाः। तेन मन्युपरीतेन शप्तोऽस्मि मनुजाधिप!। तिष्ठ त्वं स्थावर इव यावदेव नलः क्वचित्। इतो नेता हि तत्र त्वं शापान्मोक्ष्यसि मत्कृतात्। तस्य शापान्न शक्नोमि पदाद्विचलितुं पदम्। उपदेक्ष्यामि ते श्रेयस्त्रातुमर्हति मां भवान्। सखा च ते भविष्यामि मत्समो नास्ति पन्नगः। लघुश्च ते भविष्यामि शीघ्रमादाय गच्छ माम्। एवमुक्त्वा स नागेन्द्रो बभूवाङ्गुष्ठमात्रकः। तं गृहीत्वा नलः प्रायादुद्देशं दावविवर्जितम्। आकाशदेशमासाद्य विमुक्तं कृष्णवर्त्मना। उत्स्रष्टुकामं तं नागं पुनः कर्कोटकोऽब्रवीत्। पदानि गणयन् गच्छ स्वानि नैषध! कानिचित्। तत्र तेऽहं महाबाहो! श्रेयो धास्यामि यत् परम्। ततः संख्यातुमारब्धमदशद्दशमे पदे। तस्य दष्टस्य तद्रूपं क्षिप्रमन्तरधीयत। स दृष्ट्वा विस्मितस्तस्थावात्मानं विकृतं नलः। स्वरूपधारिणं नागं ददर्श स महीपतिः। ततः कर्कोटको नागः सान्त्वयन् नलमब्रवीत्। मया तेऽन्तर्हितं रूपं न त्वां विद्युर्जना इति। यत्कृते चासि निकृतो दुःखेन महता नल!। विषेण स मदीयेन त्वयि दुःखं निवत्स्यति। विषेण संवृतैर्गात्रैर्यावत्त्वां न विमोक्ष्यति। तावत्त्वयि महाराज! दुःखं वै स निवत्स्यति। अनागा येन निकृतस्त्वमनर्हो जनाधिप!। क्रोधादसूययित्वा तं रक्षा मे भवतः कृता। न ते भयं नरव्याघ्र! दंष्ट्रिभ्यः शत्रुतोऽपि वा। ब्रह्मविद्भ्यश्च भविता मत्प्रसादान्नराधिप!। राजन्! विषनिमित्ता च न ते पीड़ा भविष्यति। संग्रामेषु च राजेन्द्र! शश्वज्जयमवाप्स्यसि। गच्छ राजन्नितः सूतो बाहुकोऽहमिति ब्रुवन्। समीपमृतुपर्णस्य स हि वैवाक्षनैपुणः। अयोध्यां नगरीं रम्यामद्यैव निषधेश्वर!। स तेऽक्षहृदयं दाता राजाश्वहृदयेन वै। इक्ष्वाकुकुलजः श्रीमान् मित्रञ्चैव भविष्यति। भविष्यसि यदाक्षज्ञः श्रेयसा योक्ष्यसे तदा। समेष्यसि च दारैस्त्वं मा स्म शोके मनः कृथाः। राज्येन तनयाभ्याञ्च सत्यमेतद्ब्रवीमि ते। स्वरूपञ्च यदा द्रष्टुमिच्छेथास्त्वं नराधिप!। संस्मर्त्तव्यस्तदा तेऽहं वासश्चेदं निवासयेः। अनेन वाससाच्छन्नः स्वरूपं प्रतिपत्स्यसे। इत्युक्त्वा प्रददौ तस्मै दिव्यं वासोयुगं तदा। एवं नलं समादिश्य वासो दत्त्वा च कौरव!। नागराजस्ततो राजंस्तत्रैवान्तरधीयत"।

७२अ० "तस्याक्षहृदयज्ञस्य शरीरान्निःसृतः कलिः। कर्कोटकविषं तीक्ष्णं मुखात् सततमुद्वमन्"। ७८अ०। "कर्कोटकस्य नागस्य दमयन्त्या नलस्य च। ऋतुपर्णस्य राजर्षेः कीर्त्तनं कलिनाशनम्" स्वार्थे कन्। २बिल्ववृक्षे पु० राजनि०। ३फलवल्लीभेदे (काँकुड) गौरा० ङीष्। "कर्कोटकीफलं कुष्ठहृल्लासारुचिनाशनम्। श्वासकासज्वरान् हन्ति कटुपाकञ्च दीपनम्। ईषद्भिन्नदलैरिव परिपूर्णगर्भं तैलेन रञ्जितमुदञ्चदपातयोगम्। दाम्बीकयुक्तपयसा निहिताभिषेकं कर्कोटकीफलमिदं रुचिकृत्सत्यम्"। वैद्यके तद्गुणपाकादि। ४पीतघोषावृक्षे स्त्री राजनि०। स्वार्थे कन् अत इत्त्वम्। कर्कोटिका (काकरोल) वृक्षे (काँकुड) ५कुष्माण्डभेदे स्त्री राजनि०।

कर्कोटवापी स्त्री कर्कोटनागवासेन कृता वापी। काशीस्थे

[illegible] । "[illegible]" [illegible] ।

[illegible] । [illegible]

कर्बूरिका [illegible] (कर्बूरी) [illegible] । [illegible]

[illegible] ।

कर्बरी [illegible] । [illegible] (कर्बरी) [illegible] । [illegible] ।

कर्बूर [illegible] । [illegible] । [illegible] (कर्बूर) [illegible] । [illegible] कर्बूरी [illegible] । कर्बूरी [illegible] । [illegible] । [illegible] । "[illegible]" [illegible] । [illegible] ।

कर्बूरक [illegible] कर्बूर+[illegible] । (भाषा) [illegible] । [illegible] । [illegible] ।

कर्म [illegible] । [illegible] ।

कर्म [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । "[illegible]" [illegible] । [illegible]

[illegible] "इति च मेद । [illegible] ।

कर्व ङ । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] ।

"[illegible] । [illegible] ? । [illegible] । [illegible] । [illegible] । [illegible]" इति । [illegible] । [illegible]" इति" । [illegible] । [illegible] ([illegible]) [illegible] । [illegible] । [illegible] ।" । [illegible]

त्वेन शब्दोपलम्भ । तन्मते श्रवणेन्द्रियस्य प्राप्यकारित्वोक्तिरप्येतत्परेति बोध्यम् ।
कर्णस्याविशालदेशत्व दिक् इति शब्दाधिकशब्दे उक्तम् । कर्णपाशाश्च शब्दास्तद्देशत्वसमर्थाश्च "कर्णे लत कनकपत्रमनालपन्त्या" चौरप० । "श्रियमदाकर्ण्य नवल्लकर्ण्या" नैष० "तद्गुणैः कर्णमागत्य चापलाय प्रचोदित" रघु श्रवणेन्द्रियस्य चलत्वेऽपि तदाधाराभिप्रायेण "श्रवणस्थित-कर्णचम्पकुलोकलोक दधयस्त्रीचत" नैष० वाक्यम् । २सुवर्णाख्ये वृक्षे मेदि० । त्रिकोणादिक्षेत्रे ४भुजकोटिवर्गयोजकरेखाभेदे तद्रेखामानज्ञानोपायश्च लीला० उक्तो यथा "इष्टाद्बाहोर्यः स्यात्तत्स्पर्द्धिन्या दिशीतरो बाहुः । त्र्यस्रे चतुरस्रे वा सा कोटिः कीर्त्तिता तज्ज्ञैः । तत्कृत्योर्योगपदं कर्णो, दोःकर्णवर्गयोर्विवरात् । मूलं कोटिः, कोटिश्रुतिकृत्योरन्तरात् पदं बाहुः" इति उदा० "त्र्यस्रक्षेत्रमत्रोच्यते भुज ४ कोटि ३ अनयोर्वर्गौ १६, ९, तयोर्योगः २५ तस्य मूलम् ५ तथाच चतुरस्रायतक्षेत्रे त्रिकोटिके क्षेत्रे कर्णमानम् पञ्च इत्यादि । अधिकक्षेत्रव्यवहारशब्दे वक्ष्यते । अस्य च भुजकोटिभेदनात् कतिधारा तयोर्वर्गव्यापनाच्च कर्णत्वम् । ५कुटिले च "आधारवत् प्राणभरा कर्णसहिता" कात्या० १७, ६, ०। "कर्णेन चक्षुषा सहिता" स० व्या० "चक्षुषा कौटिल्येन" इति कात्या० ५, ४, १५ सू० व्या० कर्क । कुन्त्या कन्यावस्थायां सूर्यात् जाते स्वनामख्याते देवपुत्रे तदुत्पत्तिकथा यथा "शूरो नाम यदुश्रेष्ठो वसुदेवपिताऽभवत् । तस्य कन्या पृथा नाम रूपेणासदृशी भुवि । पितुः स्वसीयपुत्राय सोऽनपत्याय वीर्यवान् । अग्रमग्रे प्रतिज्ञाय स्वस्यापत्यस्य वै तदा । अग्रजातेति तां कन्यां शूरोऽनुग्रहकाङ्क्षया । अददत् कुन्तिभोजाय स तां दुहितरं तदा । सा नियुक्ता पितुर्गेहे ब्राह्मणातिथिपूजने । उग्रं पर्यचरद्घोरं ब्राह्मणं संशितव्रतम् । निगूढनिश्चयं धर्मे यं तं दुर्वाससं विदुः । तमुग्रं शंसितात्मानं सर्वयत्नैरतोषयत् । तस्यै स प्रददौ मन्त्रमभिचारसमन्वितम् । तुष्टः स यथाविधि । उवाच चैनां भगवान् प्रीतोऽस्मि सुभगे तव । यं यं देवं त्वमेतेन मन्त्रेणावाहयिष्यसि । तस्य तस्य प्रसादात्त्वं देवि पुत्रान् जनिष्यसि । एवमुक्ता च सा बाला तदा कौतूहलान्विता । कन्या सती देवमर्कमाजुहाव यशस्विनी । प्रकाशकर्त्ता भगवांस्तस्यां गर्भं दधौ तदा । अजीजनत् सुतं तस्मात् सर्वशस्त्रभृतां वरम् । सकुण्डलं सकवचं देवगर्भं श्रियान्वितम् । दिवाकरसमं दीप्त्या चारुसर्वाङ्गभूषितम् । निगूहमाना जातं वै बन्धुपक्षभयात् तदा । उत्ससर्ज जले कुन्ती तं कुमारं यशस्विनम् । तमुत्सृष्टं जले गर्भं राधाभर्त्ता महायशाः । राधायाः कल्पयामास पुत्रं सोऽधिरथस्तदा । चक्रतुर्नामधेयञ्च तस्य बालस्य तावुभौ । दम्पती वसुषेणेति दिक्षु सर्वासु विश्रुतम् । स वर्द्धमानो बलवान् सर्वास्त्रेषूत्तमोऽभवत् । वेदाङ्गानि च सर्वाणि समाप जयतां वरः । यस्मिन् काले जपन्नास्ते धीमान् सत्यपराक्रमः । नादेयं ब्राह्मणेष्वासीत्तस्मिन् काले महात्मनः । तमिन्द्रो ब्राह्मणो भूत्वा पुत्रार्थे भूतभावनः । ययाचे कुण्डले वीरं कवचञ्च सहाङ्गजम् । उत्कृत्य कर्णो ह्यददत् कवचं कुण्डले तथा । शक्तिं शक्रो ददौ तस्मै विस्मितश्चेदमब्रवीत् । देवासुरमनुष्याणां गन्धर्वोरगरक्षसाम् । यस्मिन् क्षेप्स्यसि दुर्द्धर्ष । स एको न भविष्यति । पुरा नाम च तस्यासीद्वसुषेण इति क्षितौ । ततो वैकर्त्तन कर्णः कर्मणा तेन सोऽभवत् । आमुक्तकवचो वीरो यस्तु जज्ञे महायशाः । स कर्ण इति विख्यातः पृथायाः प्रथमः सुतः । स तु सूतकुले वीरो ववृधे राजसत्तम । कर्णं नरवरश्रेष्ठ सर्वशस्त्रभृतां वरम् । दुर्योधनस्य सचिवं मित्रं शत्रुविनाशनम् । दिवाकरस्य तं विद्धि राजन्! अंशमनुत्तमम्" । तस्याङ्गदेशाधिपताप्राप्तिः अङ्गाधिपशब्दे उक्ता । कर्णोऽस्त्यस्य प्राशस्त्येन अर्श० अच् । ७लम्बकर्णे त्रि० । "खड्गो वैश्वदेवः श्वा कृष्णः कर्णो गर्दभ" यजु० २४, ४० । "कर्णो स-म्बकर्णः" वेददी० । ८अरित्रे च पु० कर्ण "नौकमरित्रं स्मृतं" दुर्ग । कर्णधार । "हतकर्णेव नौर्जले" रामा० ।

कर्णक पु० कर्णयति विभिद्य जायते कर्ण—ण्वुल् । वृक्षादीनां पत्रशाखादौ तेषां दारुस्फोटनेन जायमानत्वेन तथात्वम् । "यथोदुम्बरो मासि मासि सर्वदा रस उदुम्बरः फलं वैतदर्ह्नेन प्रीणाति यत्कर्णवती भवति पयसो वै सर्वा" "यदि कर्णकवतीं न विन्देत् दधिद्रप्समपहत्य दद्यात्" शत० ब्रा० । ६, २, २, ४० । "कर्णकशब्देनात्र पत्रशाखादिकं विवक्षते" भा० । पञ्चनाञ्च कर्णकशब्दवाच्यत्वञ्च पत्रशाखादिना वृहिमत्त्वात् इत्यपि तत्रैवोक्तम् पत्राणाञ्च कर्णाकारत्वादपि कर्णकत्वमित्यपि बोध्यम् वृक्षाणां दारुस्फोटे २रोगे च । "यत्र दशतमा सकर्णका" कात्या० १८, ४, ६ । "कर्णको दारुस्फोटो रोगस्तद्वती चोदम्बरी" स य० । "कर्णकामावे दधिद्रप्साक्ता" कात्या० १८, ४, ७ । तत तारादि० इतच् । कर्णकित जातपत्रादौ त्रि० ।

कर्णकाण्डू स्त्री ७त० । कर्णगतरोगभेदे कर्णगतरोगशब्दे विवृति ।

[illegible]

शून्येव प्रतिभाति मे । गते दशरथे स्वर्गे रामे च रण्यमाश्रिते” रामा० ।

कर्णनाद पु० कर्णे अङ्गुल्यापिहितकर्णे नाद ध्वनिभेदः । अङ्गुल्यापिहितकर्णे (भों भों) इत्याकारे मध्यमाशब्द स्वरूपे ध्वनिभेदे । ‘मध्यमा श्रुतिगोचरा’ इत्युक्ते स्तस्या-स्तथात्वम् ।

कर्णपत्रक पु० पत्रमिव कायति कै—क कर्णे पत्रक इव । कर्णपाल्याम् । “कनीनिके चाक्षिकूटे शष्कुली कर्णपत्रकौ । कर्णौ शङ्खौ भ्रुवौ दन्तवेष्टावोष्ठौ ककुन्दरे” याज्ञ० । “कर्णपत्रकौ कर्णपाल्यौ” मिता० ।

कर्णपथ पु० कर्णः एव पन्था अच् समा० । कर्णरन्ध्ररूपे शब्दप्रवेशनयोग्ये मार्गे ।

कर्णपरम्परा स्त्री ६त० । श्रवणपरम्परायाम् । (कांणा कांणि) ‘तेनैव च क्रमेणैव गता कर्णपरम्पराम् । प्रवादोऽबहुलीभाव सर्वस्यापि पुरे ययौ” कथासरित्सा० । एकस्य सकाशादन्येन श्रुत्वाऽन्यस्मै कथने तेनापि पुनरन्यस्मै कथने एव परम्परया श्रवणे अस्य वृत्ति ।

कर्णपराक्रम पु० अपभ्रंशयोग्यवर्णच्छन्दोयुक्ते काव्यभेदे ।

कर्णपर्वन् न० भारतान्तर्गते अष्टमे पर्वणि । तत्पर्वणि कथासंक्षेप भा० आ० १अ० यथा “अतः परं कर्णपर्व प्रोच्यते परमाद्भुतम् । सारथ्ये विनियोगश्च मद्रराजस्य धीमतः । आख्यातं यत्र पौराणं त्रिपुरस्य निपातनम् । प्रयाणे परुषश्चात्र संवादः कर्णशल्ययोः । हंसकाकीयमाख्यानं तत्रैवाक्षेपसंहितम् । वधः पाण्ड्यस्य च तथा अश्वत्थाम्ना महात्मना । दण्डसेनस्य च ततो दण्डस्य च वधस्तथा । द्वैरथे यत्र कर्णेन धर्मराजो युधिष्ठिरः । संशयं गमितो युद्धे मिषतां सर्वधन्विनाम् । अन्योन्यं प्रति च क्रोधो युधिष्ठिरकिरीटिनोः । यत्रैवानुनयः प्रोक्तो माधवेनार्जुनस्य हि । प्रतिज्ञापूर्वकञ्चापि वक्षोदुःशासनस्य च । भित्त्वा वृकोदरो रक्तं पीतवानत्र संयुगे । द्वैरथे यत्र पार्थेन हतः कर्णो महारथः । अष्टमं पर्व निर्दिष्टमेतद्भारतचिन्तकैः । एकोनसप्तति प्रोक्ता अध्यायाः कर्णपर्वणि । चत्वार्येव सहस्राणि नवश्लोकशतानि च । चतुःषष्टिस्तथा श्लोकाः पर्वण्यस्मिन् प्रकीर्त्तिताः” । “कर्णपर्वण्यपि तथा भोजनं सार्व्वकामिकम् । विप्रेभ्यः सम्प्रदत्तं सम्यग्दद्यात् स यतमानसः” भा० स्वर्गा० ६अ० ।

कर्णपाक पु० सुश्रुतोक्ते कर्णरोगभेदे कर्णगतरोगशब्दे विवृतिः ।

कर्णपालि(ली) स्त्री ६त० । १कर्णपालके कर्णाग्रभेदे । (कांणेर पाता) तदग्रवर्त्ति नासमेयीभेदः यथाह भावप्र० नासमेदीयाध्यायविभागे ‘यथार्थमूशणा युक्त्या सु स्रोतांसि दारयेत् । अनुप्रविश्य पिशित मेदोऽभिवहते तथा । नासमेदस्य सनाख्यातान्यथा पञ्च शतानि च” इत्युपक्रम्य “गण्डयोश्चतस्रः कर्णयोर्द्वे” इत्युक्तम् । ‘कर्णे-शोथो भवेत् पाल्याम्” “कुर्व्वन्ति पीडकां पाल्याम्” “छिद्रात् स शष्कुलीन् पाले” । कर्णरोगे भावप्र० “छिद्रात् निर्मांसीकुर्यात्” भावप्र० । कर्णं पालयति पाल+अण् उप० स० गौरा० ङीप् । (कांण वाला) २कर्णालङ्कारभेदे हारा० ।

कर्णपाल्यामय पु० ७त० । कर्णव्यधदोषजे सुश्रुतोक्ते कर्णपालिरोगभेदे स च सुश्रुते सोपद्रवो दर्शितः यथा “कर्णपाल्यामयान् नृणां पुनर्व्वक्ष्यामि सुश्रुत । कर्णपाल्यां प्रकुपिता वातपित्तकफास्त्रयः । द्विधा वाप्यथ सं-सृष्टा कुर्व्वन्ति विविधा रुजः । विस्फोटः स्तब्धता शोथः पाल्यां दोषे तु वातिके । दाहविस्फोटजननं शोथः पाकश्च पैत्तिके । कण्डूः सश्वयथुः स्तम्भो गुरुत्वञ्च कफात्मके । यथादोषञ्च संशोध्य कुर्य्यात्तेषां चिकित्सितम् । स्वे-दाभ्यङ्गपरीषेकैः प्रलेपासृग्विमोक्षणैः । मृद्वीं क्रियां बृंहणीयैर्यथास्वं भोजनैस्तथा । य एवं वेत्ति दोषाणां चिकित्सां कर्त्तुमर्हति । अत ऊर्द्ध्वं नामलिङ्गैर्व्वक्ष्ये पाल्यामुपद्रवान् । उत्पाटकश्चोत्पुटकः श्यावः कण्डूयुतो भृशम् । अवमन्थः सकण्डूको ग्रन्थिको जम्बुलस्तथा । स्रावी च दाहवांश्चैव इत्येषा क्रमशः क्रियाम्” ।

कर्णपिशाची स्त्री देवीभेदे । तन्त्रसारे मन्त्र दृश्यम् ।

कर्णपुर न० ६त० अच् समा० । चम्पानगर्याम् हेमच० ।

कर्णपुष्प पु० कर्ण इव पुष्पं यस्य । मोरटालतायाम् राजनि० ।

कर्णपूर पु० कर्णं पूरयति पूर-अण् । १कर्णाभरणे, २नीलोत्पले, ३शिरीषवृक्षे मेदिनि । ४अशोकवृक्षे राजनि० । एतेषां पुष्पं स्त्रीकर्णस्य भूषा भवतीति तेषां तथात्वम् । “वक्त्राम्भोरुहकर्णपूरमधुप” प्रबन्धच० । “प्रत्यग्रनीलाब्जकर्णपूर” “विलम्बिनीलोत्पलकर्णपूरा” रघु ।

कर्णपूरक पु० कर्णं पूरयति पूर—ण्वुल् । १कदम्बवृक्षे राजनि० । स्वार्थे क । २कर्णाभरणे ३नीलोत्पले ४शिरीषवृक्षे ५अशोकवृक्षे च राजनि० । एतेषां पुष्पं स्त्रीकर्णस्य भूषा भवतीति तेषां तथात्वम् ।

कर्णपूरण न० ६त० । सुश्रुतोक्ते तैलादिना कर्णस्य पूरणे

[illegible]

कर्णमोटि(टी) [illegible]

[illegible]

पुनर्वसुचित्राहस्ताधास्वातीरेवत्यश्विनीपुष्यहस्तनक्षत्रैःउपलक्षिते काले कर्णवेधः प्रशस्तः । उक्तं हि श्रीपतिना "पौष्णैन्द्रवश्रवणकराश्विनमित्राचित्रापुष्यशाश्वतपुनर्वसुमैत्रे । सैन्द्रवे श्रवणवेधविधानं निर्दिशन्ति मुनयो हि शिशूनाम्" । नारदेनापि "चित्रादितिश्विविष्णुन्त्यरविमित्रवसूडुष । सम्प्रोक्ष्येषु बालानां कर्णवेधक्रिया हितेति" गर्गेणोत्तरात्रयमप्युक्तम् । 'पुष्ये धनिष्ठास्वदितौ हरीन्द्रत्वाष्ट्रे करेऽन्त्ये त्रिषुपूत्तरासु । दस्ते समैत्रेऽप्यथ कर्णवेधो नेष्टाय सर्वेऽष्टमराशिसंस्थाः" इति । अत्रैच्छिकोऽयं विकल्पः । अत्र जन्मनक्षत्रनिषेधः सर्वथाऽविशिष्टः । तदुक्तं दीपिकायाम् "जन्मनक्षत्रगचन्द्रः प्रशस्तः सर्वकर्मसु । क्षौरभैषज्यशास्त्राध्वकर्त्तनेषु विवर्जयेत्" इत्यत्र छेदन-इति शास्त्रार्थानुसारात् कर्त्तनशब्देन कर्णवेधोऽपि लक्षित । तथा च स्मर्यते । "जन्मनि माति विवाह शुभदो नरार्क्षजन्मराश्योश्च । अशुभं वदन्ति गर्गाः श्रुतिवेधक्षौरयात्रास्विति" । "मृतिभवनेऽष्टमस्थाने संशुद्धे सर्वपाप-वर्जिते सति । यदाह जगन्मोहने वसिष्ठः "न कश्चिदिष्टोऽष्टमराशिसंस्थः स्थिरद्वयस्वावनम्रक्ष चेति' अत्र विहितलग्नानि प्रयोगपारिजाते नारदेनोक्तानि । "वृषभे मिथुने मीने कुलीरे कन्यके तु च । तुलाचापे च कुर्वीत कर्णवेधं शुभावहम् । मेषश्च मकरश्चैव मध्यमा गुरुणोदितौ । सिंहवृश्चिककुम्भाश्च अधमत्वाद्विवर्जिताः" इति । अतएवोक्तं वराहसंहितायाम् "लाभे तृतीये च शुभैः समेते क्रूरैर्विहीने शुभराशिलग्ने । वेध्यौ तु कर्णौ त्रिदशेज्यलग्ने' इति शुभाश्चन्द्रबुधगुरुशुक्रास्तेषां राशयः कर्कमिथुनकन्यावृषतुलाधनुर्मीनास्तेषामन्यतमे लग्ने क्रूरैर्विहीने सत्यर्थः । अन्यश्रीपिकाकारमतमाश्रित्याह कश्चित् । कर्णास्ययोर्लग्ने वृषतुलाधनुर्मीनानामन्यतमे लग्ने सति त्रिकोणे ५,९, केन्द्रे १ ४,७,१० त्र्याय ३,११, स्थितैः शुभग्रहैस्तथा पापाख्यैर्ग्रहैररिसहजायगेहसंस्थैः षष्ठतृतीयैकादशस्थानस्थितैरुपलक्षिते तथा लग्नस्थे त्रिदशगुरौ सति कर्णवेधः शुभावहः शुभकारकः स्यात् उक्तञ्च दीपिकायाम् "सौम्यैस्त्र्यायत्रिकोणकण्टकगतैः पापैस्त्रिलाभारिगैर्लग्नेज्ये श्रुतिवेधकृज्ज्यसतयोर्लग्नेऽनुकूले शुभे" इति गुरु 'कर्णवेधादिकार्येषु नेष्टाः सर्वेऽष्टमस्थिताः । कर्णवेधो विनिर्दिष्टो लग्नस्थे च बृहस्पतौ । तदभावेऽन्यकेन्द्रस्थे तदभावे त्रिकोणगे" इति अत्र कर्णवेधप्रकारो रत्नमालायाम् "शिशोरजातदन्तस्य मातुरुत्सङ्गसर्पिणः । सौचिको वेधयेत् कर्णौ सूच्या द्विगुणसूत्रया" कर्णरन्ध्रे विशेषमाह देवलः "कर्णरन्ध्रे रवेश्छाया न विशेदग्रजन्मनः । तं दृष्ट्वा विलयं यान्ति पुण्यौघाश्च पुरातनाः" शालङ्कायनः "अविद्धकर्णं यद्भुक्तं लम्बकर्णैस्तथैव च । दग्धकर्णैश्च यद्भुक्तं तद्वै रक्षांसि गच्छतीति" । कर्णवेधप्रकारः कर्णव्यधविधिशब्दे वक्ष्यमाणश्रुत्योक्तावनुसन्धेयः ।

शिवा० पा० । श्रीधरः 'हरिहरकरचित्रासौम्यपौष्णोत्तराख्यादितिवसुषु घटालीसिंहवर्ज्ये सुलग्ने । शशिबुधगुरुशुक्राख्यानां दिने पर्वरिक्तारहिततिथिषु शुद्धे नैधने कर्णवेधः । सुनक्षत्रे शुभे चन्द्रे सुस्थे शीर्षोदये शुभे । दिगश्चिन्द्रव्यतीपातविष्टिवैधृतिवर्जिते । शिशोरजातदन्तस्य मातुरुत्सङ्गसर्पिणः । सौचिको वेधयेत् कर्णौ सूच्या द्विगुणसूत्रया । शातकुम्भमयी सूचिर्वेधने तु शुभप्रदा । राजती चायसी वापि यथा विभवतः शुभा । शुभे भूमौ प्राङ्गणे रम्ये शुचौ देशेऽम्बरे रवे । सविधौ वेधयेत् कर्णौ स्त्रीपुंसोर्वामदक्षिणौ । क्रमेण पूर्वं वेध्यौ द्वौ शिशोरायुष्यवर्द्धनौ" । अन्यत्रेऽप्युक्तम् "शुक्लसूत्रसमायुक्तया सूच्याथ वेधयेत् । वेधात् तृतीये नक्षत्रे स्नापयेदुष्णवारिणा । रोपणार्थं सुशुभ्यर्थं वालसवर्त्तिमाङ्गयात् । एवं छिन्ने च भिन्ने च हित्वा योज्यानि योजयेत्" विष्णुधर्म्मोत्तरे पुष्करः "शिशोरेवाथ कर्त्तव्यः कर्णवेधो यथा शृणु । पूर्वाह्णे पूजनं कृत्वा केशवस्य हरस्य च । ब्राह्मणचन्द्रसूर्याभ्यां दिग्गीशानान्तथैव च । मानव्ययो प्रदत्त्वा ब्राह्मणानां गवां तथा । गुरूणां, मण्डलं कृत्वा तत्र दद्यात् वरासनम् । तथोपवेशयेत्तत्र धात्री शुक्लाम्बरा तथा । अलङ्कृत तदुत्सङ्गे बालं धृत्वा तु सान्त्वने । एतस्य निश्चलं सम्यक् कन्दुकम् रत्नाञ्चितम् । विध्येदलङ्कृते छिद्रे सकृदेवात्र लाघवात् । प्राग्दक्षिणे कुमारस्य भिषग्वामे तु योषितः । शिशोर्विवेधनं कार्यं यावदामरणक्षमम् । कर्णवेधदिने विप्रान् सांवत्सरचिकित्सकौ । पूजयेच्च विविधा भार्य्या सुहृदश्च तथा द्विजैः" । अत्र पुरुषकर्णरन्ध्रवृद्धिविषये विशेषमाह हेमाद्रौ देवलः "कर्णरन्ध्रे रवेश्छाया न विशेदग्रजन्मनः । तं दृष्ट्वा विलयं यान्ति पुण्यौघाश्च पुरातनाः" । तत्प्रमाणं प्रसङ्गान्तरेणाह गर्गः । "अङ्गुष्ठमानसुषिरौ कर्णौ न भवतो यदि । तस्मै श्राद्धं न दातव्यं यदि चेत् सुर भवेत् तस्य श्राद्धेऽपात्रतामाह शालङ्कायनः । 'अविद्धकर्णैर्यद्भुक्तं लम्बकर्णैस्तथा च यत् । दग्धकर्णैश्च यद्भुक्तं तद्वै रक्षांसि गच्छति" । शिवा० पा० । तथा च कर्णवेध

[illegible]

शास्त्रप्रयुक्ता न सिद्धिमुपयान्ति । भवन्ति चात्र । यस्य पालिद्वयमपि कर्णस्य न भवेदिह । कर्णपीठं समे मध्ये तस्य विद्ध्वा विवर्द्धयेत् । बाह्यायामिह दीर्घायां सन्धिराभ्यन्तरो भवेत् । आभ्यान्तरायां दीर्घायां बाह्यसन्धिरुदाहृत । एकैव तु भवेत्पालिः स्थूला पृथ्वी स्थिरा च या । तां द्विधा पाटयित्वा तु छित्त्वा चोपरि सन्धयेत् । गण्डादुत्पाद्य मांसेन सानुबन्धेन जीवता । कर्णपालिमपालेस्तु कुर्य्यान्निर्लिख्य शास्त्रवित् । अतोऽन्यतम बन्धं चिकीर्षुरग्रोपहरणीयोक्तोपसम्भृतसम्भार विशेषतश्चात्रोपहरेत् सुरा मण्ड क्षीरमुदकं धान्याम्ल कपालचूर्णञ्चेति । ततोऽङ्गना पुरुषं वा ग्रथितकेशान्तं लघु भुक्तवन्तमाप्तैः सुपरिगृहीतञ्च कृत्वा बन्धमुपधार्य्य छेद्यभेद्यलेख्यव्यधनैरुपपन्नमुपपाद्य कर्णशोणितमवेक्षेत शुद्धमशुद्धं वेति । तत्र वातदुष्टे धान्याम्लोष्णोदकाभ्यां, पित्तदुष्टे शीतोदकपयोभ्यां, श्लेष्मदुष्टे सुरामण्डोष्णोदकाभ्यां प्रक्षाल्य कर्णौ पुनरवलिख्यानुन्नतमहीनमविषमञ्च कर्णसन्धिं सन्निवेश्य स्थितरक्तं सन्दध्यात् । ततो मधुघृतेनाभ्यज्य पिचुप्लोतयोरन्यतरेणावगुण्ठ्य सूत्रेणानवगाढमशिथिलञ्च बद्ध्वा कपालचूर्णेनावकीर्य्याचारिकमुपदिशेद्द्विव्रणीयोक्तेन विधानेनाचरेत् । भवतश्चात्र । विमर्द्दनं दिवास्वप्नं व्यायाममतिभोजनम् । व्यवायमग्निसन्तापं वाक्श्रमञ्च विवर्ज्जयेत् । आमतैलपरिषेकं त्रिरात्रमवधारयेत् । ततस्तैलेन सस्नेह त्र्यहादपनयेत् पिचुम् । न चाशुद्धरक्तमतिप्रवृत्तरक्तं वा सन्दध्यात् । स हि वातदुष्टे रक्ते रूढोऽपि परिपुटनवान्, पित्तदुष्टे दाहपाकरागवेदनावान्, श्लेष्मदुष्टे स्तब्धः कण्डूमान्, अतिप्रवृत्तरक्ते श्यावशोफवान् । क्षीणोऽल्पमांसो न वृद्धिमुपैति । स यदा सुरूढो निरुपद्रवः सवर्णो भवति तदैनं शनैः शनैरभिवर्द्धयेत् । अतोऽन्यथा संरम्भदाहपाकरागवेदनावान् पुनश्छिद्यते वा । अथास्याप्रदुष्टस्याभिवर्द्धनार्थमभ्यङ्गः । तद्यथा गोधाप्रतुदविष्किरानूपौदकवसामज्जानौ पयः सर्पिस्तैलं गौरसर्षपजञ्च यथालाभं सम्भृत्यार्कालर्कबलातिबलानन्तापामार्गाश्वगन्धाविदारिगन्धाक्षीरशुक्लाजलशूकमधुरवर्गप्रतिवापं तैलं वा पाचयित्वा स्वनुगुप्तं निदध्यात् । स्वेदितोन्मर्दितं कर्णं स्नेहेनानेन योजयेत् । अथानुपद्रवः सम्यक् बलवांश्च विवर्द्धते । यवाश्वगन्धायष्ट्याह्वैस्तिलैश्चोद्वर्त्तनं हितम् । शतावर्य्यश्वगन्धाभ्यां पयस्यैरण्डजीवनैः । तैलं विपक्वं सक्षीरमभ्यङ्गात् पालिवर्द्धनम् । ये तु कर्णा न वर्द्धन्ते विधिनानेन योजिताः । तेषामपाङ्गदेशे तु कुर्य्यात् प्रच्छानमेव तु । बाह्यच्छेदं न कुर्व्वीत व्यापदस्तु ततो ध्रुवाः । बद्धमात्रन्तु यः कर्णं सहसैवाभिवर्द्धयेत् । आमकोशीसमाध्मातः क्षिप्रमेव विमुच्यते । जातरोमा सुवर्त्मा च श्लिष्टसन्धिः समः स्थिरः । सुरूढोऽवेदनो यस्तु तं कर्णं वर्द्धयेच्छनैः । अमिता कर्णबन्धास्तु विज्ञेयाः कुशलैरिह । यो यथा सुनिविष्टः स्यात्तं तथा विनियोजयेत्" । एवं वेधप्रकाराभिज्ञेनैव भिषजा कर्णवेधः कारयितव्यः

कर्णशष्कुली स्त्री कर्णस्य शष्कुलीव । १कर्णगोलके, "अवलम्बितकर्णशष्कुलीकलशीकं रचयन्नवोचत" नैष० । "कर्णशष्कुल्यवच्छिन्नं नभ श्रोत्रम्" भाषा० २तन्मध्याकाशे च ।

कर्णशूल न० ६ त० । कर्णरोगभेदे । कर्णगतरोगशब्दे विवृतिः

कर्णशोभन त्रि० कर्णं शोभयति शुभ–णिच्–ल्यु । कर्णाभरणे "उत न कर्णशोभना पुरूणि" ऋ० ८,७८,२,

कर्णश्रव त्रि० श्रूयते श्रव शब्दः कर्णेन श्रव श्रवणयोग्य शब्दोऽत्र । श्रवणयोग्यशब्दधारे वय्वादौ "कर्णश्रवेऽनिले रात्रौ दिवा पांशुसमूहने" मनु ।

कर्णसंस्राव पु० कर्णरोगभेदे कर्णगतरोगशब्दे विवृतिः ।

कर्णसू स्त्री कर्णं सूते सू–क्विप् । पृथायां कुन्त्याम् तत्-प्रसवकथा कर्णशब्दे उक्ता । कर्णजनन्यादयोऽप्यत्र ।

कर्णस्फोटा स्त्री कर्णे स्फोटो विदारणं यस्याः । (कानफाटा) लताभेदे राजनि० । "कर्णस्फोटा कटुस्तिक्ता हिमा च परिकीर्त्तिता । सर्व्वग्रहभूतविषदोषव्याधिविनाशिनी" राजनि०

कर्णस्रोतस् न० कर्णस्य स्रोत इव । कर्णमले

कर्णस्रोतोभव पु० कर्णस्रोतसो विष्णुकर्णमलाद्भवति भू–अच्, भवत्यस्मात् अपादाने अप् कर्णस्रोतो भवोऽस्य वा । विष्णुकर्णमलोद्भूते मधुनामके कैटभनामके चासुरे । "कर्णस्रोतोभवश्चापि मधुर्नाम महासुरः । तस्यैव कर्म्माण्युग्रा बुद्धिं समास्थितम् । ब्रह्मणोऽपचितिं कुर्व्वन् जघान पुरुषोत्तमः" भा० अनु० ६६ अ० । यथा चास्य विष्णुकर्णोद्भवः तथा कैटभशब्दे वक्ष्यते ।

कर्णहीन त्रि० ६त० । १बधिरे बाधिर्य्यञ्चाप्रिय पापविशेषजन्या यथाह शाता० स० । "कापघातो कर्णहीनो दद्याद्धर्म्मसमप्रभाम्"। २सर्पे च पु स्त्री चक्षुःश्रवस्त्वात्तस्य तथात्वम् । स्त्रियां जातित्वात् ङीप् ।

कर्णाकर्णि [illegible] (वाचस्पत्य) [illegible] "कर्णाकर्णि हि [illegible]" [illegible]

कर्णाट पु० [illegible] "कर्णाटेश [illegible]" [illegible] "कर्णाटचूडामणि [illegible]" [illegible] कर्णाटराजप्रियाम् [illegible] कर्णाटभाषा [illegible] [illegible] कर्णाटी [illegible] [illegible] "कर्णाटी च [illegible]" [illegible]

कर्णाटक पु० [illegible] कर्णाटकाः [illegible] कर्णाटिका [illegible]

कर्णाद न० [illegible] "[illegible]" [illegible]

कर्णादि त्रि० [illegible]

[illegible] "[illegible]" [illegible]

कर्णीसुत पु० [illegible] । [illegible]

कर्णेन्दु (न्द्) पु० [illegible] । [illegible]

कर्णीरथ पु० [illegible] (वोपदेव) राजनि०

कर्णोत्पल स्त्री० [illegible]

कर्णोर [illegible] (वाचस्प०) [illegible] राजनि० [illegible]

कर्णोत्साह पु० [illegible]

कर्णि पु० [illegible]

कर्णिका स्त्री० [illegible] (वाच०) [illegible] "[illegible]" [illegible] (वद्या) [illegible] राजनि० [illegible]

कर्णिकाचल पु० [illegible] "[illegible]" [illegible]

कर्णिकार पु० [illegible] (वाचस्पत्य) [illegible] "[illegible]" [illegible]

कर्णिन् पु० [illegible]

स्त्रिं न्डा० स्त्रियां ङीप् । २वर्षदेशभेदे च शब्दचि० ।

कर्णिन् त्रि० कर्ण-अस्त्यर्थे इन्द्रा० एकौ वा इमि । वृहत्-कर्णयुक्ते बाणवर्षे अस्त्रकर्णमामन्त्य निधानपाटि० ग्रहस्थिति तावान्त । "कनुमूलादथ कर्णी शल्यो तु परिकीर्त्तितौ । कर्णी तु द्वाभ्यां यो मन्त्रविति गमनतपोऽस्तीति" । "चक्र-धारादिकेयूरायार्थैः शस्त्रकर्णिने" भा० अनु० १४८० । स्त्रियां ङीप । सा च योनिरोगभेदे च सा च "विगतिर्व्यापदो योगमेर्भिदिष्टा रोगसङ्घे" इत्युद्दिश्य "उ-दावर्त्ता तथा बन्ध्या—प्रदामन्ता तु या योनि कर्णिनी चरपादिदम् । षण्डिका मकका घोया" इत्यादिना ता विभज्य "प्रदिग्धा कर्णिका योनौ नेत्राद्दग्धाः तु जा-यते" इति लक्षिता । "शीर्षं प्रदद्यात् कर्णिन्यां शोध-नद्रव्यभक्ताम् । पर्यानिन्तौ इताम्यक्तौ क्षौरस्थिदा च श्रेयसेम्" सुश्रु० । २कटिभावयवयुक्ते मांसभेदे पु० । "करोति कर्णिको यस्तु यन्तु भक्षणादिहद्गत । प्रयाति तं विम घने नरके भयदारुणे" विष्णुपु० २ अ० ६ अ० । "कर्णिनो बाणविशेषान्" श्रीधर । अत्र पक्षे इन्द्रा० एकौ वा इयत् कर्णिक , पक्षे ठन् कर्णिक, मतुप् मत् च , कर्णवत् इत्यत्र कर्णवत् प्रमाणागटवोन्यदर्शं त्रि० । सर्वपि स्त्रियां ङीप् ।

कर्णी स्त्री कर्ण—इन् वा ङीप् । कर्णिसन्धाने बाणभेदे तद्विग्नपदे "चत क्षकशिक पुरुषमामात्रमात्कर्णीषु" पा० अत पर विसर्गस्य नित्य सः । अयसा निर्मिता कर्णी अयस्कर्णीत्यादि । २मूलदेवमातरि स्त्री कर्णीसुत ।

कर्णीमत् पु० कर्णिकाशल्यविशेषाकार फलेऽस्त्यस्य मतुप । स-ज्ञायां दीर्घ । चारम्यधे (सोंदाल) शब्दचि० ।

कर्णीरथ पु० कर्णः सामीप्येनास्त्यस्य कर्णी स्कन्धः तेन ई-शोभा यस्य न समासान्त इप् स चासौ रथो रथतुल्य वाहन कर्म० । स्कन्धवाह्ये याने (पालकी) इत्यादौ । शब्दचि०स्तु चन्ना व्युत्पत्तिर्दर्शिता यथा । कर्णः सामीप्यस्थिया उपचारात् सर्वं कर्णोऽस्यास्ति इनि । कर्णी चासौ र-थश्च । शब्दमात्रेण रथो न वस्तुतो रथ । यद्वा सामी-प्यात् कर्णशब्देन स्कन्धो लक्ष्यते सोऽस्यास्ति वाहनत्वेन इनि कर्णी चासौ रथश्च । उभयत्र चान्येषामपीति पा० दीर्घः इति" । "कर्णीरथस्थां रघुवीरपत्नीम्" रघु० ।

कर्णीसुत पु० ईत० । मूलदेवे त्रिका० हारा० च । स च कमासुर इति शब्दकल्पद्रुम तन्मूल मृग्य कसस्य क-र्णीमात्रकत्वाभावात् काद० टीकायासक्तेयशास्त्र-

कर्णेभ्रमूलदेवौ तथा च तु इत्यनेनक्त नाम । अमर "कर्णीसुतकनेन चौर्यक्रियाविद्याचमा" काद०व्या० 'कर्णीसुतः करटक स्तेयशास्त्रप्रवर्त्तकः । तस्य स्खातौ सहायौ हौ विपुलाचलसंज्ञको" टी० उज्ज्वल । "कर्णीसुतमतिरिते च पति भातेकारम्" दशकु० ।

कर्णेसुरसुरा स्त्री पात्रेसमिता० समास । (काण्फुस्नान) कर्णजपने । मुक्तादीर्घा० अस्यान्तुदात्तता । एवं कर्णे-टिरिटिरा अपि तदर्थे तथा अन्तुदात्तता च । शब्दर० ।

कर्णेन्दु पु० कर्णे इन्दुरिव । अर्धचन्द्राकृतिकर्णालङ्कारभेदे

कर्णोपकर्णिका स्त्री कर्णात् कर्णोपकर्णोऽस्त्यस्या ठन् अत इ-त्वम् । (का.गाकाणि) परम्परयाप्रचारे प्रवादे "प्रागेव कर्णोपकर्णिकया श्रुतापवादश्रुभितहृदय "पञ्चत० ।

कर्णोर्णि पु० कर्णे ऊर्णाधिक लोम यस्य । मृगभेदे । "कर्णो-र्णि-रामिर्मिर्युः इकनामिभिः" भाग० ४,६,१५,

कर्ण्य त्रि० कर्णे भवः शरीरावयवात् यत् । १कर्णभवे सना-दौ । कर्ण—कर्मणि यत् २भेद्ये च ।

कर्त्त शैथिल्ये शिथिलीकरणे चारम्भकसंयोगशिथिलताजनने अ०चु०उभ०सेट् । कर्त्तयति ते सतान्तरे कर्त्तापयति ते अचकर्त्तत्—त कर्त्तयाम्—बभूव आस चकार चक्रे । कर्त्त-यिता कर्त्तयीत् कर्त्तयिषीष्ट कर्त्तयिष्यति ते । कर्त्तनीय कर्त्तयितव्य । कर्त्तयिता कर्त्तित । कर्त्तन कर्त्तना । क-र्त्तयितुम् कर्त्तयित्वा आकर्त्त्य । कर्मणि कर्त्त्यते अकर्त्ति अकर्त्तयिषाताम्—अकर्त्तिषाताम् कर्त्तिता—कर्त्तयिता कर्त्तयिष्यते कर्त्तिष्यते—"एवाह एव दुर्भूत कर्त कथा दुर्लाह्नतम्" ऋ० १०,१, २० । 'अपि कर्त्तमवर्त्तयो ऽयज्वन्" ऋ० १,१२१,१३ ।

कर्त्त पु० कर्त्तयति शिथिलीकरोति कर्त्त—अच् । गर्त्ते "शाश्व कर्त्तादवपदो यजत्रा "यजु० २२ ५१,कर्त्तात् कूपात्" वेददी० । कृत—भावे घञ् ।२भेदे च । "कश्चपृच्छमि-यस्य यत्यो यमकर्त्तं देतिम्" भाग० २,७,४६,कृत—अच् । ३छेदके त्रि० । "एकस्य कर्त्तादवपदोयजत्रा" ऋ० २,१०, ६ । "ते यजत्रा अवपद चापद, कर्त्तात् कर्त्तु" भा० ।

कर्त्तन न० कृत—भावे ल्युट् ।छेदने । "गुल्मगुच्छलतातान-तालौषधिवीरुधाम् । पूर्वस्मृतादर्धं दण्ड स्थानेषूक्तेषु कर्त्तने" 'प्रातिलोम्ये वध ख च स्त्रीणां मास टिकर्त्त-नम्' याज्ञ० कर्त्त—ल्युट । २शिथिलीकरणे करणे ल्युट् । ३कर्त्तनसाधने त्रि० । स्त्रियां ङीप् कर्त्तनी । कृत—कर्त्तरि ल्यु । ४भेदकर्त्तरि त्रि० ।

चासकर्तृत्वमुक्तम् शा॰वि॰प॰ “प्राणदीयाभिकर्माणेति” चतुर्विंशत्ये पाठ। तेन स्वातन्त्र्यं कर्तृत्वम्। स च प्रका रान्तरेण त्रिविधः “त्रिधा मतो कर्त्ता विशेषेण क्रिया प्रति। योगलक्षणसिद्धत्वाद्विशेषपदशब्दतः” सहरि॰। कर्त्ता क्रियां प्रति प्रकारत्रयेण कर्त्ता विधावते तत्र त्रिविधम् “लाघवाभ्यागतेम्य” इत्यत्र योग तेन कर्तुर्निवृत्तिरिति, १। “चन्द्रदर्शनाद् दी क्षितो न ददाति” इत्यत्र प्रतिविधुत्वेन दीक्षितेन-ष्पत २। “स्वर्गकामो यजेत” इत्यत्र लिङ्गा पदान्तरेण स्वर्गकाम कर्त्ता भावनेन, ३। स च प्रकारा-न्तरेण त्रिविध शास्त्रविरादिभेदात् यथाह गीता “तत्रैवं सति कर्त्तारमात्मानं केवलं तु यः। विमुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः। सिद्ध्यसिद्ध्योर्निर्विकारः कर्त्ता सात्त्विक उच्यते। रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः। हर्षशोकान्वितः कर्त्ता राजसः परिकीर्त्तितः। अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः। विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते”। कर्त्तृपदस्य क्रियाश्रये स्वातन्त्र्ये वा शक्तिभेदेन रूढ नतु यौगिकमित्येतत् शब्दशि॰ प्रकाशिकाद्दर्शन प्रकाशे दर्शित यथा

“तत्र क्रियाश्रयत्वाविशेषेऽपि रथस्याश्रयत्वाभावात् कटाहरथौ करणत्वाधिकरणत्वात् कर्त्तृपदस्य कृत्याश्रयत्वबोधकत्वात् कर्मोपस्थापनेन, क्रियाश्रयत्वे रूढ, क्रियाश्रय कर्त्तृपदार्थ इत्याद्। तथा च कारकमात्रेऽतिप्रसङ्गः यत्र तत्रो यत्नार्थत्वे न चाख्यातविषयत्वात् तस्यापि यत्नोऽर्थः। तदुच्यते। “करणत्वविभागेन कर्त्तृरूपप्रख्यया। यत्नएव कृति पूर्वा परस्मिन् सैव भावना” वैयाकरणाख्यातार्थो भावनेति चेत्। बीजेनाङ्कुर कृत रथादिना कृत तत बीजमङ्कुर करोतीति यत्न विनापि व्यवहारात्” “कर्त्तृपदन्तु न यौगिक तथा हि कृञो यत्नार्थत्वे तिङ समर्थत्वे वा धातुप्रत्ययार्थयो कृतिरूपयोर्वा परस्परमन्वय कर्त्ता कृति-त्वावच्छिन्न तद्विषयत्वस्य चाऽभावात् कृतिविधिविशेष कृति-निराकाङ्क्षत्वादिति। यत्र तत्र क्रियार्थे तत्र क्रिया श्रयवाचकत्वे तयो परस्परमन्वय एवेति उभयदर्शने क र्त्तृपद कर्मादिपदवद्रूढमेव। रूढिश्च कृत्याश्रये क्रियाश्रये चेत्यप्येतत् तथा च कारकविभागेन च कर्त्तृरूपप्रख्यया च न कृञो यत्नार्थत्वमिति क्रियाख्यातस्य करोतेश्च न यत्नार्थत्वम् पाकाय यतते पाक करोतीत्यादौ यत्नद्वयस्य यत्नविषयकयत्नस्य चाननुभवेन प्रतीतिमत्त्वयार्थयोश्च सा-न्वेनान्वयानुपपत्ते नौभङ्गत्वात् एकत्र च विधिरूपा दर्शनात्” इत्यादिकम् भट्टमतम्। मन्यते तु कृञ्र यत्नार्थत्वमिति भेद तच्च लघुशब्दे दर्शयिष्यते। शब्द॰प्र॰कर्त्तृपद यौगिकमिति व्याख्याय तत्प्रकाशिका यथा

“तिङा विकरणाक्तस्य धातोरर्थस्तु वाच्यते। स्वार्थ दास्यपि बोधकत्वात्कर्त्तृत्व तदिहोच्यते। यद्विकरणेन यद्धातूपस्थाप्योऽद्यतनादि मध्ये लकारतिङा स्वोपस्थाप्यया-श्रयार्थोऽनुभाव्यते शब्दप्रमाणान्तरानाश्रयत्व तत्त तदेव कर्त्तृत्व कारकशब्दार्थ। कर्मणादौ धातूपस्थाप्यो ऽर्थ तिङानुभाव्योऽपि न विकरणाक्तेनेति न तत्र प्रस-ङ्ग। पचति जानातीत्यादौ स्वोपस्थाप्यफलाश्रयत्वादौ धातूपस्थाप्यस्य पाकद्वयादेरत्यन्त पचाद्युत्तरतिङा बोध्य-त्वइति पाकस्य यत्नस्य, ज्ञानस्याश्रयत्वमेव सम्प्रतीत्यत्र शायस्य प्रतियोगित्व प्रतिबिम्बतरूपत्व भ्रमात्मन प्रति-बिम्बस्य प्रकारत्वमेव कर्त्तृत्वम्। कर्त्तृशब्दस्तु व्युत्पत्तिरूपे कृत्याश्रये यौगिकएव न तु शक्त्यार्थक प्रकारान्तराश्रय-स्यैव प्रयत्नात् निरूढलक्षणया शब्दैव वाच्यत्वस्य तथा प्रत्ययात्। घटस्य कर्त्तृत्वादौ धातुकृतत्व घटार्थ फलस्य साधन तत्तद्विषयत्वात् घटाद्युपभोगानुकूलकृतिश्च न घटाद्युपभोगे प्रमाणाभावात् प्रतीतेन घटादिभोक्तृत्वक र्त्तृत्वप्रसङ्ग। क्रियाश्रये कर्त्तृशब्दोऽरूढत्वेन रथादेर्गत्या-दिकर्त्तृत्वमपि उपपन्नमेवेति तु न युक्तम्। किया हि भाव शब्देन नमस्य पाककर्त्तृत्वानुपपत्ते सत्युत तण्डुलादेरेव तथात्वापत्ते नापि धात्वर्थमात्रम् यतएव नापि स्पन्द-नानुकूलव्यापार पचनानुकूलव्यापारवत कारकमात्रस्य पचनकर्त्तृत्वापत्ते। अपि जुहोतीत्यादावग्न्यादेरुत्तर तु प्रसैव विकारस्य प्रतिष्ठाने सोमनकर्त्तृत्वादेरश्वगमनदृति। तदप्रतिसन्धानेऽपीति मतेनाह। यदनन्तभिन्नधात्वर्थवत्तया योऽनुभाव्यते। स्वार्थ स धात्वर्थ कर्त्तृता वा निग द्यते। यदनन्तभिन्नधातूपस्थाप्ययादृशार्थ प्रकारपदार्थ धर्मि-कान्वयबोध प्रति लट सामर्थ्य स एवार्थो धातूपस्थाप्य तदर्थस्य कर्त्तृत्वम् पच्यत इत्यादौ धातोरर्थवत्तया स्वार्थ कर्मत्व लडानुभाव्यमपि न यगन्तभिन्नस्य, पच्यते तण्डुल इत्यादौ तु तादृशस्य धातोरर्थवत्तया तिङैव स्वार्थ कर्मत्वमनुभाव्यते न तद्विशेषेण लडेति तदङ्कुराद। यथा दामत्वादिभेदेन षड्विधत्वमित्यत्रानुक्तत्वभेदेन कारकस्य द्वैविध्यमप्यस्तीति तदनुरूपा न्यूनतामत आह। धात्वर्थस्य

[illegible]

चैतन्यं कर्त्तृत्वे भिन्नाधिकरणे युक्तिसिद्धे तथाप्यभ्रान्तिरियमित्यर्थः। लिङ्गं महदादिसूक्ष्मपर्यन्तं यत् स्याति भ्रान्तिबीजं तत्संयोगस्तन्निदानम् अतिरोहितार्थमन्यत्” कौ०। तदेतन्मतम् शास्त्र मुक्तावस्था निराकृतं यथा “एतेन प्रकृतिः कर्त्री पुरुषः पुष्करपलाशवन्निर्लेपः किन्तु चेतनः कार्य्यकारणयोरभेदात् कार्य्यनाशे कार्य्यरूपतया नाश स्यादित्यकारणत्वं तस्य बुद्धिगतचैतन्याभिमानार्थानुपपत्त्या तद्रूपकल्पनम्। बुद्धिश्च प्रकृतेः प्रथमः परिणामः। सैव महत्तत्त्वमन्तःकरणमप्युच्यते। तत्सत्त्वात्सत्त्वाभ्यां पुरुषस्य सम्बन्धरूपोपरागः। तथा एवेन्द्रियप्रणालिकया परिणतिर्ज्ञानरूपा घटादिना सम्बन्धः। पुरुषे कर्त्तृत्वाभिमानो बुद्धौ चैतन्याभिमानश्च भेदाग्रहात्। ममेदं कर्त्तव्यमिति मदंश पुरुषोपरागो बुद्धेः स्वच्छतया चेतनप्रतिबिम्बादतात्त्विको दर्पणस्येव मुखोपरागः। इदमिति विषयोपराग इन्द्रियप्रणालिकया परिणतिभेदस्तात्त्विको निश्वासाभिहतदर्पणस्येव मलिनिमा। कर्त्तव्यमिति व्यापारावेशः। तेनांशत्रयवती बुद्धिस्तत्परिणामेन ज्ञानेन पुरुषस्यातात्त्विकः सम्बन्धोदर्पणमलिनिम्नेव मुखस्योपलब्धिरुच्यते। ज्ञानादिवत् सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मा अपि बुद्धेरेव ज्ञानसामानाधिकरण्येन प्रतीतेः। न च बुद्धिश्चेतना परिणामित्वादिति सांख्यमतमपास्तम् कृत्यदृष्टभोगानामिव चैतन्यस्यापि सामानाधिकरण्यप्रतीतेस्तद्भिन्ने मानाभावाच्चेतनोऽहं करोमीति प्रतीतेः। बुद्धेः परिणामित्वाच्चैतन्याश्रयत्वं न इति चेत् तत्त्वं शे किं नेष्यते। अन्यथा बुद्धेर्नित्यत्वे तत्पूर्व्वमसंसारापत्तिः। अचेतनायाः प्रकृतेः कार्य्यत्वात् बुद्धेरचैतन्यं कार्य्यकारणयोस्तादात्म्यादिति चेन्न असिद्धेः कर्त्तुर्जन्यत्वे मानाभावात् वीतरागजन्मादर्शनादनादित्वम्। अनादेर्नाशासम्भवान्नित्यत्वम्” मुक्ता०। वेदान्तिमते आविद्यिकजीवस्यैवौपाधिक कर्त्तृत्वं शा०सू० भा० व्यवस्थापितम् यथा।

“कर्त्ता शास्त्रार्थवत्त्वात्”। तद्गुणसारत्वाधिकारेणैवापरोऽपि जीवधर्म्मः प्रपञ्च्यते। कर्त्ता चायं जीवः स्यात् कस्मात् शास्त्रार्थवत्त्वात् एवञ्च यजेत जुहुयात् दद्यादित्येवंविधं विधिशास्त्रमर्थवद्भवति अन्यथा तदनर्थकं स्यात्। तद्धि कर्त्तुः सतः कर्त्तव्यविशेषमुपदिशति न चासति कर्त्तृत्वे तदुपपद्यते। तथेदमपि शास्त्रमेवमर्थवद्भवति “एष हि द्रष्टा श्रोता मन्ता बोद्धा कर्त्ता विज्ञानात्मा पुरुष” इति भा०। ‘विहारोपदेशात्’ सू०। “इतश्च जीवस्य कर्त्तृत्वं यज्जीवप्रक्रियायां सन्ध्ये स्थाने विहारमुपदिशति “स ईयतेऽमृतो यत्र कामम्” इति “स्वे शरीरे यथाकामं परिवर्त्तते” इति च भा०। “उपादानात्” सू०। “इतश्चास्य कर्त्तृत्वं यज्जीवप्रक्रियायामेव करणानामुपादानं सङ्कीर्त्तयति। “तदेषां प्राणानां विज्ञानेन विज्ञानमादायेति”। “प्राणान् गृहीत्वेति च” भा०। “व्यपदेशाच्च क्रियायां न चेन्निर्द्देशविपर्य्ययः” सू०। “इतश्च जीवस्य कर्त्तृत्वं यदस्य लौकिकीषु वैदिकीषु च क्रियासु कर्त्तृत्वं व्यपदिश्यते ‘विज्ञानं यज्ञं तनुते कर्म्माणि तनुतेऽपि चेति”। ननु विज्ञानशब्दो बुद्धौ समधिगतः कथमनेन जीवस्य कर्त्तृत्वं सूच्यतेति नेत्युच्यते जीवस्यैवैष निर्द्देशो न बुद्धेः न चेज्जीवस्य स्यात् निर्द्देशविपर्य्ययः स्यात् विज्ञानेनेत्येवं निरदेक्ष्यत्। तथा ह्यन्यत्र बुद्धिविवक्षायां विज्ञानशब्दस्य करणविभक्तिनिर्द्देशो दृश्यते “तदेषां प्राणानां विज्ञानेन विज्ञानमादायेति”। इह तु “विज्ञानं यज्ञं तनुत” इति कर्त्तृसमानाधिकरण्यनिर्द्देशात् बुद्धिव्यतिरिक्तस्यैवात्मनः कर्त्तृत्वं सूच्यत इत्यदोषः। अत्राह यदि बुद्धिव्यतिरिक्तो जीवः कर्त्ता स्यात् स स्वतन्त्रः सन् प्रियं हितं चैवात्मनो नियमेन सम्पादयेत् न विपरीतं, विपरीतमपि तु सम्पादयन्नुपलभ्यते। न च स्वतन्त्रस्यात्मन ईदृशी प्रवृत्तिरनियमेनोपपद्यते इति अत उत्तरं पठति” भा०। “उपलब्धिवदनियमः” सू०। यथायमात्मोपलब्धिं प्रति स्वतन्त्रोऽप्यनियमेनेष्टमनिष्टञ्च उपलभते एवमनियमेनैवेष्टमनिष्टञ्च सम्पादयिष्यति। उपलब्धावप्यस्वातन्त्र्यमुपलब्धिहेतूपादानोपलम्भादिति चेन्न विषयविकल्पनमात्रप्रयोजनत्वादुपलब्धिहेतूनाम् उपलब्धौ त्वनन्यापेक्षत्वमात्मनः चैतन्ययोगात्। अपि चार्थक्रियायामपि नात्यन्तमात्मनः स्वातन्त्र्यमस्ति देशकालनिमित्तविशेषापेक्षत्वात्। न च सहायापेक्षस्य कर्त्तुः कर्त्तृत्वं निवर्त्तते। भवति ह्येधोदकाद्यपेक्षस्यापि पक्तुः पक्तृत्वम्। सहकारिवैचित्र्याच्चेष्टानिष्टार्थक्रियायामनियमेन प्रवृत्तिरात्मनो न विरुध्यते” भा०। “शक्तिविपर्य्ययात्” सू०। “इतश्च विज्ञानव्यतिरिक्तो जीवः कर्त्ता भवितुमर्हति। यदि पुनर्विज्ञानशब्दवाच्या बुद्धिरेव कर्त्री स्यात्ततः शक्तिविपर्य्ययः स्यात् करणशक्तिर्बुद्धेर्हीयेत कर्त्तृशक्तिश्चापद्येत। सत्याञ्च बुद्धेः कर्त्तृशक्तौ तस्या एवाहंप्रत्ययविषयत्वमभ्युपगन्तव्यम् अहङ्कारपूर्व्विकायाः सर्व्वत्र प्रवृत्तेः सर्व्वत्र दर्शनात् अहं गच्छाम्यहं भुञ्जेऽहं

स्वप्नमात्मन परपशिरमध्यमस्ति "यथो' स्वशरीरेण धीकमतिकामतीति" तदापि धीरस्य चम्ययात् । तथा च स्मरन्ति 'इन्द्रियाणामरसे समोऽस्तु यदि । शेरते विषदाने तद्विद्यात् धर्मदर्शनमिति" । कामाद यत्र मनसोरमाय इति श्रुति तात्र मात्रे इमा ते समाप्ता-यमना एव स्वप्ने विहरति । विहारोऽपि नयनोपासनमाय एव न दारमाति सोऽस्ति । तथा च श्रुतिविकाराद्युपामेत स्वव्यापार वर्धयति 'उतेव स्त्रीभि सह मोदमानो यमइतवापि भयानि पश्यन्निति' । संकल्पादपि तदेव मायान्न स्वप्नान्ति(याहत्यादि गिरिमद्रम्)प्रदीपानि वक्ष-दालिनिति । तथोपादाने यद्यपि करणेषु कर्तृकरणं यथा निर्देशदापि तनुम गुरुर्दाताम: कर्त्तृ त्व इत्य शेषे-कर्तृत्वादायन दर्शितत्वात् । भवति च योऽनेकप्रका-रा विधया (योऽधागुध्यते) (योधै रागायुध्यते) इति च । अपि चाविन्यादाने करणस्य व्यापारोपरमणात् सि-ध्यते न मातनन्त, मर्थानत्, चावद्भिर्मृदर्शापि स्वामि-करणव्यापारोपरमस्य दर्शनात् । अन्यत्र व्यपदेशो दर्शित "विज्ञानं यज्ञं तनुते" इति च बुद्धेरेव कर्तृत्व मापयति विज्ञानशब्दस्य तन्न, प्रसिद्धत्वात् मनोऽनन्तर पाठाच्च "तस्य श्रद्धैव शिर" इति विज्ञानमयस्यात्म महादावयवत्व कीर्तनात् श्रद्धादीनां च बुद्धिधर्मत्वप्रसिद्धेः "विज्ञानं देवाः सर्वे ब्रह्म ज्येष्ठमुपासते" इति च वाक्य शेषात् ज्येष्ठत्वस्य बुद्धौ प्रसिद्धत्वात् "स एष वाचश्चित्त-स्योत्तरोत्तरक्रमो यद्यज्ञ" इति च श्रुत्यन्तरे यज्ञस्य वाग्बुद्धि साध्यत्वावधारणात् । न च बुद्धे शक्तिविपर्ययः करणानां कर्तृत्वाभ्युपगमे भवति सर्वकारकाणामेव स्वव्यापारेषु कर्तृत्वस्यावश्यं भावित्वात् । उपलब्ध्यपेक्ष स्त्वेषां करणत्व सा चात्मनः । न च तस्यामप्यस्य कर्तृ-त्वमस्ति नित्योपलब्धिस्वरूपत्वात् । अहङ्कारपूर्वकमपि कर्तृत्व नोपलब्धुर्भवितुमर्हति अहङ्कारस्याप्युपलभ्य-त्वात् । न चैव सति करणान्तरकल्पनाप्रसङ्गः बुद्धे करणत्वाभ्युपगमात् । समाध्यभावस्तु शास्त्रार्थवत्त्वेनैव परिहृत । यथाप्राप्तमेव कर्तृत्वमुपादाय समाधिविधा-नात् । तस्मात् कर्तृत्वमप्यात्मन उपाधिनिबन्धनमेवे-त्यितम्"भा०।"अहङ्कारविमूढात्मा कर्ताहमिति मन्यते" इति गीतया कर्तृत्वस्याहङ्काराधीनतयौपाधिकत्व स्वचितमिति द्रष्टव्यम्"।

कर्मबन्ध न० कर्मणा बन्धः शरीरसम्बन्धः । १कर्मजन्यादृष्टेना पूर्वदेहस्य बन्धरूपे संसारे "कर्मबन्धं प्रहास्यसि" गीता कर्मबन्धनमप्यत्र । कर्म बन्धनं बन्धसाधनं यस्य । कर्मरूपबन्धनसाधनयुक्ते त्रि० । "लोकोऽयं कर्मबन्धनः" गीता । [जन्यसुखदुःखादेर्भोगे तत्साक्षात्कारे ।

कर्मभोग पु० कर्मणः कर्मजन्यसुखदुःखादेर्भोगः । कर्म-

कर्मभू स्त्री कर्मणः कृषिकर्मणो भूः । १कृष्टभूमौ (चसाजमि) हेमच० २भारतवर्षे च । [दीर्घम् तस्यात्तस्य तथात्वम् ।

कर्ममूल न० कर्मणोमूलमिव मूलमस्य । कुशदर्भे शब्दच० ।

कर्ममीमांसा स्त्री ६त० । कर्माङ्गवेदवाक्यमवलम्ब्य संशय-पूर्व्वपक्षसिद्धान्तनिर्णयात्मके कर्मविषयके विचारशास्त्रभेदे सा च "अथातो धर्मजिज्ञासा" इत्यादिका जैमिनिप्रणीता

कर्मयुग न० क०—हिंसायाम् आधारे कलियुगे कर्मधा० । कलि-युगे शिक्षा० तस्य हिंसाप्रधानकर्माधारत्वात् तथात्वम् ।

कर्मयोग पु० कर्मसु योगः कौशलम् । फलसाधनस्यापि कर्मणोऽफलसाधनत्वापादानरूपे १कौशलभेदे २फलसिद्ध्य-सिद्ध्योः समत्वभावने च । यथा च तत्कौशलं तथा भावनं च फलं च तथा गीतायां नानास्थानेषु दर्शितं यथा "एषा तेऽभिहिता साङ्ख्ये बुद्धिर्योगे त्विमां शृणु । बुद्ध्या युक्तो यया पार्थ ! कर्मबन्धं प्रहास्यसि । नेहाभि-क्रमनाशोऽस्ति प्रत्यवायो न विद्यते । स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् । व्यवसायात्मिका बुद्धिरेकेह कुरु-नन्दन ! । बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम् । यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः । वेदवा-दरताः पार्थ ! नान्यदस्तीतिवादिनः । कामात्मानः स्वर्ग-परा जन्मकर्मफलप्रदाम् । क्रियाविशेषबहुलां भोगैश्व-र्य्यगतिं प्रति । भोगैश्वर्य्यप्रसक्तानां तयापहृतचेतसाम् । व्यवसायात्मिका बुद्धिः समाधौ न विधीयते । त्रैगुण्य-विषया वेदा निस्त्रैगुण्यो भवार्जुन ! । निर्द्वन्द्वो नित्यसत्त्वस्थो-निर्योगक्षेम आत्मवान् । यावानर्थ उदपाने सर्वतः स-म्प्लुतोदके । तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजा-नतः । कर्मण्येवाधिकारस्ते मा फलेषु कदाचन । मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि । योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय ! । सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते । दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जय ! । बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः । बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते । तस्माद् योगाय युज्यस्व योगः कर्मसु कौशलम् । कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः । जन्मबन्धवि-निर्मुक्ताः पदं गच्छन्त्यनामयम्" ।

अधिकारिभेदेन कर्मयोगस्यानुष्ठानप्रकारमाह गीता "लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ ! । ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम् । न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते । न च संन्यस-नादेव सिद्धिं समधिगच्छति । न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत् । कार्य्यते ह्यवशः कर्म सर्वः प्रकृतिजै-र्गुणैः । कर्मेन्द्रियाणि संयम्य य आस्ते मनसा

युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम् । अयुक्तः कामकारेण फले सक्तो निबध्यते । सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी । नवद्वारे पुरे देही नैव कुर्वन्न कारयन् । न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः । न कर्मफलसंयोगं स्वभावस्तु प्रवर्त्तते" । एवं गीतायां नानास्थानेषु फलाभिसन्धित्यागेनैव कर्मणां परम्परया मोक्षसाधनत्वमुक्तमनुपद वक्ष्यमाण पात० भाष्ये चेश्वरार्पणबुद्ध्यानुष्ठीयमानानां योगसाधनत्वोक्तेश्च मुमुक्षुणा उक्तयाभ्यसरीत्यैव कर्म करणीयमिति स्थितम् । कर्म्म क्रियैव योगो योगसाधनम् । तप स्वाध्यायेश्वर-प्रणिधानादिरूपे क्रियात्मके २योगसाधने । यथा च तप आदीनां योगसाधनत्वं तथा साधनपादे पातञ्जल सूत्रभाष्यविवरणेषूक्तं यथा—

"तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः" सू० । "उद्दिष्टः समाहितचित्तस्य योगः, कथं व्युत्थितचित्तोऽपि योगयुक्तः स्यादित्येतदारभ्यते । नातपस्विनो योगः सिध्यति अनादिकर्म्मक्लेशवासनाचित्रा प्रत्युपस्थितविषयजाला चाशुद्धिर्नान्तरेण तपः सम्भेदमापद्यते इति तपस उपादानं तच्च चित्तप्रसादनमबाधमानमनेनासेव्यमिति मन्यते, स्वाध्यायः प्रणवादिपवित्राणां जपो मोक्षशास्त्राध्ययनं वा । ईश्वरप्रणिधानं सर्वक्रियाणां परमगुरावर्पणं तत्फलसंन्यासो वा" भा० । "उद्दिष्ट इति । अभ्यासवैराग्ये हि योगोपायो प्रथमे पादे उक्तौ, न च तौ व्युत्थितचित्तस्य झगित्येव सम्भवत इति द्वितीयपादोपदेश्यमुपायमपेक्षते सत्त्वशुद्ध्यर्थं, ततो हि विशुद्धसत्त्व कृतरक्षाविधानोऽभ्यासवैराग्ये प्रत्यहं भावयति । समाहितस्यमविक्षिप्तस्य, कथं व्युत्थानचित्तोऽप्युपदेक्ष्यमाणैरुपायैर्युक्तः सन् योगी स्यादित्यर्थः । तत्र वक्ष्यमाणेषु नियमेषु आत्मनः प्राथमिकं प्रत्युपयुक्ततरतया प्रथमतः क्रियायोगमुपदिशति सूत्रकारः । तप स्वाध्यायेत्यादि, क्रियैव योगः क्रियायोगो योगसाधनत्वात् । अतएव विष्णुपुराणे खाण्डिक्यकेशिध्वजसंवादे । 'योगयुक् प्रथमं योगी युञ्जानोऽभिधीयते" इत्युपक्रम्य तत्र "स्वाध्यायादयो" दर्शिता । व्यतिरेकमुखेन तपस उपायत्वमाह । नातपस्विन इति तपसोऽवान्तरव्यापारमुपायतोपयोगिनं दर्शयति अना दीति । अनादिभ्यां कर्मक्लेशवासनाभ्यां चित्रा अतएव प्रत्युपस्थितरूपमत विषयजालं यस्या सा तथोक्ता । अशुद्धिरजस्तमसी सत्त्वस्य नान्तरेण तपः सम्भेदमापद्यते सान्द्रस्य नितान्तविरलता सम्भेद, ननु धातुवैषम्यहेतुतया योगप्रतिपक्ष इति कथं तदुपाय इति अत आह—तच्चेति, तावन्मात्रमेव तपश्चरणीयं न यावता धातुवैषम्यमापद्यत इत्यर्थः । प्रणवादय पुरुषसूक्तरुद्रमण्डलब्राह्मणादयो वैदिकाः, पौराणिकाश्च मन्त्राः, परमगुरुर्भगवानीश्वरस्तस्मिन्, यदेदमुक्तम्— "कामतोऽकामतो वापि यत् करोमि शुभाशुभम् । तत् सर्वं त्वयि संन्यस्तं त्वत्प्रयुक्तः करोम्यहम्" इति "तत्फलसंन्यासो वा" फलानभिसन्धानेन कार्य्यकरणम् । यदेदमुक्तम् "कर्म्मण्येवाधिकारस्ते मा फलेषु कदाचन । मा कर्म्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्म्मणि" (गीता) विव०

"स हि क्रियायोगः" भा० "समाधिभावनार्थः क्लेशतनूकरणार्थश्च" सू० "स हि आसेव्यमानः समाधिं भावयति, क्लेशांश्च प्रतनूकरोति, प्रतनूकृतान् क्लेशान् प्रसंख्यानाग्निना दग्धबीजकल्पानप्रसवधर्म्मिणः करिष्यतीति तेषां तनूकरणात् पुनः क्लेशैरपरामृष्टा सत्त्वपुरुषान्यतामात्रख्यातिः सूक्ष्मा प्रज्ञा समाप्ताधिकारा प्रतिप्रसवाय कल्पिष्यते इति" भा० । "तस्य प्रयोजनाभिधानाय सूत्रमवतारयति स हीति" ननु क्रियायोग एव चेत् क्लेशान् प्रतनूकरोति कृतं तर्हि प्रसंख्यानेनेत्यत आह प्रतनूकृतानिति क्रियायोगस्य प्रतनूकरणमात्रे व्यापारो न तु बन्ध्यत्वे क्लेशानां, प्रसंख्यानस्य तु तद्बन्ध्यत्वे, दग्धबीजकल्पानिति बन्ध्यत्वेन दग्धकल्पबीजसाधर्म्यमुक्तम् स्यादेतत् प्रसंख्यानमेव चेत् क्लेशान् अप्रसवधर्म्मिणः करिष्यति कृतमेषां प्रतनूकरणेनेत्यत आह तेषामिति । क्लेशानामतनुत्वे हि बलवद्विरोधिपक्षा सत्त्वपुरुषान्यताख्यातिरुदेतुमेव नोत्सहते किम् प्रागेव तद्बन्ध्यभावं कर्त्तुम्, प्रतनूकृतेषु तु दुर्बलेषु तद्विरोधिन्यपि वैराग्याभ्यासाभ्यासुपजायते उपजाता च तैरपरामृष्टा अनभिभूता सैव यावत् परामृश्यते सत्त्वपुरुषान्यतामात्रख्यातिरूपप्रज्ञायन्त्रिततया सूक्ष्मोऽस्या विषय इति सूक्ष्मा प्रज्ञा प्रतिप्रसवाय प्रविलयाय कल्प्यते, कुत ? समाप्तोऽधिकारः कार्य्यारम्भणं गुणानां यया हेतुभूतया सा तथोक्तेति" विव० । क्रियायोगोऽप्यत्र ।

कार्म्मरङ्ग पुन० कर्म्मणे क्रियायै रज्यते रन्ज—घञ् अश्वघासादिवत् निमित्तार्थे ६त० । (कामराङ्गा) १फिरालफलके वृक्षे 'भट्ठ' श० २तत्फले न० तद्गुणा भाव० उक्ता "कर्म्मरङ्गं हिमं ग्राहि स्वाद्वम्लं कफवातकृत्" कफवात-

[illegible] इति [illegible] ।

कर्म्मपुरी स्त्री [illegible] ।

कर्म्मभाज् [illegible] ।

कर्म्मवाटी स्त्री कर्म्मणां तिथिकर्म्मणां [illegible] इति हेमचन्द्रः । [illegible] ।

कर्म्मविपाक इ [illegible]

[illegible]

चित्रीकृतमिव सर्वतोमत्स्यजालग्रन्थिभिरिवाततम् इत्येता अनेकभवपूर्व्विका वासना । यस्त्वयं कर्म्माशय एष एकैकभविक उक्त इति । ये संस्काराः स्मृतिहेतवस्ता वासना ताश्चानादिकालीना इति यस्त्वसावेकभविकः कर्म्माशयः स नियतविपाकश्चानियतविपाकश्च तत्र दृष्टजन्मवेदनीयस्य नियतविपाकस्यैवायं नियमो नत्वदृष्टजन्मवेदनीयस्यानियतविपाकस्य, कस्मात् ? योह्यदृष्टजन्मवेदनीयोऽनियतविपाकस्तस्य त्रयी गतिः —कृतस्याविपक्वस्य नाशः १ प्रधानकर्म्मण्यावापगमनं २ वा नियतविपाकप्रधानकर्म्मणाभिभूतस्य वा चिरमवस्थानमिति ३ । तत्र कृतस्याविपक्वस्य नाशो यथा शुक्लकर्म्मोदयादिहैव नाशः कृष्णस्य, यत्रेदमुक्तम् "द्वे द्वे ह वै कर्म्मणी वेदितव्ये पापकस्यैको राशिः पुण्यकृतोऽपहन्ति तदिच्छस्व कर्म्माणि सुकृतानि कर्त्तुमिहैव कर्म्म कवयो वेदयन्ते" प्रधानकर्म्मण्यावापगमनं २ यत्रेदमुक्तम् "स्यात् स्वल्पः सङ्करः सपरिहारः सप्रत्यवमर्षः कुशलस्य नापकर्षायालम्" कस्मात् ? कुशलं हि मे बह्वन्यदस्ति यत्रायमावापङ्गतः स्वर्गेऽप्यपकर्षमल्पं करिष्यतीति । नियतविपाकप्रधानकर्म्मणाभिभूतस्य वा चिरमवस्थानम् ३ कथमिति ? दृष्टजन्मवेदनीयस्यैव नियतविपाकस्य कर्म्मणः समानं मरणमभिव्यक्तिकारणमुक्तं न त्वदृष्टजन्मवेदनीयस्यानियतविपाकस्य, यत्त्वदृष्टजन्मवेदनीयं कर्म्मानियतविपाकं तन्नश्येत् आवापं वा गच्छेत् अभिभूतं वा चिरमप्युपासीत यावत् समानं कर्म्माभिव्यञ्जकं निमित्तमस्य विपाकाभिमुखं करोतीति तद्विपाकस्यैव देशकालनिमित्तानवधारणादियं कर्म्मगतिश्चित्रा दुर्व्विज्ञाना चेति, नचोत्सर्गस्यापवादात् निवृत्तिरित्येकभविकः कर्म्माशयोऽनुज्ञायत इति" भा० ।

"स्यादेतदविद्यामूलत्वे कर्म्माशयो विद्योत्पादे सत्यविद्याविनाशात् मा नाम तस्य कर्म्माशयान्तरं जैषीत्, प्राक्तनकर्म्माशयानामनादिभवपरम्परासञ्चितानामसंख्यातानामनियतविपाककालानां भोगेन क्षपयितुमशक्यत्वादुच्छेदः संसारस्यास्यादित्यत आह सतीति । एतदुक्तं भवति सुखदुःखफलो हि कर्म्माशयस्तादर्थ्येन तदान्तरीयकतया जन्मायुषी अपि प्रसूते सुखदुःखे च रागद्वेषानुषक्ते तदविनिर्भागवर्त्तिनी तदभावे न भवतः, न ह्यस्ति सम्भवो, न च तत्र यत्र दुष्यति नोद्विजते वा, न च तस्य सुखं दुःखं चेति । तदियमात्मभूमिः क्लेशसलिलावसिक्ता कर्म्मफलप्रसवक्षेत्रमिति क्लेशानां क्षयोपशमनेऽपि कर्म्माशयसहकारितेति क्लेशसमुच्छेदे सहकारिवैकल्यात् सन्नप्यनन्तोऽप्यनियतविपाककालोऽपि प्रसंख्यानदग्धबीजभावो न फलाय कल्पत इति । तमिममर्थं भाष्यमेव द्योतयति सत्स्विति । अत्रैव दृष्टान्तमाह—यथा तुषेति । सतुषा अपि दग्धबीजभावाः स्वेदादिभिः । दार्ष्टान्तिके योजयति तथेति । ननु न क्लेशाः शक्या अपनेतुं, न हि सतामपनय इत्यत आह न प्रसंख्यानदग्धक्लेशबीजभाव इति । विपाकस्य त्रैविध्यमाह स चेति । विपच्यते साध्यते कर्म्मभिरिति विपाकः । कर्म्मैकत्वं ध्रुवं कृत्वा जन्मैकत्वानेकत्वगोचरा प्रथमा विचारणा, द्वितीया तु कर्म्मानेकत्वं ध्रुवं कृत्वा जन्मैकत्वानेकत्वगोचरा । तदेवं चत्वारो विकल्पाः—तत्र प्रथमं विकल्पमपाकरोति—न तावदेकं कर्म्मैकस्य जन्मनः कारणम्१ । पृच्छति कस्मादिति । उत्तरम् अनादिकाले एकैकजन्मसञ्चितस्य अत एव असंख्येयस्य एकैकजन्मोपचितादेकैकस्मात् कर्म्मणोऽवशिष्टस्य कर्म्मणः साम्प्रतिकस्य च फलक्रमानियमादनाश्वासो लोकस्य प्रसक्तः स चानिष्ट इति । एतदुक्तं भवति कर्म्मचयस्य विरलत्वात् तदुत्पत्तिप्रायस्याश्चान्योन्यसमीहिताश्च कर्म्माशया निरन्तरोत्पत्तयो निरुच्छ्वासाः स्वविपाकं प्रतीति न फलक्रमः शक्योऽवधारयितुमेवापतेत् नाश्वासो पुण्यानुष्ठानं प्रति प्रसक्त इति । द्वितीयं विकल्पं निराकरोति न च एकं कर्म्मानेकस्य जन्मनः कारणम्२ । पृच्छति कस्मादिति । उत्तरम् अनेकेषु जन्मसु व्याहितमेकमेव कर्म्मानेकस्य जन्मलक्षणस्य विपाकस्य निमित्तमित्यवशिष्टस्य विपाककालाभावः प्रसक्तः स चाप्यनिष्ट इति कर्म्मवैफल्येन तदनुष्ठानाभावप्रसङ्गात् । यदैकजन्मसमुच्छेद्ये कर्म्मण्येकस्मिन् फलक्रमानियमादनाश्वासस्तदा कैव कथा बहुजन्मसमुच्छेद्ये कर्म्मण्येकस्मिन् ? तत्र ह्यवसराभावात् विपाककालाभाव एव साम्प्रतिकस्येति भावः । तृतीयं विकल्पं निराकरोति—न चानेकं कर्म्मानेकस्य जन्मनः कारणम्३ । अत्र हेतुमाह तदनेकं जन्म युगपन्न सम्भवत्योगिन इति क्रमेण वाच्यं यदि हि कर्म्मसहस्रं युगपज्जन्मसहस्रं प्रसुवीत तत एव कर्म्मसहस्रक्षयादवशिष्टस्य विपाककालो फलक्रमे नियमश्च न स्यात् नास्ति जन्मनां यौगपद्यम्, एवमेव प्रथमपक्षे यथोक्तदूषणमित्यर्थः । तदेवं पक्षत्रये निराकृते पारिशेष्यादनेकं कर्म्मैकस्य जन्मनः कारणमिति४ पक्षोऽवशिष्यते तथाञ्ज-

यस्य नेह प्राधान्यमभिमतं मरणक्रियाया म्लोयस्तस्य नियतविपाकस्यैवान्यदा मदकार्यत्वात्, अनियतविपाकस्य च दुर्बलत्वमन्यदा वाधकागमत्वात्, चिरमवस्थानं बीजभावमात्रेण, न पुनः प्रधानोपकारितया, तस्य स्वतन्त्रत्वात् । ननु प्रायणेनैकदैव कर्माशयोऽभिव्यज्यत इत्युक्तमिदानीञ्च चिरावस्थानमुच्यते, तत् कथं ? पर पूर्वेण न विरुध्यत इत्याशयवान् पृच्छति कथमिति । उत्तरम् अदृष्टेति । जात्यभिप्रायमेकवचनम् । तदितरस्य गतासुतामवधारयति यस्त्वदृष्टेति । शेषं सुगमम्" विव० ।

"ते ह्लादपरितापफलाः पुण्यापुण्यहेतुत्वात्" सू० ।

"ते जन्मायुर्भोगाः पुण्यहेतुकाः सुखफलाः, अपुण्यहेतुका दुःखफला इति यथा चेदं दुःखं प्रतिकूलात्मकम् एवं विषयसुखकालेऽपि दुःखमस्त्येव प्रतिकूलात्मकं योगिनः" भा० ।

"उक्तम् क्लेशमूलत्वं कर्मणः, कर्ममूलत्वञ्च विपाकानाम् । अथ विपाकाः कस्य मूलम् ? येनामी त्यक्तव्या इत्याह ते इत्यादि । व्याचष्टे—ते जन्मायुर्भोगा इति । यद्यपि जन्मायुषोरेव ह्लादपरितापपूर्वभावितया तत्फलत्वं न तु भोगस्य ह्लादपरितापोदयानन्तरभाविनस्तदनुभवात्मनः, तथाप्यनुभाव्यतया भोग्यतया भोगफलत्वमिति मन्तव्यम् । नन्वपुण्यहेतवो जात्यायुर्भोगाः परितापफला भवन्तु तेषां प्रतिकूलवेदनीयत्वात् कस्मात् पुनः पुण्यहेतुका अप्यसुखफलाः ? अनुकूलवेदनीयत्वात् । न ह्येषां प्रत्यात्मवेदनीयानुकूलता शक्या सहस्रेणाप्यनुमानागमैरपाकर्तुम्, न च ह्लादपरितापौ परस्पराविनाभूतौ यतो ह्लादे उपादीयमाने परितापोऽप्यवर्जनीयतयाऽऽपतेत् तयोर्भिन्नहेतुकत्वात् इत्यत आह—यथा चेदमिति" विवरणम्

मरणस्य यथा सर्वकर्माभिव्यञ्जकत्वं तथा शा० भा०

"अपि च प्रायणमनारब्धफलस्य कर्मणोऽभिव्यञ्जकं प्राक् प्रायणादारब्धफलेन कर्मणा प्रतिबद्धस्य अभिव्यक्त्यनुपपत्ते । तदविशेषाद्यावत् किञ्चिदनारब्धफलं तस्य सर्वस्याभिव्यञ्जकम्, न हि साधारणे निमित्ते नैमित्तिकमसाधारणं भवितुमर्हति, नह्यविशिष्टे प्रदीपसन्निधौ घटोऽभिव्यज्यते न पट इत्युपपद्यत इत्याशङ्का निराकृता यथा—

"अपि च केन हेतुना प्रायणमनारब्धफलस्य कर्मणोऽभिव्यञ्जकं प्रतिज्ञायत इति वक्तव्यम् । आरब्धफलेन कर्मणा प्रतिबद्धस्येतरस्य वृत्त्युद्भवानुपपत्तेस्तदुपशमात् प्रायणकाले वृत्त्युद्भवो भवतीति यद्युच्येत ततो वक्तव्य यथैव हि प्राक्प्रायणादारब्धफलेन कर्मणा प्रतिबद्धस्येतरस्य वृत्त्युद्भवानुपपत्तिरेवं प्रायणकालेऽपि विरुद्धफलस्यानेकस्य कर्मणो युगपत्फलारम्भासम्भवात् बलवता प्रतिबद्धस्य दुर्बलस्य वृत्त्युद्भवानुपपत्तिरिति । न चानारब्धफलत्वसामान्ये जात्यन्तरोपभोग्यफलमप्यनेकं कर्मैकस्मिन् प्रायणे युगपदभिव्यक्तं सदेकां जातिमारभत इति शक्यं वक्तुम्, प्रतिनियतफलत्वविरोधात् । नापि कस्यचित् कर्मणः प्रायणे अभिव्यक्तिः कस्यचिदुच्छेद इति शक्यं वक्तुम्, ऐकान्तिकफलत्वविरोधात् । न हि प्रायश्चित्तादिभिर्हेतुभिर्विना कर्मणामुच्छेदः सम्भाव्यते । स्मृतिरपि विरुद्धफलेन कर्मणा प्रतिबद्धस्य कर्मान्तरस्य चिरमवस्थानं दर्शयति । "कदाचित् सुकृतं कर्म कूटस्थमिह तिष्ठति । पच्यमानस्य संसारे यावद्दुःखाद्विमुच्यते" इत्येवंजातीयका । यदि च कृत्स्नमनारब्धफलं कर्मैकस्मिन् प्रायणेऽभिव्यक्तं सदेकां जातिमारभेत, ततः स्वर्गनरकतिर्यग्योनिष्वधिकारानवगमात् धर्माधर्मानुत्पत्तौ निमित्ताभावान्नोत्तरा जातिरुपपद्येत, ब्रह्महत्यादीनां चैकैकस्य कर्मणोऽनेकजन्मनिमित्तत्वं स्मर्यमाणमुपरुध्येत । न च धर्माधर्मयोः स्वरूपफलसाधनादिसमधिगमे शास्त्रादतिरिक्तं कारणं शक्यं सम्भावयितुम् । न च दृष्टफलस्य कर्मणः कारीर्यादेः प्रायणमभिव्यञ्जकं सम्भवतीत्यव्यापिकापीयं प्रायणस्याभिव्यञ्जकत्वकल्पना । प्रदीपोपन्यासोऽपि कर्मबलाबलप्रदर्शनेनैव प्रतिनीतः । स्थूलसूक्ष्मरूपाभिव्यक्तिवच्चेदं द्रष्टव्यम् । यथा हि—प्रदीपसमानेऽपि सन्निधाने स्थूलरूपमभिव्यज्यते न सूक्ष्मम् एवं प्रायणे समानेऽप्यनारब्धफलस्य कर्मजातस्य प्राप्तावसरत्वे बलवतः कर्मणो वृत्तिमुद्भावयति न दुर्बलस्येति । तस्मात् श्रुतिस्मृतिन्यायविरोधादश्लिष्टोऽयमशेषकर्माभिव्यक्त्यभ्युपगमः । शेषकर्मसद्भावेऽनिर्मोक्षप्रसङ्ग इत्ययमप्यस्थाने सम्भ्रमः सम्यग्दर्शनादशेषकर्मक्षयश्रुतेः" ।

एवं शुभाशुभकर्मविपाकः सामान्यतो निरूपितः । इदानीमशुभकर्मविपाको विशेषतो निरूप्यते स चाधर्मशब्दे १२२० पृ० उक्तोऽपि प्रपञ्चार्थमिहोच्यते—पुराणसर्वस्वे विष्णु पु० २ अ० ६ अ० पराशरमैत्रेयसंवादे ।

"पराशर उवाच । ततश्च नरकान् विप्र ! भुवोऽधः सलिलस्य च । पापिनो येषु पात्यन्ते तान् शृणुष्व समाहित । रौरवश्चैव वेधश्च शूकरो विशसस्तथा । महाज्वालस्तप्तकुम्भो लवणोऽथ विमोहनः । रुधिरान्धो वैतरणी

[illegible]

पादाभ्यङ्गञ्च यः कुर्य्यादश्वपृष्ठेन स व्रजेत् । छत्र-
प्रदानेन याति दुर्गाणि निस्तरन् । वराम्बुप्रदानेन
वरयानेन गच्छति । अन्नपानप्रदानेन पिबन् खादंश्च
गच्छति । इत्येवमादिभिर्दानैः सुखं यान्ति यमालयम् ।
स्वर्गेऽपि विपुलान् भोगान् प्राप्नोति विविधान् नरः ।
सर्व्वेषामेव दानानामन्नदानं परं स्मृतम् । सद्यः प्रीति-
करं दिव्यं बलपुष्टिविवर्द्धनम् । नान्नदानसमं दानं
त्रिषु लोकेषु विद्यते । अन्नाद्भवन्ति भूतानि तदभावे
म्रियन्ति च । रक्तं मांसं वसा शुक्रं क्रमादस्मात् प्रवर्त्तते ।
शुक्राद्भवन्ति भूतानि तस्मादन्नमयं जगत् । हेमरत्नाश्व-
नागेन्द्रनारीस्रक्चन्दनादिभिः । समस्तैरपि सम्प्राप्तैर्न रमन्ते
बुभुक्षिताः । गर्भस्था जायमानाश्च बालाः वृद्धाश्च मध्यमाः ।
आहारमभिकाङ्क्षन्ति देवदानवमानवाः । क्षुधा हि
सर्व्वरोगाणां व्याधिः श्रेष्ठतमः स्मृतः । तस्मादौषधिलेपेन
(आहारेण) प्रतीकारः प्रकीर्त्तितः । नास्ति क्षुधा-
समं दुःखं नास्ति रोगः क्षुधासमः । नास्त्याहारसमं
सौख्यं नास्ति क्रोधसमो रिपुः । अतएव महापुण्य-
मन्नदानं प्रधानतः । यतः क्षुधाग्निसन्तप्ता म्रियन्ते
सर्व्वदेहिनः । अन्नदः प्राणदः प्रोक्तः प्राणदश्चापि सर्व्वदः ।
तस्मादन्नप्रदानेन सर्व्वदानफलं लभेत् । त्रैलोक्ये
यानि रत्नानि भोगस्त्रीवाहनानि च । अन्नपानप्रदः
सर्व्वमिहामुत्र च तल्लभेत् । यस्यान्नपानपुष्टाङ्गः कुरुते
पुण्यसञ्चयम् । अन्नप्रदातुस्तस्यार्द्धं कर्त्तुश्चार्द्धं न
संशयः । धर्म्मार्थकाममोक्षाणां देहः परमसाधनम् ।
स्थितिस्तस्यान्नपानाभ्यामतस्तत् सर्व्वसाधनम् । अन्नं प्रजा-
पतिः साक्षादन्नं विष्णुः शिवः स्वयम् । तस्मादन्नसमं दानं
न भूतं न भविष्यति । त्रयाणामपि लोकानामुदकं जीवनं
स्मृतम् । पवित्रममृतं दिव्यं शुद्धं सर्व्वरसाश्रयम् । अन्न-
पानाश्वगोवस्त्रशय्याच्छत्रासनम् । प्रेतलोके प्रश-
स्तानि दानान्यष्टौ विशेषतः । एवं दानविशेषेण धर्म्मराज-
पुरं नराः । यस्माद्यान्ति सुखेनैव तस्माद्दानं समाचरेत् ।
ये पुनः क्रूरकर्म्माणः पापा दानविवर्ज्जिताः । ते घोरेण
पथा यान्ति दक्षिणेन यमालयम् । षडशीतिसहस्राणि
योजनानामतीत्य वै । वैवस्वतपुरं ज्ञेयं नानारूपव्यव-
स्थितम् । समीपस्थमिवाभाति नराणां शुभकर्म्मणाम् ।
पापानामतिदूरस्थं पथा रौद्रेण गच्छताम् । तीक्ष्णक-
ण्टकयुक्तेन शर्कराविचितेन च । क्षुरधारानिभैस्ती-
क्ष्णैः पाषाणैर्निचितैस्तथा । क्वचित् पङ्केन महता उत्त-
प्तैश्च खातकैः । क्वचित् सूचीनिभैर्दर्भैः सङ्कुलेन पथा
क्वचित् । तटप्रपातविषमैः पर्व्वतैर्वृक्षसङ्कुलैः । प्रत-
प्ताङ्गारयुक्तेन यान्ति मार्गेण दुःखिताः । क्वचिद्विषमगर्त्तैश्च
क्वचिल्लोष्टैः सुपिच्छलैः । सुतप्तवालुकाभिश्च तथा
तीक्ष्णैश्च शङ्कुभिः । अनेकशाखाविततैर्व्याप्तं वंशवनैः
क्वचित् । कष्टेन तमसा मार्गमनालम्बेन कुत्रचित् । अ-
यःशृङ्गाटकैर्व्याप्तं क्वचिद्दावाग्निना पुनः । क्वचित्तप्तशि-
लाभिश्च क्वचिद्व्याप्तं हिमेन च । क्वचिद्वालुकया व्याप्त-
माकण्ठान्तप्रवेशया । क्वचिद्दुष्टाम्बुना व्याप्तं क्वचिच्च क-
रीषाग्निना । क्वचित् सिंहैर्वृकैर्व्याप्तं दंशैः कीटैश्च
दारुणैः । क्वचिन्महाजलौकाभिः क्वचिच्चाजगरैः पुनः ।
मक्षिकाभिश्च रौद्राभिः क्वचित् सर्पैर्विषोल्बणैः । मत्तमा-
तङ्गयूथैश्च बलोन्मत्तैः प्रमाथिभिः । पन्थानमुल्लिख-
द्भिश्च तीक्ष्णशृङ्गैर्महावृषैः । महाविषाणैर्महिषैरु-
ष्ट्रैर्मत्तैश्च रौद्रकैः । डाकिनीभिश्च रौद्राभिर्विकरालैश्च
राक्षसैः । व्याधिभिश्च महाघोरैः पीड्यमाना व्रजन्ति ते ।
महाधूलिविमिश्रेण महाचण्डेन वायुना । महापाषाण-
वर्षेण हन्यमाना निराश्रयाः । क्वचिद्विद्युत्प्रपातेन
दह्यमाना व्रजन्ति च । महाटङ्कौघवर्षेण भिद्यमानाश्च
सर्व्वतः । पतद्भिर्वज्रसङ्घातैरुल्कापातैश्च दारुणैः । प्रदीप्ता-
ङ्गारवर्षेण दह्यमाना रुदन्ति च । महता पांशुवर्षेण पूर्य्य-
माणा रुदन्ति हि । वज्रमेघरवैर्घोरैर्विभ्राम्यन्ते मुहु-
र्मुहुः । निशितायुधवर्षेण चूर्य्यमाणाश्च सर्व्वतः । महा-
क्षाराम्बुधाराभिः सिच्यमाना व्रजन्ति च । महाशीतेन
महता रूक्षेण परुषेण च । समन्ताद्धूयमानास्ते शुष्यन्ते
सङ्कुचन्ति च । इत्थं रौद्रेण मार्गेण पाथेयरहितेन
च । निरालम्बेन दुर्गेण निर्जनेन समन्ततः । अविश्रामेण
महता निर्गतापाश्रयेण च । तमोरूपेण कष्टेन सर्व्वदु-
ःखाश्रयेण च । नीयन्ते देहिनः सर्व्वे ये मूढाः पापका-
रिणः । यमदूतैर्महाघोरैस्तदाज्ञाकारिभिर्बलात् । एका-
किनः पराधीना मित्रबन्धुविवर्ज्जिताः । शोचन्तः स्वानि
कर्म्माणि रुदन्तस्ते मुहुर्मुहुः । प्रेतीभूता विवस्त्राश्च
शुष्ककण्ठौष्ठतालुकाः । कृशाङ्गा भीतभीताश्च दह्यमाना
क्षुधाग्निना । बद्धाः शृङ्खलया केचिदुत्ताना पादयो-
र्नराः । आकृष्यन्ते कृष्यमाणा यमदूतैर्बलोत्कटैः । उरसा
ऽधोमुखाश्चान्ये कृष्यमाणाः सुदुःखिताः । केशपाशनिब-
द्धाश्च समाकृष्यन्ति रज्जुना । ललाटे चासिना चान्ये
भिन्नाः कृष्यन्ति देहिनः । उत्ताना कण्टकपथा क्वचिद्-

ष्टात्मकमा । मवापूर्ण पूरयान करे च पूरोहिता । पूरिता वसुवाणिच पञ्चवोवापि चीविता । योवाया येन प्रवम वयावन्य सुश्रुषिता । विद्यावदु पुत्रेणावन पीतवि रक्ष मा । कन्यावयवन्येव चिवयाचा नवत । चित्ते सायवे महा जीवन्ये दुर्वे च रक्षमा । माताम्बस्यको च वनावमवि चायरे । विद्या करोचवीरणावमने ते करोर वो । विविधावीहरे चाचे समवसुयवा वता । विवाहने वर्षवोषाने विवाय विद्वरे वरे । विवाय वादयवाय विद्यवीतिमांविता । वविद्यविश्चयाचिय वधिवावयवा । पुत्रदयाया कृष्ण च विवयानाय शायर्वे । रक्षत पुत्रार्थ प्रमयाना विरायवा । वरवेँ वरवार्थ वमयाना तकल ता । नीच विरिते- नेति अतिवाणिवयवने । विन्धोवामर्तवि प्रसे वरण पुत्रीपिच्च । कविवयाव जीवने वपना विवया वरा । वायवानाय वविववचवापि पेवविता । वार्ता वर्णवयावाय जीवाची चयन ते । दान जीवा प्रयावर्षे वायवो विचया वरा । वर्णीवहा वयार्थेवा बुध वापि ववावयम् । ये पूर्वापि वरेष सद्य प्रवहर्ष वरा । पूर्वादिवाकरा दैविनिवृत्ते वनायव । तत् वे पूजकर्मवर्यादु वयानेदृव । सामवायवदावेच सायाम्बेच विवेच च । यथा पूव वडायाच आवसोविवदाचिच । वेन विश्वुचानीय वनदि दवर यवम् । तद विवानमावम दिव्यनो सोमपूर्विण । वर्ष नवावस्तुव वर्षेणायवनिवाता । यम अश्वा वदामीनाचवम दृवयरवार । दवि विश्वयवावर्ष दृवतादिव जीवन । ते वावि वन राजार्थ यदय दृवायद्वाचार । यवावि दौयरव विवयुचि वायम । वे इम प्रवदवीयसो ववावि व्यायवम् । पायाववयाचवा विवरीयाय दृया । देवरदावयर्थ यवदीहुहिवेवयम् । अनु वेव पयाहृतु पुत्रर दयरीवरद । भरादवदुच मा पीयादृवम्य पूवम् । वचीपुत्रोदावर वयद्गुर्ण वर्णिम् । वदा- वविययाद्य दीवायिवदवीवयम् । रवायाकार कर वदावेवोविचीविहृतम् । ववदात दवित्रीव विवय वित वायदम् । प्रवयवित विवोयवदिरम्यावायवम् । वाम च अनुवीवल बाकायववनवा । वायवा- प्रवदाय अवायव प्रवायव । यदो चेषु वदावारी

वायराजी च हारवा । विविधा पायवा यया याया वृषा ववावसा । यविश्वलादवरा वायववदीवा- दिवा । वनदवावयरा रीवा वदवमवर्दरा । वय चावा वयावोधी प्रयाणववयवा । वर्वापुत्रोपम वरा वयपूरा प्रवायवा । वनेन वरिगरैव वयावीरैव वदम् । वय वयावि वर्विवाविचवाव वीयवम् । विवेदयवादि चावर्ष वयदाम् वायवापि च । विवपुत्र वयदाव चर्वतार्थ ववेयोद, यो यो पूवक- वर्वाचा परवमावहारिव । वर्षिय वयावेव वरदारविद्वचा । यद् यव विवते यव मपुवय पुत्रे ववा । यत् विवायावयादार्थ यपीहर्षे वर्ष प्रवम् । यवाजीविं प्रवयम ? दीवावाया वर्षेति । पूर्वया वायिवर्ववि नाव होचोउचि वयचित् । वदी वै हविवोवाचा वेशावायवयावक । वनीवा वर्षविवेरि इ पुत्रावयवर्षिता । चीचोचवा । इराचाराः । प्रवा विवदवायिवा । वावववाद्य राजाव हो चि दूवर दयम् ? । राजवोचेन चोरेन वदारवाव प्रजा । विच विना वय इम वदृवायदुवा वदा । य इयार्थ वयवम वदवेयम् मम् । यत् वर्ष चदरियय पूर्वेवादिव विवा । वयायवादय नीचो देव वडविवा वदा । वनपूरेवायावाया वनवा वीवय वनेद् । वर वडवियोंच दरायवाय वेव ते । चोयवा यापि वर्वापि इवी विवपि वर्विता । पवे वर्ष ववादिम वयावा वर्वेराद् इ । अवायवरद्यायवेविद वववयरीद । चोची- वयदा वदावयदा वदीवा ववनीविवाद् । विवो- यवाद वावेव वनेव वरवाविया । यम चीन वदाचाय मयाद् वयदा वादवो । चावविवायिवे वेन विविविषो अवय च । वर्वेवादेच वदवा यम प्रयम विवायवे । वायवायवि मरचा वम वेव वदा पुवम् । यम च रावदेयावयिवो वया दीया । वि यद वयदा देशे विचेदय ववायते । यदा च याद वा यय वदेवदवोचे इम । यय चायविपदार्थ विवाते वरायार्थे । चवावियविदेवाच विवेर्मेयवोयय वदवत वयवानो चोरे ववदि वविवाय । चेराय पवरा चीहि वर्षोरा वयवाचिया । यविचोरा प्रवोचा च योयवोरा वर्वाविचा । वदयो चीवदरा च चीडिवा वर्षोविका । वडी वरयवायदा वाची

च भयानका” इत्युपक्रम्य “कराला विकराला च वज्रविंशतिमा स्मृता । त्रिकोणा पञ्चकोणा च सुदीर्घा मतिवर्त्तुला । सप्तभौमाष्टभौमा च दीप्तमायेति चाष्टमी । एता नाम्ना समुद्दिष्टा घोरा नरककोटय । अष्टाविंशतिरेवैता पापानां यातनात्मिका । आसां क्रमेण विज्ञेया पञ्चपञ्चैव नायका । प्रत्येकं सर्वकोटीनां नामतस्तन्निबोधत । रौरव प्रथमस्तेषां रुदन्ति यत्र देहिन । महारौरवपीडाभिर्महान्तोऽपि रुदन्ति हि । तम शीतं तथा चोष्ण पञ्चान्ये नायका स्मृता । सुघोर सुतलस्तीक्ष्ण पद्म सञ्जीवन शठ । महामायी विलोमश्च सुलोमश्च कटङ्कट । तीव्रवेग करालश्च विकराल सुकम्पन । महापद्म सुचक्रश्च कालसूत्र प्रगर्ज्जन । सूचीमुख सुनेमिश्च खादक सुप्रपीडित । कुम्भीपाक सुपाकश्च क्रकचश्चातिदारुण । अङ्गारराशिभवनमसृक्पूयह्रदस्तथा । तीक्ष्णायमन्तु शकुनिर्म्महासंवर्त्तक क्रतु । तप्तजन्तु पङ्कलेप पूतिमांसोद्भवद्रवम् । उच्छ्वासश्च निरुच्छ्वास सुदीर्घ कूटशाल्मलि । अरिष्ट सुमहानाद प्रवहोऽसृक्प्रवाहण । क्रपमेषवृकशल्यसिंहव्याघ्रगजाननाः । श्वसूकराश्वमहिषबृषखड्गिगजाननाः । ग्राहकुम्भीरनक्राख्या सर्पकूर्म्माश्च वायसा । गृध्रोलूकजलौकाश्च शार्द्दूलकपिकर्कटा । गण्डक पूतिवक्त्रश्च रक्ताक्ष पूतिमृत्तिक । कणधूमस्तथाग्निश्च कृमीणां निचयस्तथा । अभेद्यश्चातितीव्रश्च रुधिराम्भ श्वभोजन । लालाभक्ष्यश्चात्रभक्ष्य सर्व्वभक्ष सुदारुण । सङ्कट सुविलम्बैव विषम कटपूतन । अम्बरीष कटाहश्च कष्टा वैतरणी नदी । सुतप्तलोहशयनमेकपादप्रपूरण । असितालवन घोरमस्थिभङ्ग प्रपीडन । तिलातसी सस्त्री च कूटपाप प्रमर्द्दन । महाचूर्णं सुचूर्णञ्च तप्तलोहमयी शिला । पर्व्वत क्षुरधाराख्यस्तथा यमल पर्व्वतौ । मूत्रविष्ठान्त्रकूपश्च क्षाररूपश्च शोषण । मुशलोदूखल यन्त्र शिलाशर्कटलाञ्छनम् । तालपत्रासिगहन महाशकटमण्डलम् । सम्मोहनोऽस्थिभङ्गश्च तप्तशूलमयोगुड । बहुदु ख महादु ख कश्मल समल मलम् । हालाहलो विरूपश्च स्वरूपश्च यमानुग । एकपादो द्विपादश्च तीव्रश्चावीचिवर्त्तिन । अष्टाविंशतिरित्येते क्रमश पञ्चकाष्टक । एषा नामानुपूर्व्येण पञ्चपञ्चैव नायका । रौरवादि षष्ट्युत्तरं नरकाणां शत स्मृतम् । चत्वारिंशत्शतमधिकं महानरकमण्डलम् । एषु पापा विपच्यन्ते नरा कर्म्मानुरूपत । यातनाभिर्विचित्राभिरा कर्म्मप्रचयाद्भृशम् । यथा मलक्षयात् यद्वदग्नौ ध्मास्यन्ति धातव । तथाऽऽपापक्षयात् पापा शोध्यन्ते नरकाग्निषु । हस्तयो पादयोर्बद्धा तप्तशृङ्खलया नरा । महावृक्षाग्रमारोप्य लम्ब्यन्ते यमकिङ्करै । ततस्ते सर्व्वयत्नेन क्षिप्ता दोल्यन्ति किङ्करै । दोल्यमानश्चातिवेगेन नि सङ्गा यान्ति योजनम् । अन्तरीक्षस्थितानाञ्च लोहभार समन्तत । पादयोर्बध्यते तेषां यमदूतैर्महाबलै । तेन भारेण महता भग्नमात्रेण दु खिता । ध्यायन्त स्वानि कर्म्माणि तूष्णीं तिष्ठन्ति निश्चला । कशाभिरग्निवर्णाभिर्लौहदण्डै सकण्टकै । हन्यन्ते किङ्करैर्घोरै समन्तात्पापकारिण । तत क्षारेण दीप्तेन वह्निनापि विशेषत । समन्तात्प्रक्षिप्यन्ते चताङ्गा जर्ज्जरीकृता । पुनर्विदार्य्य चाङ्गेषु शिरस प्रभृति क्रमात् । वार्त्ताकुवत् प्रभज्यन्ते तप्ततैलकटाहके । विष्ठापूर्णे तत कूपे कृमीणां निचये तथा । मेदोऽसृक्पूयपूर्णायां वाप्यां क्षिप्यन्ति ते पुन । भक्ष्यन्ते कृमिभिस्तीक्ष्णैर्लौहतुण्डैश्च वायसै । श्वभिर्दंशैर्वृकैर्व्याघ्रैश्च विकृताननै । पच्यन्ते मांसवच्चापि प्रतप्ताङ्गारराशिषु । भिन्ना शूलेषु तीक्ष्णेषु नरा पापेन कर्म्मणा । तैलपीडैरिवाक्रम्य घोरकर्म्मभिरात्मजै । तिलवत् सम्पीड्यन्ते चक्राख्ये नरके नरा । तप्यन्ते चातितप्तेषु लौहभाण्डेष्वनेकधा । तैलपूर्णकटाहेषु सुतप्तेषु तथा पुन । बद्ध्वा पाय्यते जिह्वा येऽसत्याप्रियवादिन । सन्दंशेन सुदीप्तेन प्रपीड्यास्य पातन । मिथ्यागमप्रवक्तुश्च जिह्वाहीनास्यनिर्गतात् । जिह्वाद्वारात् क्रोशविस्तारात्कस्यैस्तीक्ष्णैश्च पात्यते । निर्भर्त्सयन्ति ये क्रूरा मातरं पितरं गुरुम् । तेषां वज्रशलाकाभिस्तु समापूर्य्य सीव्यते । तत क्षारेण दीप्तेन ताम्रेण त्रपुणा पुन । हृतेनापूर्य्य तेऽप्यथ तप्ततैलेन तन्मुखम् । हृतस्तत पुनर्वक्त्रं भृशमापूर्य्य हन्यते । विष्ठाभि कृमिमिश्राभि सोपानक्षरणैर्नरै । परिष्वजन्ति चात्युग्र प्रदीप्त लौहशाल्मलिम् । हन्यन्ते पृष्ठदेशे च पुनर्भीमैर्म्महानरै । दन्तुरेणातिकष्टेन क्रकचेन बलीयसा । शिर प्रभृति पूर्व्वको घोरै कर्म्मभिरात्मजै । खाद्यन्ते च स्वमांसानि पाय्यन्ते शोणित स्वकम् । अन्नपान न दत्त दैवैर्दै-

[illegible] । [illegible] । [illegible] । [illegible] च । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] च । [illegible] । [illegible] ।

[illegible] । [illegible] । [illegible] च । [illegible] । [illegible] च । [illegible] । [illegible] ।

नरकेषु च सर्व्वेषु विविधा देहयातनाः । भवन्ति
बहुशः कष्टाः पाणिपादसमुद्भवाः । शिरायतनपर्य्यन्ते
शिरारोमेषु कुत्रचित् । मस्तुत्सृजन्ति ये पापाः
पुरीषं मूत्रमेव वा । तेषां भिन्नं मुखं चूर्ण्यते
लौहमुद्गरैः । सूचीभिरग्निवर्णाभिस्तत्रापूर्य्यते पुनः ।
लोहदण्डश्च सुमहानग्निवर्णः सकण्टकः । आरोप्यते
गुदे तेषां यावन्मूर्द्धं विनिर्गतः । ततः क्षारेण महता
ताम्रेण सद्रवेण पुनः । द्रुतेनापूर्य्यते गाढं गुदं भिन्नञ्च
देहिनाम् । मम सर्व्वेन्द्रियाणाञ्च यथाद्युक्तं प्रव-
र्त्तनम् । तस्मादिन्द्रियवद्दुःखेन जायते तत् सुदुःखितम् ।
धने सत्यपि ये दानं न प्रयच्छन्ति तृष्णया । अतिथिञ्चाव-
मन्यन्ते कालप्राप्तं गृहाश्रमे । तेनैते घोरदण्डैश्च
हस्तयोश्चापि ताडिताः । प्रसारिताङ्गाः शुष्यन्तस्तिष्ठन्त्यवद्-
गता नराः । हस्तपादललाटेषु कीलिता लौहशङ्कुभिः ।
निम्नञ्च विवृतं वक्त्रं कीलकत्रयताडितम् । कृमिभिः
पाणिभिर्योगैर्लौहदण्डैश्च वायसैः । उपद्रवैर्बहुविधैश्च स-
म्यक् प्रपीड्यते । जिह्वावेधनिबद्धाश्च सम्पीड्यन्ते भृशं
पुनः । तिष्ठन्ति लम्बमानाश्च लोहभाराः सुवर्त्तुलाः ।
भिन्ने श्रवणे तद्वत् लौहभारद्वयं पुनः । तिष्ठते लम्बमानञ्च
बाहुभ्याञ्च चतुर्गुणम् । ततः समारुह्य तत्र तिलमात्र-
प्रमाणतः । खादितुं दीयते तेषां स्वशरीरं तु शोणितम् ।
यदा निर्भासतां प्राप्ताः कालेन महता नराः । ततः
क्षारेण दीप्तेन तच्छरीरं विलिप्यते । छिद्यन्ते शस्त्रधाराभि-
श्छिद्यन्ते वै पुनः पुनः । शुष्काः सिच्यन्ति तैलेन तप्तेन
समन्ततः । पच्यन्ति भूयो भूयोऽपि दूरस्थेन शनैः शनैः ।
निःशेषयातनाभिश्च पीड्यन्ते क्रमशः पुनः । भृशं बुभु-
क्षया पीडा कष्टा चातिपिपासया । अत्युष्णेनातिशीतेन
पापानां स्मरणेन च । एवमाद्या महाघोरा यातनाः
पापकर्म्मिणाम् । एकैकनरके प्रोक्ताः शतशोऽथ सहस्रशः ।
प्रत्येकं यातनाश्चैताः सर्व्वेषु नरकेषु च । स्रष्टा वर्षशते-
नापि सर्व्वा वक्तुं न शक्यते । इति तैर्व्विविधैर्घोरैः पात्य-
माना स्वकर्म्मभिः । म्रियन्ते नैव पापिष्ठा यावत् पापस्य
न क्षयः । तस्मादन्या यातनाः कष्टा विविधाः पापकारि-
णाम् । महाघोरातिघोराश्च कल्पाग्निसदृशोपमाः ।
श्रुत्वैव यातनास्तूर्णं म्रियन्ते मृदुचेतसः । ततस्ते-
नात्र कथिता पापा दृश्यन्ति याः स्वयम् । पुत्रमित्र-
कलत्रार्थं यदनुष्ठं त्वया कृतम् । एकाकी दह्यसे तेन
नात्र पश्यसि बान्धवान् । आत्मनैव कृतं पापं भोक्तव्यं

ध्रुवमात्मना । तत् किमात्मोपघातार्थं मूढ पापं कृतं
त्वया । एवं दूतैर्यमपालैश्चान्यान् पृच्छन्ति तत्र पुनः ।
कियन्तं केन पापेन कालमत्राश्यते नराः । देवद्रव्य-
विनाशेन गुरुद्रोहादिकर्म्मभिः । क्रमात् सर्व्वेषु पच्यन्ते
नरकेषु महीक्षयात् । महापातकिनश्चापि सर्व्वेषु नरके-
ष्विह । आचन्द्रतारकं यावत् पीड्यन्ते विविधैर्वधैः ।
महापातकिनः सर्व्वे निरयार्णवकोटिषु । चतुर्दशमन्वन्तर-
कल्पान्तं विविधैर्वधैः । उपपातकिनश्चापि तदर्द्धं यान्ति
मानवाः । पापशेषैस्तदर्द्धञ्च कालञ्चापि तथाविधम् ।
तस्मात् पापं न कुर्व्वीत चञ्चले जीविते सति । पापेन
हि ध्रुवं यान्ति नरकेषु नराः स्वयम् । यः करोति
नरः पापं वशात्मा ध्रुवमप्रियम् । पापस्य हि फलं दुःखं
तद्भोक्तव्यमिहात्मना । कथं ते पापनिरता नरा रात्रिषु
शेरते । मन्वन्तरान्तं तेषां च नरके तीव्रयातनाः । एवं
क्लिष्टा विशुद्धाश्च सावशेषेण कर्म्मणा । ततः क्षितिं
समासाद्य पुनर्जायन्ति देहिनः । स्थावरा विविधाकारा-
स्तृणगुल्मादिभेदतः । तत्रानुभूय दुःखानि जायन्ते कीट-
योनिषु । निष्क्रान्ताः कीटयोनिभ्यस्ततो जायन्ति
पक्षिणः । सक्लिष्टाः पक्षिभावेन भवन्ति मृगजातिषु ।
मार्गं च समतिक्रम्य जायन्ते पशुयोनिषु । क्रमाद्गोयोनि-
मासाद्य पुनर्जायन्ति मानुषाः । एवं योनिषु सर्व्वासु
परिभ्रम्य क्रमेण तु । कालान्तरवशाद्यान्ति मानुष्यमति-
दुर्लभम् । व्युत्क्रमेणापि मानुष्यं प्राप्यते पुण्यगौर-
वात् । विचित्रा गतयः प्रोक्ताः कर्म्मणां गुरुलाघवात् ।
मानुष्यं यः समासाद्य स्वर्गमोक्षप्रसाधकम् । द्वयोर्न्न साधये-
देकं स मृतस्तप्यते चिरम् । देवासुराणां सर्व्वेषां मानुष्य-
मतिदुर्लभम् । तत् सम्प्राप्य तथा कुर्य्यान्न गच्छेन्नरकं यथा ।
स्वर्गापवर्गलाभाय यदि नास्ति समुद्यमः । सर्व्वस्य मूलं
मानुष्यं तद्यत्नादनुपालय । धर्म्ममूलेन मानुष्यं लब्ध्वा
सर्व्वार्थसाधकम् । यदि लाभे न यत्नस्ते मूलं रक्षस्व
यत्नतः । मानुषत्वे च विप्रत्वं यदि प्राप्नोति दुर्लभम् ।
न करोत्यात्मनः श्रेयः कोऽन्योऽस्मादस्त्यचेतनः । सर्व्वेषा-
मेव देशानामयं देशः परः स्मृतः । इतः स्वर्गश्च
मोक्षश्च यतः सम्प्राप्यते नरैः । देशेऽस्मिन् भारते पुण्यं
प्राप्य मानुष्यसम्भवम् । यः कुर्य्यान्नात्मनः श्रेयस्तेनात्मा
वञ्चितश्चिरम् । भोगभूमिः स्मृतः स्वर्गः कर्म्मभूमिरियम्
मता । इह यत् क्रियते कर्म्म स्वर्गे तदुपभुज्यते । यावत्
स्वस्थशरीरस्त्वं तावद्धर्म्मं समाचर । अस्वस्थो नोदितोऽ-

दीनि ब्राह्मणस्य वाऽपहरति अन्यस्य वाऽनापदि पुरुषस्तममुत्र राजन् । यमपुरुषा अयस्मयैरग्निपिण्डैः सन्दंशैस्त्वचि निष्कुषन्ति । यस्त्विह वा अगम्यां स्त्रियं पुरुषोऽगम्यं वा पुरुषं योषिदभिगच्छति । तावमुत्र कशया ताडयन्तस्तिग्मया सूर्म्या १२ लोहमय्या पुरुषमालिङ्गयन्ति । स्त्रियञ्च पुरुषरूपया सूर्म्या । यस्त्विह वै सर्व्वाभिगमस्तममुत्र निरये वर्त्तमानं वज्रकण्टकशाल्मली १३ मारोप्य निष्कर्षन्ति । ये त्विह वै राजन्या राजपुरुषा वा अपाखण्डा धर्म्मसेतून् भिन्दन्ति ते सम्परेत्य वैतरण्यां १४ निपतन्ति भिन्नमर्य्यादास्तस्यां निरयपरिखाभूतायां नद्यां यादोगणैरितस्ततो भक्ष्यमाणा आत्मना न वियुज्यमानाश्चासुभिरुह्यमानाः स्वाघेन, कर्म्मपाकमनुस्मरन्तो विण्मूत्रपूयशोणितकेशनखास्थिमेदोमांसवसावाहिन्यामुपतप्यन्ते । ये त्विह वै वृषलीपतयो नष्टशौचाचारनियमास्त्यक्तलज्जाः पशुचर्य्यां चरन्ति । ते चापि प्रेत्य पूयविण्मूत्रश्लेष्ममलापूर्णार्णवे १५ निपतन्ति तदेवातिबीभत्सितमश्नन्ति । ये त्विह वै श्वगर्द्दभपतयो ब्राह्मणादयो मृगयाविहारा अतीर्थे च मृगान्निघ्नन्ति । तानपि सम्परेतांल्लक्ष्यभूतान् यमपुरुषा इषुभिर्विध्यन्ति १६ । ये त्विह वै दाम्भिका दम्भयज्ञेषु पशून् विशसन्ति । तानमुष्मिँल्लोके वैशसे १७ नरके पतितान्निरयपतयो यातयित्वा विशसन्ति । यस्त्विह वै सवर्णां भार्य्यां द्विजो रेतः पाययति काममोहितः तं पापकृत्तममुत्र रेतःकुल्यायां पातयित्वा रेतः सम्पाययन्ति लालाभक्ष्ये १८ । ये त्विह वै दस्यवोऽग्निदा गरदा ग्रामान् सार्थान् वा विलुम्पन्ति राजानो राजभटा वा तांश्चापि हि परेतान् यमदूता वज्रदंष्ट्राः श्वानः १९ सप्तशतानि विंशतिश्च सरभसं खादन्ति । यस्त्विह वा अनृतं वदति साक्ष्ये द्रव्यविनिमये दाने वा कथञ्चित्, स वै प्रेत्य नरके अवीचिमति २० अधःशिरा निरवकाशे योजनशतोच्छ्रायाद्गिरिमूर्द्ध्नः सम्पात्यते । यत्र जलमिव स्थलमश्मपृष्ठमवभासते तदवीचिमत् तिलशो विशीर्य्यमाणशरीरो न म्रियमाणः पुनरारोपितो निपतति । यस्त्विह वै विप्रो राजन्यो वैश्यो वा सोमपीथस्तत्कलत्रं वा सुरां व्रतस्थोऽपि वा पिबति प्रमादतः तेषां निरयं नीतानामुरसि पदाऽऽक्रम्यास्ये वह्निना द्रवमाणं कार्ष्णायसं २१ निषिञ्चन्ति । अथ च यस्त्विह वा आत्मसम्भावनेन स्वयमधमो जन्मतपोविद्याचारवर्णाश्रमवतो वरीयसो न बहु मन्येत स मृतक एव क्षारकर्द्दमे २२ निरयेऽवाक्शिरा निपतितो दुरन्ता यातना ह्यश्नुते । ये त्विह वै पुरुषाः पुरुषमेधेन यजन्ते याश्च स्त्रियो नृपशून् खादन्ति तांश्च ताश्च ते पशव इह निहता यमसदने यातयन्तो रक्षोगणाः सौनिका इव स्वधितिनाऽवदायाऽसृक् पिबन्ति नृत्यन्ति च गायन्ति च हृष्यमाणा यथेह पुरुषादाः २३ । ये त्विह वा अनागसोऽरण्ये ग्रामे वा वैश्रम्भकैरुपसृतानुपविश्रम्भय्य जिजीविषून् शूलसूत्रादिषूपप्रोतान् क्रीडनकतया यातयन्ति तेऽपि च प्रेत्य यमयातनासु शूलादिषु प्रोतात्मानः २४ क्षुत्तृड्भ्यां चाभिहताः कङ्कवटादिभिश्चेतस्ततस्तिग्मतुण्डैराहन्यमाना आत्मशमलं स्मरन्ति । ये त्विह वै भूतान्युद्वेजयन्ति नरा उल्बणस्वभावा यथा दन्दशूकास्तेऽपि प्रेत्य नरके दन्दशूकाख्ये २५ निपतन्ति । यत्र नृप दन्दशूकाः पञ्चमुखाः सप्तमुखा उपसृत्य ग्रसन्ति यथा बिलेशयान् । ये त्विह वा अन्धावटकुशूलगुहादिषु भूतानि निरुन्धन्ति तथामुत्र तेष्वेवोपवेश्य सगरेण वह्निना धूमेन निरुन्धन्ति २६ । यस्त्विह वा अतिथीनभ्यागतान् वा गृहपतिरसकृदुपगतमन्युर्दिधक्षुरिव पापेन चक्षुषा निरीक्षते तस्य चापि निरये पापदृष्टेरक्षिणी वज्रतुण्डा गृध्राः कङ्ककाकवटादयः प्रसह्योरुबलादुत्पाटयन्ति २७ । यस्त्विह वा आढ्याभिमतिरहङ्कृतिस्तिर्य्यक्प्रेक्षणः सर्व्वतोऽभिविशङ्की अर्थव्ययनाशचिन्तया परिशुष्यमाणहृदयवदनो निर्वृतिमनवगतो ग्रह इवार्थमभिरक्षति स चापि प्रेत्य तदुत्पादनोत्कर्षणसंरक्षणशमलग्रहः सूचीमुखे २८ नरके निपतति । यत्र ह वित्तग्रहं पापपुरुषं धर्म्मराजपुरुषा वायका इव सर्व्वतोऽङ्गेषु सूत्रैः परिवयन्ति । एवंविधा नरका यमालये सन्ति शतशः तेषु च सर्व्व एवाधर्म्मवर्त्तिनो ये केचिदिहोदिताश्चावनिपते । पर्य्यायेण विशन्ति"। तथैव धर्म्मानुवर्त्तिन इतरत्र । इह तु पुनर्भवे त उभयशेषाभ्यां विशन्ति"

भा० अनु० ७अ० शुभकर्म्मविशेषविपाक उक्तो यथ "युधिष्ठिर उवाच । "कर्म्मणाञ्च समस्तानां शुभानां भरतर्षभ । फलानि भरतश्रेष्ठ । प्रब्रूहि परिपृच्छतः । भीष्म उवाच । हन्त ते कथयिष्यामि यन्मां पृच्छसि भारत ॥ रहस्यं यदृषीणान्तु तच्छृणुष्व युधिष्ठिर । या गतिः प्राप्यते येन प्रेत्यभावे चिरेप्सिता । येन येन शरीरेण यद्यत्कर्म्म करोति यः । तेन तेन शरीरेण तत्तत्फलमुपाश्नुते । यस्यां यस्यामवस्थायां यत्करोति शुभाशुभम् । तस्यां तस्यामवस्थायां भुङ्क्ते जन्मनि जन्मनि । न नश्यति

सर्वं कर्म यदा यद्वोन्मिथ्याचरति । तै सह यात्रियो निर्म च यात्रा करोति च । चतुर्दशसाध्वनो दयावार्थं दयार्थ कृतवान् । सहस्रमेदुपासीत च तत्र सद्धर्मवित् । यो दयाधर्मनिरतस्तत्त्वानि वर्त्तते । नानापायात् पूर्वाप यत्र इत्यर्थं चरेत् । कारिकेषु यथानामी चतुर्थानि प्रमाणानि च । चीरवस्त्रधरोऽपीति यथोक्ता- प्रत्यापि च । वाक्यानि च मानानि योगाश्रमि सर्वोपायः । सर्वोदयवशात् तत्र योगमेव च । तथाप्ति प्रतिद्वारे योगान्यवहरन्त्यपि । नानिष परिवर्त्तते यत्नात् प्रयोग तिष्ठति । नानाविरात यो धर्मोऽदयावान् यो भवेत् । सर्वत्र सर्वानी वा च कर्तेतिश्रुतं भवेत् । तथापापमनेषाम् ईश्वर प्रतिपन्नम् । दयार्थार्थिनपूर्वार्थं च यथा सद्धर्मवित् । न दानं योदयार्थं धीरस्त्यायहरत्व । नानाधर्म ये योगा कर्मकारणवाक्यया । धर्मं कर्मेव दानेन जीवेनात्मा निवर्त्तते । । सर्वोऽपीच यथा प्रकृतकर्मेणोच जीवितम् । कृतकर्मफलभोक्ता यदनुसारतः । तत्पूर्वाश्रितो राज्यं कर्म । स्वाधिनो भवेत् । मायीपवेशितो राज्यम् । कर्मेण कृतवान् हि । नराधा कामदीनानां कर्मवाचो यथातत्त्व । क्रियान्विकमर्थं यात्रा यानु योगा अत्र कर्मेव । कर्म कर्मेण यजते दीपवत्तरूपमन्तम् । प्रतिवासी भवेत् यत्र दशामि न यातो हित । यदृच्छावशात् राज्ञ नानाप्रकारवती । सस्यानां दोषाणां सविवेकत्व यार्थिर । तथा हादश वर्षाणि नीरसामापतिविपत्ति । सर्वोक्त वर्षेषुनु न तयो दुःखादिवासती । यावत् हि चरत् कर्मं कर्म जीवत्सु राजा हि । ता दृष्टवा दुर्मतिनी न जीवति सोऽपि न । जीवती मायाविनो रोगवान् इथ्यां भ्रमन् दुःखम् । यथा मेघदर्शनेन यतो तिष्ठति मानवम् । पर पूर्वाह्न कर्म स्वशरीरवहत्यपि । अमोघयानानि यथा पुत्रानि च वस्त्राणि च । वस्त्राणि वासितवस्त्रं तथा कर्म हराम्यहम् । जीव नि जीवेत वैरा दृष्टा जीवेत जीवाया । वधुस्तोत्रे च जीवेति ज्ञानेन न तु जीवति । येन जीवति निरर येन जीवा समायति । जीवापि मासर येन प्राप्ती तेन पूजिता । येन जीवात्म माध्यर्थं तेन कायु यज्ञ पूजितम् । यो द्रव्यस्य वयो वहति तत्र व्यवहारः । अनभ्यासात् वहति कर्मव्याचरः । निर्मा

तत्रैव दानविषये सविवेको निवर्तिवं वानुसवात् सदाम्य भोक्तु मा नाथ दानवर्षे वस्तु । मा नाह ।।१५ सनातनकर्मविपाका यथा—

"दश" वहनती राजन च दश क्रियाणि । दशवती दुर्मोचि सम्भोगवद् दुर्मतिम् । अवतारः स्थित यात्रा यथा माया तती दूरः । कारणिकानिकरण विवरण कर्मीर च । तत्र शरीरवृत्तस्य कामवोधस्य तथा । सम्पूर्णं विन रोहिता यतो यानि महारथा । दैवस्य रोगवत्तरूप कर्म दशोऽवहन्त्यपि । सदाहर्षः सदाव पीडिता यदा कामि । प्राप्तो सवनाहतो कर्मेऽ वर्षमापि सदा । वीरापकर्षेतो परस्तोऽपचर्यते । समानुष्यवासनाभ्यः वैरं वर्त्तिन । तत्र दशो वहन् दशावा मादकौकिर । योगायोगाद्दश्योगा- नुयायानवसहता । परः शरीरसमार्गापि परार्थे योगवो- नित्य: । कर्मवान् नावव निर्मलं जीविते यत्र । दशा नवनागमनवर्ज्जपरिवर्जितम् । युधिष्ठिर उवाच । पूर्व सर्व यतो यावत् कर्मयुक्त वर्ष क्रिय । शरीरमिदं यात्र पुत्रिता यत्र यावत् । यत्र शरीर हि कर्मा कृतस्य तत्रतः सत्यम् । सत्यमुक्ति यत्र यात्र कर्म कर्मणि उच्यते । दशाविनिर्याम । इति वै यादृशावगती जीवितव्योऽयम । युधिष्ठिरा न यदिया सत्यानि निवास । नानिवासित कर्मेण तावीभ्या निवारणिकम् । दशैव तत्र कर्मोऽपि ये जीवनमपि । सत्यविनार्थं प्राप्य जीवितत्र यथावती । शरीरं तत्र नवी जीवितेन निवर्तिश्यम् । यतो कर्म यापुता प्रापुर्व जीव पर हि । इत्येक कर्म सर्वानि दुःखं या यदि नरावसम् । दैवा यवनूनता किंच जीवविपत्ति । यतो कर्मवयाहत न जीवा कृतमेवते । पर जीवी वरे येन विमूढ अनयापि ते । युधिष्ठिर उवाच । सर्वार्थं अन्यया यथा कर्मोऽवहत्यपि । तत्र नावविपादि कर्म दैव वहती ? । इत्याहि उवाच । अनाथमापि सर्वत्र शरीरस्य वर्तेत । । इति वै या- दायावहतो जीविका गमना । तत्रापि दशावत् दैव- मवहती यदा । यतो यत्र वहनि च नार जीव वसी वर्ते । । तस्ये जीवनादानार्थं कृता किं जीवितवाद ? । युधिष्ठिर उवाच । मार्कार्थं वै अन्यया कर्म वदावते यथा । यथा यावत् दश यदादि महत्यात् । दुर्वासोद्यान । चारवमान । इत्यादि मृतैतनिवृत्ते ।

विप्रयुक्तश्च तैर्भूतैः पुनर्यात्यपरां गतिम् । सर्व्वभूतसमायुक्तः प्राप्नुते जीव एव हि । ततोऽस्य कर्म्म पश्यन्ति शुभं वा यदि वाऽशुभम् । देवताः पञ्चभूतस्थाः किं भूयः श्रोतुमिच्छसि । युधिष्ठिर उवाच । त्वगस्थिमांसमुत्सृज्य तैश्च भूतैर्व्विवर्जितः । जीवः स भगवन् ! क्वस्थः सुखदुःखे समश्नुते । बृहस्पतिरुवाच । जीवः कर्म्मसमायुक्तः शीघ्रं रेतस्त्वमागतः । स्त्रीणां पुष्पं समासाद्य सूते कालेन भारत ! । यमस्य पुरुषैः क्लेशं यमस्य पुरुषैर्व्वधम् । दुःखं संसारचक्रञ्च नरः क्लेशञ्च विन्दति । इह लोके च स प्राणी जन्मप्रभृति पार्थिव ! । स्वकृतं कर्म्मणो भुङ्क्ते धर्म्मस्य फलमाश्रितः । यदि धर्म्मं यथाशक्ति जन्मप्रभृति सेवते । ततः स पुरुषो भूत्वा सेवते नित्यदा सुखम् । अथान्तरा तु धर्म्मस्याप्यधर्म्ममुपसेवते । सुखस्यानन्तरं दुःखं स जीवोऽप्यधिगच्छति । अधर्म्मेण समायुक्तो यमस्य विषयं गतः । महद्दुःखं समासाद्य तिर्य्यग्योनौ प्रजायते । कर्म्मणा येन येनेह यस्यां योनौ प्रजायते । जीवो मोहसमायुक्तस्तन्मे निगदतः शृणु । यदेतदुच्यते शास्त्रे सेतिहासे च छन्दसि । इह स्थानानि पुण्यानि देवतुल्यानि भूपते ! । तिर्य्यग्योन्यतिरिक्तानि गतिमन्ति च सर्व्वशः । यमस्य सदने दिव्ये ब्रह्मलोकसमे गुणैः ।” इतःपरं कर्म्मविपाकोऽभिहितः तत्र अधर्म्मशब्दे १२१।१२२ पृष्ठे “कर्म्मभिर्निर्यतैर्मेह” इत्यारभ्य “धर्म्मं कुरु मम सदा” इत्यन्तं वाक्यं हरिवंशवाक्यत्वेन प्रमादात् लिखितम् । तच्च भा॰अनु॰१११अ॰स्थ बोध्यम् । एवमधर्म्मशब्दे पृ॰१२२ पृष्ठादौ मिता॰ दर्शितवाक्यादपि कर्म्मविपाकभेदोऽवधेयः ।

भुक्तावशिष्टकर्म्मणां विपाकस्तु शातातपेन दर्शितो यथा “प्रायश्चित्तविहीनानां महापातकिनां नृणाम् । नरकान्ते भवेज्जन्म चिह्नाङ्कितशरीरिणाम् । प्रतिजन्म भवेत्तेषां चिह्नं तत्पापसूचितम् । प्रायश्चित्ते कृते याति पश्चात्तापवतां पुनः । महापातकजं चिह्नं सप्तजन्मनि जायते । उपपापोद्भवं पञ्च त्रीणि पापसमुद्भवम् । दुष्कर्म्मजा नृणां रोगा यान्ति चोपक्रमैः शमम् । जपैः सुरार्च्चनैर्होमैर्दानैस्तेषां शमो भवेत् । पूर्व्वजन्मकृतं पापं नरकस्य परिक्षये । बाधते व्याधिरूपेण तस्य जप्यादिभिः शमः । कुष्ठञ्च राजयक्ष्मा च प्रमेहो ग्रहणी तथा । मूत्रकृच्छ्राश्मरीकासा अतीसारभगन्दरौ । दुष्टव्रणं गण्डमाला पक्षाघातोऽक्षिनाशनम् । इत्येवमादयो रोगा महापापोद्भवाः स्मृताः । जलोदरं यकृत्प्लीहशूलरोगव्रणानि च । श्वासाजीर्णज्वरच्छर्द्दिभ्रममोहगलग्रहाः । रक्तार्व्वुदविसर्प्याद्या उपपापोद्भवा गदाः । दण्डापतानकश्चित्रवपुःकम्पविचर्च्चिकाः । वल्मीकपुण्डरीकाद्या रोगाः पापसमुद्भवाः । अर्शआद्या नृणां रोगा अतिपापाद्भवन्ति हि । अन्ये च बहवो रोगा जायन्ते वर्णसङ्कराः । उच्यन्ते च निदानानि प्रायश्चित्तानि वै क्रमात् । महापापेषु सर्व्वं स्यात्तदर्द्धमुपपातके । दद्यात् पापेषु षष्ठांशं कल्प्यं व्याधिबलाबलम् । अथ साधारणं तेषु गोदानादि च कथ्यते । गोदाने वत्सयुक्ता गौः सुशीला च पयस्विनी । वृषदाने शुभोऽनड्वान् शुक्लाम्बरसकाञ्चनः । निवर्त्तनानि भूदाने दश दद्याद् द्विजातये । दशहस्तेन दण्डेन त्रिंशद्दण्डं निवर्त्तनम् । दश तान्येव गोचर्म्म दत्त्वा स्वर्गे महीयते । सुवर्णशतनिष्कन्तु तदर्द्धार्द्धं प्रमाणतः । अश्वदाने मृदुस्तल्पमश्वं सोपस्करं दिशेत् । महिषीं माहिषे दाने दद्यात् स्वर्णायुधान्विताम् । दद्याद्गजं महादाने सुवर्णफलसंयुतम् । जलञ्च स्वार्हेण पुष्पं प्रदद्याद्देवगार्ग्गने । दद्याद्द्विजसहस्राय मिष्टान्नं द्विजभोजने । रुद्रं जपेल्लक्षपुष्पैः पूजयित्वा च त्र्यम्बकम् । एकादश जपेद्रुद्रान् दशांशं गुग्गुलैर्घृतैः । कृत्वाभिषेचनं कुर्य्यान्मन्त्रैर्व्वरुणदैवतैः । शान्तिके गणशान्तिश्च ग्रहशान्तिपूर्व्वकम् । धान्यदाने शुभं धान्यं खारीषट्कमितं स्मृतम् । वस्त्रदाने पट्टवस्त्रद्वयं कर्पूरसंयुतम् । दशपञ्चाष्ट चतुर उभयेन द्विजान् शुभान् । विधाय वैष्णवीं पूजां सहस्रं निजकाम्यया । धेनुं दद्याद्द्विजातिभ्यो दक्षिणाञ्चापि शक्तितः । समभ्यर्च्य यथाशक्ति वस्त्रालङ्करणैर्द्विजान् । याचेद्दण्डप्रणामेन प्रायश्चित्तं यथोदितम् । तेषामनुज्ञया कृत्वा प्रायश्चित्तं यथाविधि । पुनस्तान् परिपूर्णार्थान् वेदविद्द्विजान् । सन्तुष्टा ब्राह्मणा दद्युरनुज्ञां व्रतकारिणे । जपच्छिद्रं तपश्छिद्रं यच्छिद्रं यज्ञकर्म्मणि । सर्व्वं भवति निश्छिद्रं यस्य चेच्छन्ति ब्राह्मणाः । ब्राह्मणा यानि भाषन्ते मन्यन्ते तानि देवताः । सर्व्वदेवमया विप्रा न तद्वचनमन्यथा । उपवासो व्रतञ्चैव स्नानं तीर्थफलं तपः । विप्रैः सम्पादितं सर्व्वं सम्पन्नं तस्य तत्फलम् । सम्पन्नमिति यद्वाक्यं वदन्ति क्षितिदेवताः । प्रणम्य शिरसा धार्य्यमग्निष्टोमफलं लभेत् । ब्राह्मणाज्ञां न तीर्थं निर्जलं वा मरुधन्विकम् । तेषां वाक्योदकेनैव शुध्यन्ति मलिना जनाः । तेभ्योऽनुज्ञामभिप्राप्य प्रगृह्य च तथाशिषः । भोजयित्वा द्विजान् शक्त्या भुञ्जीत

[illegible] [illegible] [illegible] । [illegible] । [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] । [illegible] । [illegible] [illegible] । [illegible] [illegible] । [illegible] [illegible] । [illegible] [illegible] [illegible] । [illegible] । [illegible] [illegible] । [illegible] [illegible] । [illegible] [illegible] । [illegible] [illegible] । [illegible] [illegible] । [illegible]

[illegible] [illegible] । [illegible] । [illegible] [illegible] । [illegible] [illegible] । [illegible] । [illegible] [illegible] । [illegible] [illegible] । [illegible] [illegible] । [illegible] [illegible] । [illegible] [illegible] । [illegible] [illegible] । [illegible] [illegible] । [illegible]

दद्याच्च चन्दनान्यघशान्तये । महिषीघातने चैव कृष्णगुल्मः प्रजायते । खरे विनिहते चैव खररोमा प्रजायते । निष्कत्रयस्य प्रकृतिं स प्रदद्याद्धिरण्मयीम् । तरक्षौ निहते चैव जायते केकरेक्षणः । दद्याद्रत्नमयीं धेनुं स तत्पातकशान्तये । शूकरे निहते चैव दन्तुरो जायते नरः । स दद्यात्तु विशुद्ध्यर्थं घृतकुम्भं सदक्षिणम् । हरिणे निहते खञ्जः शृगाले तु विपादकः । अश्वस्तेन प्रदातव्यः सौवर्णपलनिर्म्मितः । अजाभिघातने चैव अधिकाङ्गः प्रजायते । अजा तेन प्रदातव्या विचित्रवस्त्रसंयुता । उष्ट्रे निहते चैव पाण्डुरोगः प्रजायते । कस्तूरिकापलं दद्याद्ब्राह्मणाय विशुद्धये । मार्जारे निहते चैव पीतपाणिः प्रजायते । पारावतं स सौवर्णं प्रदद्यान्निष्कमात्रकम् । शुकशारिकयोर्घाते नरः स्खलितवाग्भवेत् । सच्छास्त्रपुस्तकं दद्यात् स विप्राय सदक्षिणम् । बकघाते दीर्घनसो दद्याद्गां धवलप्रभाम् । काकघाती कर्णहीनो दद्याद्गामसितप्रभाम् । हिंसायां निष्कृतिरियं ब्राह्मणे समुदाहृता । तदर्द्धार्द्धप्रमाणेन क्षत्त्रियादिष्वनुक्रमात्” । २ अ० ।

“सुरापः श्यावदन्तः स्यात् प्राजापत्यन्तु तारकम् । शर्करायास्तुलाः सप्त दद्यात् पापविशुद्धये । जपित्वा तु महारुद्रं दशांशं जुहुयात्तिलैः । ततोऽभिषेकः कर्त्तव्यो मन्त्रैर्वरुणदैवतैः । मद्यपो रक्तपित्ती स्यात् स दद्यात् सर्पिषो घटम् । मधुनोऽर्द्धघटञ्चैव सहिरण्यं विशुद्धये । अभक्ष्यभक्षणे चैव जायते क्रिमिकोदरः । यथावसेन शुद्ध्यर्थमुपोष्य भीष्मपञ्चकम् । उदक्यावीक्षितं भुक्त्वा जायते क्रिमिकोदरः । गोमूत्रयावकाहारस्त्रिरात्रेणैव शुद्ध्यति । भुक्त्वा चास्पृश्यसंसृष्टं जायते क्रिमिकोदरः । त्रिरात्रं समुपोष्याथ स तत्पापात् प्रमुच्यते । परान्नविघ्नकरणादजीर्णमभिजायते । लक्षहोमं स कुर्व्वीत प्रायश्चित्तं यथाविधि । मन्दोदराग्निर्भवति सति द्रव्ये कदन्नदः । प्राजापत्यत्रयं कुर्य्याद्भोजयेच्च शतं द्विजान् । विषदः स्याच्छर्द्दिरोगी दद्याद्धेनुं पयस्विनीम् । मार्गहा पादरोगी स्यात् सोऽश्वदानं समाचरेत् । पिशुनो नरकस्यान्ते जायते श्वासकासवान् । घृतं तेन प्रदातव्यं सहस्रपलसम्मितम् । धूर्त्तोऽपस्माररोगी स्यात् स तत्पापविशुद्धये । ब्रह्मकूर्च्चमयीं धेनुं दद्याद्वापि सदक्षिणाम् । शूली परोपतापेन जायते तत्प्रमोचने । सोऽन्नदानं प्रकुर्व्वीत तथा रुद्रं जपेन्नरः । दावाग्निदायकश्चैव रक्तातिसारवान् भवेत् । तेनोदपानं कर्त्तव्यं रोपणीयस्तथा वटः । सुरालये जले वापि शकृन्मूत्रं करोति यः । गुदरोगो भवेत्तस्य पापरूपः सुदारुणः । मासं सुरार्च्चनेनैव गोदानद्वितयेन तु । प्राजापत्येन चैकेन शाम्यन्ति गुदजा रुजः । गर्भपातनजा रोगा यकृत्प्लीहजलोदराः । तेषां प्रशमनार्थाय प्रायश्चित्तमिदं स्मृतम् । एतेषु दद्याद्विप्राय जलधेनुं विधानतः । सुवर्णरूप्यताम्राणां पलत्रयसमन्विताम् । प्रतिमाभङ्गकारी च अप्रतिष्ठः प्रजायते । संवत्सरत्रयं सिञ्चेदश्वत्थं प्रतिवासरम् । उद्वाहयेत्तमश्वत्थं स्वगृह्योक्तविधानतः । तत्र संस्थापयेद्देवं विघ्नराजं सुपूजितम् । दुष्टवादी खण्डितः स्यात् स वै दद्याद्द्विजातये । रूप्यं पलद्वयं दुग्धं घटद्वयसमन्वितम् । खल्वाटः परनिन्दावान् धेनुं दद्यात् सकाञ्चनाम् । परोपहासकृत् काणः स गां दद्यात् समौक्तिकाम् । सभायां पक्षपाती च जायते पक्षघातवान् । निष्कत्रयमितं हेम स दद्यात् सत्यवर्त्तिनाम्” ३ अ० ।

“कुनखी नरकस्यान्ते जायते विप्रहेमहृत् । स तु स्वर्णशतं दद्यात् कृत्वा चान्द्रायणत्रयम् । औडुम्बरी ताम्रचौरो नरकान्ते प्रजायते । प्राजापत्यं स कृत्वात्र ताम्रं पलशतं दिशेत् । कांस्यहारी च भवति पुण्डरीकसमन्वितः । कांस्यं पलशतं दद्यादलङ्कृत्य द्विजातये । रीतिहृत् पिङ्गलाक्षः स्यादुपोष्य हरिवासरम् । रीतिपलशतं दद्यादलङ्कृत्य द्विजं शुभम् । मुक्ताहारी च पुरुषो जायते पिङ्गमूर्द्धजः । मुक्ताफलशतं दद्यादुपोष्य स विधानतः । त्रपुहारी च पुरुषो जायते नेत्ररोगवान् । उपोष्य दिवसं सोऽपि दद्यात् पलशतं त्रपु । सीसहारी च पुरुषो जायते शीर्षरोगवान् । उपोष्य दिवसं दद्याद्घृतधेनुं विधानतः । दुग्धहारी च पुरुषो जायते बहुमूत्रकः । स दद्याद्दुग्धधेनुञ्च ब्राह्मणाय यथाविधि । दधिचौर्य्येण पुरुषो जायते मदवान् यतः । दधिधेनुः प्रदातव्या तेन विप्राय शुद्धये । मधुचौरस्तु पुरुषो जायते नेत्ररोगवान् । स दद्यान्मधुधेनुञ्च समुपोष्य द्विजातये । इक्षुविकारहारी च भवेदुदरगुल्मवान् । गुडधेनुः प्रदातव्या तेन तद्दोषशान्तये । लौहहारी च पुरुषः कर्व्वुराङ्गः प्रजायते । लौहं पलशतं दद्यादुपोष्य स तु वासरम् । तैलचौरस्तु पुरुषो भवेत् कण्ड्वादिपीडितः । उपोष्य स तु विप्राय दद्यात्तैलघटद्वयम् । आमान्नहरणाच्चैव दन्त

स्वान्यान्तु गमने पृष्ठकुब्जः प्रजायते । कृष्णाजिनप्रदानेन प्रायश्चित्तं समाचरेत् । मातृष्वस्रभिगमने वामाङ्गे व्रणवान् भवेत् । तेनापि निष्कृतिः कार्य्या वस्त्रयुग्मप्रदानतः । भ्रातृभार्य्याभिगमने मृतभार्य्यः प्रजायते । तत्पातकविशुद्ध्यर्थं द्विजमेकं विवाहयेत् । सगोत्रस्त्रीप्रसङ्गेन जायते च भगन्दरी । तेनापि निष्कृतिः कार्य्या महिषीदानयत्नतः । तपस्विनीप्रसङ्गेन प्रमेही जायते नरः । मासं रुद्रजपः कार्य्यो दद्याच्छक्त्या च काञ्चनम् । दीक्षितस्त्रीप्रसङ्गेन जायते दुष्टरक्तक् । स पातकविशुद्ध्यर्थं प्राजापत्यद्वयञ्चरेत् । स्वजातिजायागमने जायते हृदयव्रणी । तत्पापस्य विशुद्ध्यर्थं प्राजापत्यद्वयञ्चरेत् । पशुयोनौ च गमने मूत्राघातः प्रजायते । तिलपात्रद्वयञ्चैव दद्यादात्मविशुद्धये । अश्वयोनौ च गमनाद्गुदस्तम्भः प्रजायते । सहस्रकमलस्नानं मासं कुर्य्याद्विशस्य च । एते दोषा नराणां स्युर्नरकान्ते न संशयः । स्त्रीणामपि भवन्त्येते तत्तत्पुरुषसङ्गमात् । अथ शूकरदंष्ट्रादि कृमिश्वशकटेन च । भृग्वग्निध्वान्तशस्त्राम्बुविषोद्बन्धनजलैर्मृताः । व्याघ्राहिगजभूपालचौरवैरिष्टकाहताः । कृतघ्नास्ता ये च शौचसंस्कारवर्जिताः । विसूचिकाग्निकवलद्रवातीसारतो मृताः । शाकिन्यादिग्रहैर्ग्रस्ता विद्युत्पातहताश्च ये । अस्पृश्या अपवित्राश्च पतिताः पुत्रवर्जिताः । पञ्चत्रिंशत्प्रकारैश्च नाप्नुवन्ति गतिं मृताः । पित्राद्याः पिण्डभाजः स्युस्त्रयो लेपभुजस्तथा । ततो नान्दीमुखा मोक्षाख्ययोऽप्यश्रुमुखास्तथा । इत्थं द्वादशैते पितृगणास्तर्पिताः सन्ततिप्रदाः । गतिहीनाः सुतादीनां सन्ततिं नाशयन्ति ते । दश व्याघ्रादिभिर्हता गर्भं भिन्दन्त्यथो क्रमात् । द्वादशाब्दादिभिर्हता आकर्षन्ति च बालकम् । विषादिभिर्हतास्त्रन्ति दशसु द्वादशस्वपि । वर्षैर्बालकं कुर्य्यादनपत्योऽनपत्यताम् । व्याघ्रेण हन्यते जन्तुः कुमारीगमनेन च । विषदश्चैव सर्पेण गजेन नृपदुष्टकृत् । राज्ञा राजकुमारमचौरेण पशुहिंसकः । वैरिणा मित्रभेदी च शय्यात्पितृत्यक्तकेण तु । शरघाती च शय्याया मत्सरी शौचवर्जितः । द्रोही अस्त्रावरहितः शुना निक्षेपहारकः । नरो विहन्यते शत्रौ शूकरेण च पापिकः । कृमिभिः कृतघ्नश्च कृमिभा यो निकृन्तनः । शृङ्गिणा मद्यरद्रोही शकटेन च सूचकः । भृगुणा वेदिनो चौरो यक्ष्मणा अनि-

ष्टद् । इवेन दक्षिणाचौरः शस्त्रेण श्रुतिनिन्दकः । अश्मना द्विजनिन्दार्थद्विषेण कुमतिप्रदः । उद्बन्धनेन हिंस्रः स्यात् सेतुभेदी जलेन तु । द्रुमेण राजदन्तिहृदतीसारेण लौल्यहृत् । शाकिन्याद्यैश्च म्रियते सर्पकार्य्यकारकः । अनध्यायेऽप्यधीयानो म्रियते विद्युता तथा । अस्पृश्यस्पर्शसङ्गी च चाण्डालमाश्रित्य शास्त्रहृत् । पतितोऽसद्विक्रेतानपत्यो द्विजवस्त्रहृत् । अथ तेषां क्रमेणैव प्रायश्चित्तं विधीयते । कारयेन्निष्कमात्रन्तु पुरुषं प्रेतरूपिणम् । चतुर्भुजं दण्डहस्तं महिषासनसंस्थितम् । पिष्टैः कृष्णतिलैः कुर्य्यात् पिण्डं प्रस्थप्रमाणतः । मध्वाज्यशर्करायुक्तं स्वर्णकुण्डलसंयुतम् । अकालमृत्युं कलसं पञ्चपल्लवसंयुतम् । कृष्णवस्त्रसमाच्छन्नं सर्व्वौषधिसमन्वितम् । तस्योपरि न्यसेदेव पात्रं धान्यफलैर्युतम् । सप्तधान्यन्तु सफलं तत्र तत् सकलं न्यसेत् । कुम्भोपरि च विन्यस्य पूजयेत् प्रेतरूपिणम् । कुर्य्यात् पुरुषसूक्तेन प्रत्यहं दुग्धतर्पणम् । षडङ्गञ्च जपेद्रुद्रं कलसे तत्र वेदवित् । यमसूक्तेन कुर्व्वीत यमपूजादिकं तथा । गायत्र्याश्चैव कर्त्तव्यो जपः स्वात्मविशुद्धये । ग्रहशान्तिकपूर्व्वञ्च दशांशं जुहुयात्तिलैः । अज्ञातनामगोत्राय प्रेताय सतिलोदकम् । प्रदद्यात् पितृतीर्थेन पिण्डं मन्त्रमुदीरयेत् । इमं तिलमयं पिण्डं मधुसर्पिःसमन्वितम् । ददामि तस्मै प्रेताय यः पीड़ां कुरुते मम । सजलान् कृष्णकलशान्तिलपात्रसमन्वितान् । दद्यात् प्रेतसमुद्दिश्य दद्यादेकञ्च विष्णवे । ततोऽभिषिञ्चेदाचार्य्योऽप्यमती कलसोदकैः । शुचिर्वैरायुधघटोमन्त्रैर्वरुणदैवतैः । यजमानस्ततो दद्यादाचार्य्याय स दक्षिणाम् । ततो नारायणबलिः कर्त्तव्यः शास्त्रनिश्चयात् । एष साधारणविधिरगतीनामुदाहृतः । विशेषस्तु पुनस्तेषां व्याघ्रादिनिहतेष्वपि । व्याघ्रेण निहते प्रेते वरकन्यां विवाहयेत् । सर्पदंशे नागबलिर्देयः सर्पस्तु काञ्चनः । चतुर्भिर्निष्कनिर्मितं हेमगजं दद्याद्गजैर्हते । राज्ञा विनिहते दद्यात् पुरुषन्तु हिरण्मयम् । चौरेण निहते धेनुं वैरिणा निहते वृषम् । वृकेण निहते दद्यात् यथाशक्ति च काञ्चनम् । शय्यामृते प्रदातव्या शय्या तूलीसमन्विता । निष्कमात्रसुवर्णेन विष्णुना समधिष्ठिता । शौचहीने मृते चैव द्विनिष्कस्वर्णेन हरिम् । स स्वा-

[illegible]

सुकृतप्रयोगैः । तं पूर्वजन्मजनितं तु विज्ञाय सम्यक् कार्य्या सभा तदुपदिष्टयथोक्तशान्तिः” १ अ० ।

२नपुंसकता “साध्वी यौवनसम्पन्ना त्यक्ता दोषैर्विवर्जिता । तेन दोषेण राजेन्द्र ! नपुंसकत्वमनुगच्छति । मुष्कच्छेदनकृद्यस्तु सोऽपि षण्ढत्वमश्नुते । रजस्वलाम् स्त्रियं भार्य्यां सन्निधौ यो न गच्छति । षण्ढत्वन्तु भवेत् तस्य जन्म चासाद्य भूपते ।” ।

३अल्पायु प्रजता “शृणु विप्र ! पुरा स्नातुं गतस्त्वं सरितस्तटम् । गावः कतिपयास्तत्र तृषार्त्ता वारितास्त्वया । तस्य विघ्नस्य पाकोऽयं जायन्तेऽल्पायुषः प्रजाः” ।

बाध्यतानिश्चयस्य प्रतिबन्धकत्वेऽपि यत्र कारणान्तराभावादिष्टसाधनताज्ञाने कृतिसाध्यत्वस्य न भानं तत्र कथं चेष्टसाधनताज्ञानाच्चिकीर्षोत्पत्तेर्दुर्वारत्वाच्च इत्यपि बोध्यम्। उक्तनियमभङ्गस्यैव तटस्थः शङ्कते अथेनेति। अभाव—कृत्यसाध्यतानिश्चयाभाव। उभयसिद्ध—चिकीर्षापूर्व्वमुभयसिद्ध, असिद्धा—चिकीर्षापूर्व्वमुभयासिद्धा। न साधकावहः इति कृतिसाध्यताज्ञानत्वस्य यद्यपि साधव न कारणतावच्छेदकतायां विनिगमकत्वम् इत्यर्थः लघुगुरुधर्म्मद्वयावच्छिन्न यदि कृतिपूर्व्वमुभयवादिसिद्ध तदैव लाघवस्य कारणतावच्छेदकतायां विनिगमकत्वादिति भाव। दैवात्प्रतिबन्धकपरिहारात्। सा—चिकीर्षापूर्व्वं कृतिसाध्यत्वसाधी। लाघवतारादिति कृतिसाध्यताज्ञानत्वरूपलघुधर्म्मावच्छिन्नस्य चिकीर्षापूर्व्वमुभयमते सत्त्वादित्यर्थः। इच्छाया इति तत्प्रकारकशब्दादीच्छायास्तत्प्रकारकज्ञानजन्यतानियमेनेत्यर्थः। आवश्यकत्वात्—चिकीर्षाहेतुतावश्यकत्वात् अपि च कृत्यसाध्यताज्ञानप्रतिबन्धकतान्यथानुपपत्त्या कृतिसाध्यताज्ञानस्य चिकीर्षाहेतुतासिद्धिरित्याह जनकज्ञानमिति। तज्जनकीभूतज्ञानविघटकस्यैव ज्ञानस्य विधिप्रतिबन्धकत्वादित्यर्थः। अत्र व्याप्तौ दृष्टान्तमाह व्याप्तिज्ञानविघटनद्वारेति अनुमितिजनकव्याप्तिज्ञानविघटनेनेत्यर्थः। तथा च यत् यत्प्रतिबन्धकं ज्ञानं भवति तत्तज्जनकज्ञानविघटकं यथा व्यभिचारज्ञानमनुमितिप्रतिबन्धकं ज्ञानं भवत् अनुमितिजनकव्याप्तिज्ञानविघटकमपि भवति इति सामान्यतो व्याप्त्या कृत्यसाध्यतानिश्चयस्य चिकीर्षाप्रतिबन्धकज्ञानत्वेन हेतुना चिकीर्षाजनकज्ञानविघटकत्वसाधने पक्षधर्म्मतावलात्कृतिसाध्यताज्ञानस्यैव चिकीर्षाजनकत्वसिद्धिरिति भावः। न च जनकज्ञानविघटकत्वे माऽन्यथासिद्धतया तदभावस्याहेतुत्वात् स्वरूपासिद्धिर्दृष्टान्तासिद्धिश्च इति वाच्यं प्रतिबन्धकत्वं हि न कारणीभूताभावप्रतियोगित्वम् किन्तु प्रयोजकीभूताभावप्रतियोगित्वम्। प्रयोजकत्वं च कारणकारणव्याप्यत्वान्यथासिद्धत्वान्यतराहित्ये सति नियतपूर्ववर्त्तित्वम्—कारणतत्कारणसाधारणम्। हेतौ ज्ञानपदोपादानादेव च विषयान्तरसञ्चारादौ न व्यभिचारः। साध्ये च ज्ञानपदं स्वरूपकथनम्। विघटकत्वञ्च प्रतिबन्धकत्वमेव तस्यैकतावच्छेदेन तदधिकरणावृत्तित्वरूपविरोधित्वं गुरुमतेऽधिकरणज्ञानरूपतया कृतिसाध्यताज्ञानस्यापि कृत्यसाध्यताज्ञानाभावस्य ज्ञानात्मकस्य विरोधितया सिद्धसाधनापत्तेः। नचासाधुत्वज्ञाने साधुत्वज्ञानाजन्यशाब्दधीप्रतिबन्धके व्यभिचार इति वाच्यम् निराकाङ्क्षत्वरूपासाधुत्वज्ञाने आकाङ्क्षाज्ञानमादाय साध्यस्यापि सत्त्वात् असाधुत्वज्ञानस्य च प्रतिबन्धकत्वे मानाभावात्। न च तथापि सिद्धौ व्यभिचार इति वाच्यम् गुरुमते सिद्धेरप्रतिबन्धकत्वात् तद्व्यावृत्तप्रतिबन्धकताया वा हेतौ निवेशात्। अतएवासिद्धत्वज्ञानजन्येच्छाप्रतिबन्धकसिद्धत्वज्ञानेऽपि न व्यभिचारः तद्व्यावृत्तप्रतिबन्धकताया एव हेतौ निवेशात् अनिष्टत्वनिश्चयस्यापि इच्छाहेतुत्वाच्च। अथ तथापि बाधसत्प्रतिपक्षादौ व्यभिचारः। न च तद्व्यावृत्ताऽपि प्रतिबन्धकता हेतौ निवेशनीयेति वाच्यम् कृत्यसाध्यताज्ञानाभावव्यभिचारज्ञानाभावयोरपि बाधाभावतयैव चिकीर्षानुमित्योः प्रयोजकतया स्वरूपासिद्धिदृष्टान्तासिद्ध्योरापत्तेः। न च साक्षाद्विरोधित्वे सतीत्यनेन हेतुर्विशेषणीय इति वाच्यम् साक्षाद्विरोधित्वं हि न पक्षाभावतद्व्याप्याद्यनवगाहित्व, प्रकृतेऽपि तदसिद्धेः कृत्यसाध्यताज्ञानस्य चिकीर्षाप्रकारीभूतकृतिसाध्यत्वाभावावगाहित्वात् अतएव न कारणीभूताभावप्रतियोगित्वमपि, प्रकृतेऽपि तदसिद्धेः पूर्वपक्षिणा कृत्यसाध्यताधिय साक्षादेव प्रतिबन्धकत्वाभ्युपगमात्। न च हेतौ प्रतिबन्धकज्ञानत्वपदेन ज्ञानत्वावच्छिन्नप्रतिबन्धकताशालित्वं विवक्षितं बाधसत्प्रतिपक्षादेश्च निश्चयत्वेन प्रतिबन्धकत्वमिति वाच्यम् प्रकृते तदसिद्धेः उक्तयुक्त्या कृत्यसाध्यतानिश्चयस्यैव पूर्वपक्षिमते प्रतिबन्धकत्वादिति चेन्न हेतौ स्वपाश्रयविरोधावगाहिज्ञानभिन्नत्वेन यत्पदार्थविशेषणात्। स्वपदं प्रतिबन्धकज्ञानपरं चिकीर्षायाश्च ज्ञानभिन्नत्वादेव सम्पद स्वपाश्रयविरोधावगाहित्वन्तु स्व यत्र यदभावतद्व्याप्य तदवच्छेदकाद्यन्यतमावगाहि तत्र तदवगाहित्वं बाधादिस्थेनापि हेतौ यत्पदार्थो विशेषणीय तेन इष्टभेदपक्षे प्रवृत्त्यादिप्रतिबन्धके तन्मये न व्यभिचारः। कृत्यादिप्रवृत्तौ विशिष्टज्ञानमेव हेतुरिति साधनस्यादेव न तमादाय व्यभिचारः। न च तथापि कूटभ्रमपरामर्शलिङ्गस्थले लिङ्गासंसर्गाग्रहेण लैङ्गिकासंसर्गाग्रहाधीनशब्दादीच्छाप्रवृत्तिप्रतिबन्धकेष्टभेदपक्षे जनकीभूतविशिष्टज्ञानविघटकत्वाभावाद्व्यभिचार इति वाच्यम् विशिष्टज्ञानस्य शब्दादीच्छाप्रवृत्तिहेतुत्वे मानाभावात् तत्रापीच्छाप्रवृत्त्योर्विषयान्तरविषयकत्वकल्पनेन विशेषादित्वस्य तै स्वीकारादिति दिक्। अन्यथा—एतादृशव्याप्त्यनङ्गीकारे। उपेक्षणीयत्वम्-

साध्यतानिर्वाहस्य प्रतिबन्धकत्वेऽपि यत्र कारणान्तराभावादिरूपबाधनिश्चयाधाने स्वतिसाध्यत्वस्य न भानं तत्र कृत्यहेतुसाधनताज्ञानं चिकीर्षाप्रत्ययं प्रयोजकम् इत्यभिप्रायम्। एतन्नियमप्रकृत्यैव स्फुटं गम्यते इत्यवधेयमिति। अपरे-कृतिसाध्यताविरहाभाव। उभयसिद्धा-चिकीर्षोद्देश्यतावच्छेदकः, उभयसिद्धा-चिकीर्षापूर्वोक्तोभयाविषया। न साधारणाधिकरण इति कृतिसाध्यताज्ञानात्पर्यवसानं यद्यपि साधन कारणतावच्छेदकतायां विशिष्यावगम्यते तथापि गुरुधर्मद्वयावच्छिन्न यदि कथमपि तद्धर्मविशिष्टे तदेव साधारण कारणतावच्छेदकतायां विनिगमकाभाव इति भाव। दैवात्प्रतिबन्धकविरहात्। सा-चिकीर्षापूर्वं कृतिसाध्यताधी। साधनत्वाद्यादिति कृतिसाध्यताज्ञानाद्युक्तगुणधर्माधिक्यवत् चिकीर्षापूर्वोक्तोभयपक्षे सम्यगादिरर्थः। इच्छाया इति तत्प्रकारकसंवादीच्छायाः तत्प्रकारकज्ञानजन्यतानियमेनेत्यर्थः। अनायत्तकत्वात्-चिकीर्षाहेतुत्वावच्छेदकत्वात् अपि च कृतिसाध्यताज्ञानप्रतिबन्धकताव्यवस्थापकस्या कृतिसाध्यताज्ञानस्य चिकीर्षाहेतुताविरहितस्यैव जनकज्ञानमिति। तज्जनकीभूतज्ञानविघटकस्यैव ज्ञानस्य विधिप्रतिबन्धकत्वाभ्युपगमे। अत व्याप्तौ दृष्टान्तमाह व्याप्तिज्ञानविघटनद्वारेति अनुमितिजनकव्याप्तिज्ञानविघटनेनेत्यर्थः। तथा च यत् यत्प्रतिबन्धकं ज्ञानं भवति तत्तज्जनकज्ञानविघटकं यथा व्यभिचारज्ञानमनुमितिप्रतिबन्धकं ज्ञानं भवत् अनुमितिजनकव्याप्तिज्ञानविघटकमपि भवति इति सामान्यतो व्याप्त्या कृतिसाध्यतानिश्चयस्य चिकीर्षाप्रतिबन्धकज्ञानत्वेन हेतुना चिकीर्षाजनकज्ञानविघटकत्वसाधने पक्षधर्मताबलात्कृतिसाध्यताज्ञानस्यैव चिकीर्षाजनकत्वसिद्धिरिति भाव। न च जनकज्ञानविघटकत्वे माऽन्यथासिद्धतया तदभावव्याप्यहेतुत्वात् सत्प्रतिपक्षदृष्टान्तासिद्धिरिति वाच्यं प्रतिबन्धकत्वं हि न कार्य्यीभूताभावप्रतियोगित्वम् किन्तु प्रयोजकीभूताभावप्रतियोगित्वम्। प्रयोजकत्वं च कारणकारणव्यापकत्वान्यथासिद्धत्वद्वय राहित्ये सति नियतपूर्ववर्त्तित्वम्—कारणतत्कारणसाधारणम्। हेतौ ज्ञानपदोपादानादेव च विषयान्तरसञ्चारादौ न व्यभिचार। साध्ये च ज्ञानपद स्वरूपकथनम्। विघटकत्वस्य प्रतिबन्धकत्वमेव तत्त्वे ककासावच्छेदेन तदधिकरणावृत्तित्वरूपविरोधित्व गुरुनयेऽधिकरणज्ञानरूपतया कृतिसाध्यताज्ञानस्यापि कृतसाध्यताज्ञानाभावस्य ज्ञानात्मकस्य

विरोधितया सिद्धसाधनापत्तेः। तथाभावस्थाने साध्यत्वज्ञानाजन्यज्ञानेऽप्रतिबन्धके व्यभिचार इति वाच्यम् निराकाङ्क्षत्वादयोग्यत्वाभावस्थाने अभावाद्ज्ञानमादाय साध्यस्यापि सत्त्वात् व्यधिकरणप्रकारकज्ञानस्य च प्रतिबन्धकत्वे प्रमाणाभावात्। न च तथापि सिद्धौ व्यभिचार इति वाच्यम् गुरुनये सिद्धेरप्रतिबन्धकत्वात् तद्रूपेण प्रतिबन्धकतायाः वा हेतौ निवेशात्। अतएवाभिलाषज्ञानाजन्येच्छाप्रतिबन्धकसिद्धत्वज्ञानेऽपि न व्यभिचार तद्रूपेण प्रतिबन्धकताया एव हेतौ निवेशात् अनिष्टसाधनत्वज्ञानस्यापि इच्छाहेतुत्वाद्वा। अथ तथापि बाधकप्रतिपक्षादौ व्यभिचार। न च तद्रूपेणापि प्रतिबन्धकता हेतौ निवेशनीयेति वाच्यम् कृतसाध्यताज्ञानाभावव्यभिचारज्ञानाभावयोरपि स्वाभावतयैव चिकीर्षानुमित्योः प्रयोजकतया सत्प्रतिपक्षदृष्टान्तासिद्ध्योरापत्ते। न च साक्षाद्विरोधित्वे सतीत्यनेन हेतुर्विशेषणीय इति वाच्यम् साक्षाद्विरोधित्वं हि न स्वाभावतद्व्याप्याद्यभावघटितत्वं, प्रकृतेऽपि तद्घटिते कृतसाध्यताज्ञानस्य चिकीर्षाप्रकारीभूतकृतिसाध्यताभावघटितत्वात् अतएव न कार्य्यीभूताभावप्रतियोगित्वमपि, प्रकृतेऽपि तदसिद्धेः पूर्वपक्षिणा कृतसाध्यताधिय साक्षादेव प्रतिबन्धकत्वाभ्युपगमात् न च हेतौ प्रतिबन्धकज्ञानत्वपदेन ज्ञानावच्छिन्नप्रतिबन्धकताशालित्वं विवक्षितं बाधकप्रतिपक्षादेश्च निश्चयत्वेन प्रतिबन्धकत्वमिति वाच्यम् प्रकृते तदसिद्धेः उक्तयुक्त्या कृतसाध्यतानिश्चयस्यैव पूर्वपक्षिमते प्रतिबन्धकत्वादिति चेन्न हेतौ स्वपाक्ष्यविरोधावगाहिज्ञानभिन्नत्वेन यत्पदार्थविशेषणात्। स्वपद प्रतिबन्धकज्ञानपर चिकीर्षादिपर ज्ञानभिन्नत्वादेव सत्प्रतिपक्षविरोधावगाहित्वन्तु स यत्र यदभावतद्व्याप्य तदवच्छेदकाद्यन्यतमवगाहते तत्र तदवगाहित्व सत्प्रतिपक्षेऽपि हेतौ यत्पदार्थो विशेषणीय तेन इष्टभेदपक्षे प्रवृत्त्यादिप्रतिबन्धके तत्त्वे न व्यभिचार। सत्प्रतिपक्षे विशिष्टज्ञानमेव हेतुरिति साधकसत्त्वादेव न तमादाय व्यभिचार। न च तथापि कूटभ्रमपरामर्शविशिष्टे सिद्धासद्वर्गापक्षेप कैद्रिकासद्वर्गापक्षाधीनकथादौ-व्याप्रवृत्तिप्रतिबन्धकेष्टभेदपक्षे जनकीभूतविशिष्टज्ञानविघटकत्वाभावाद्व्यभिचार इति वाच्यम् विशिष्टज्ञानस्य सत्प्रतिपक्षाप्रवृत्तिहेतुत्वे मानाभावात् तत्रापीच्छाप्रवृत्त्योर्विषयान्तरविषयकत्वकल्पनेन विरोधादित्वस्य स्वीकारादिति दिक्। अन्यथा—एतच्च व्याप्त्यस्वीकारे। उपेक्षणीयत्वम्-

[illegible]

प्रयोजकत्वात्, फलेच्छाविच्छेदस्य प्रतिबन्धकत्वाभावेन यथा श्रुतासङ्गतेः। तत्र-किञ्च एतस्य पाकसाध्यत्व सिद्धत्वज्ञान स्थले। सिद्धत्व-सिद्धत्वपदं पाकस्य सिद्धत्वज्ञानात् स्वर्गसाध्यस्य सद्धत्वज्ञानम् ओदनस्य सिद्धत्वज्ञानात् फलेच्छाविच्छेद इति भाव। ननु स्वविषयताऽवच्छेदकावच्छिन्नविशेष्यताकसिद्धत्वज्ञानत्वेन प्रतिबन्धकत्व स्वघात्तभावात् अननुगम न च तद्धर्म्माश्रयविशेष्यकेच्छां प्रति तादृशसिद्धत्वज्ञानं विरोधीति वाच्यं मिथ्याटोकाया अव्यापकत्वात्। अथ तद्धर्म्मावच्छिन्नविशेष्यताकसिद्धत्वज्ञानं विरोधि नचैवं शूद्रादिपाके सिद्धत्वज्ञानेऽपि ब्राह्मणस्य पाके चिकीर्षा न स्यादिति वाच्यं तदानीं स्वीयपाकत्वादिरूपेणैव" ब्राह्मणस्य चिकीर्षोत्पादात् पाकत्वरूपेण तदनुत्पादात् इति चेन्न ग्रामे स्वत्वं मे भवत्विति सिद्धग्रामादिगोचरेच्छाया ग्रामत्वादिरूपेण सिद्धत्वज्ञानेऽपि ग्रामान्तरीयां व्यभिचारात् कपालद्वयसंयोगादिरूपेण सिद्धत्वज्ञानेऽपि कपालद्वयसंयोगाद्युपादानेच्छायां व्यभिचारात् इत्यत आनन्दायां तदनभ्युपगमे तदानीं प्रवृत्तेरप्यपलापप्रसङ्गात् उपादानेच्छाया प्रवृत्तौ हेतुत्वादतएव तद्धर्म्मप्रकारकत्वावच्छिन्नसंसर्गविशेष्यताकेच्छां प्रति तद्धर्म्मावच्छिन्नविशेष्यताकसिद्धत्वज्ञानं विरोधि गतो ग्रामे स्वत्वं मे भवत्विति सिद्धग्रामादिगोचरेच्छायां व्यभिचार इति कश्चित् प्रत्यपितमपास्तं, कपालद्वयसंयोगाद्युपादानेच्छायां व्यभिचारात् पाकत्वादिरूपेण सिद्धत्वज्ञानदशायां मम कृतिसाध्यपाको भवत्विति चिकीर्षाया अनुत्पादात् घटत्वादिरूपेण सिद्धत्वज्ञानदशायामपि नीलो घटो भवत्वितीच्छाया अनुत्पत्तिप्रसङ्गात् इति चेत्? नैव तद्धर्म्मोद्देश्यतावच्छेदकेच्छां प्रति तद्धर्म्मप्रकारकसिद्धत्वज्ञानस्य प्रतिबन्धकत्वात्। उद्देश्यत्वञ्च स्वर्गस्त्वित्यादिपदाभिधेयमानो विधेयतावि(शे)षेण ग्रामे स्वत्वं मे भवत्वित्यादौ ग्रामादिर्नोद्देश्यः किन्तु स्वत्वमेव एवं कपालाद्युपादानगोचरेच्छायामपि कपालं विधेयम्। उद्देश्यतावच्छेदकत्वञ्च तत्पर्य्याप्त्यधिकरणत्व तेन घटत्वादिरूपेण सिद्धत्वज्ञानदशायां नीलो घटो भवत्वितीच्छोत्पत्तिः। अतएव यदा पाकादिविधेयकचिकीर्षायां, पाकत्वादिमात्रमेवोद्देश्यता पाकत्वादिरूपेण सिद्धत्वज्ञानादेव वार्य्यते यदा तु उद्देश्य साध्यपाकत्वादिरूपेण, सा तु स्वकृतिसाध्यपाकत्वादिरूपेण सिद्धत्वज्ञानादेवार्य्यते इति विभागः। तादृशविधेयत्वविषयताश्रयीकारे तु तत्तद्धर्म्मावच्छिन्नविशेष्यताकसिद्धत्वज्ञानत्वेनैव प्रतिबन्धकता, प्रतिबन्धकता तु सामान्यतस्तद्धर्म्मावच्छिन्नविशेष्यताकसिद्धत्वज्ञानत्वेन तत्तद्धर्म्मावच्छिन्नेनैवेत्यन्यदेतत्। केचित्तु यद्धर्म्मावच्छेदेनेष्टसाधनताज्ञानाधीना इच्छा तद्धर्म्मप्रकारकसिद्धत्वज्ञानमनयोर्विरोध। इष्टसाधनविषयत्वञ्च यत्र पाकत्वरूपेण गृहीतं तत्र पाकत्वप्रकारकसिद्धत्वधियैव वारणमिति यत्र मत्कृतिसाध्यपाकत्वादिना तदंशस्, तत्र तदवच्छिन्नसिद्धत्वधियैवेति विभागः। तेन प्रतिबन्धकसाध्यत्वनतावच्छेदकत्वात् प्रकारान्तरेण तज्ज्ञानेऽपि न तथा गमः। न च सिद्धत्वज्ञानदशायां घटयागादिसाध्यस्वर्गसमकपालद्वयसंयोगाद्युपादानेच्छाया व्यभिचार इति वाच्यम् गुरुमते उपादानचिकीर्षाविषयसाधनताया नस्य तत्कालादेः प्रवृत्तिहेतुत्वेन तादृगिच्छायां मानाभावात्। तच्चाग्रे स्फुटं भविष्यति एवं न्यायनयेऽपि। न च तथापि यथा पाकत्वरूपेण इष्टसाधनताज्ञानात् कृतिसाध्यत्वप्रकारकज्ञानसत्त्वात् पाकः कृतिसाध्यो भवत्वितीच्छाया ग्रामत्वादिरूपेण सिद्धग्रामदानेष्टसाधनताज्ञानात् स्वीयस्वत्वप्रकारकज्ञानसत्त्वात् ग्रामो मे स्वत्ववान् भवत्विति सिद्धग्रामविशेष्यकेच्छायामपि तौ बाधकाभावात् तत्र व्यभिचार ग्रामत्वादिरूपेण सिद्धत्वज्ञानेऽपि तदुत्पत्तेरिति वाच्यम् स्वस्य तत्साध्यतातिरिक्तत्वस्थले तत्प्रकारकफलार्थीच्छायां तत्प्रकारकफलसाधनताज्ञानस्य फलवत्त्वेन हेतुतया ग्रामत्वरूपेणेष्टसाधनताज्ञाने तादृशेच्छाया एवासिद्धेरित्याहुः, तदपि गुरुनये सिद्धविषयकेच्छाया अप्रसङ्गात्। घटादिसाध्यकप्रवृत्तौ घटादिचिकीर्षावत् कपालाद्युपादानकप्रवृत्तौ कपालादीच्छाया अपि हेतुत्वेन कपालाद्युद्भवेच्छाया व्यभिचारस्य दुर्वारत्वात्, अन्यथा चिकीर्षाविषयसाधनताज्ञानस्य लौकिकप्रत्यक्षस्य चाविषयत्वेऽपि यत्नेच्छा तत्र योग्यादानतया प्रवर्त्तयेत् नेच्छा तत्र नेति नियमानुपपत्ते। न्यायमीमांसासिद्धान्तस्य च युक्तिविरुद्धत्वेनानुपादेयत्वादिति सङ्क्षेपः"। अधिकं तद्ग्रन्थे द्रष्टव्यम्।

न्यायमते तु कार्य्यताज्ञानमिष्टसाधनत्वज्ञानं बलवदनिष्टाननुबन्धित्वज्ञान चेति त्रयमेव प्रवर्त्तकमिति भेदः विस्तरस्तु आकरे द्रष्टव्यः।

कार्य्यपुट पु॰ कार्य्ये कर्त्तव्ये कर्म्मणि न पुटति पुट-क्विपे क ७त॰। १क्षपणके २उन्मत्ते ३व्यर्थकरे त्रि॰ मेदि॰।

कार्य्यप्रद्वेष पु॰ कार्य्यं प्रद्विष्यतेनेन प्र+द्विष-करणे घञ् ६त॰। आलस्ये राजनि॰ आलस्येन हि कार्य्यद्वेषाकस्य तथात्वम्।

[illegible]

शक्तिकल्पनमयुक्तं हेत्वभावात् उपस्थित्यन्तरे गौरवात् । अथ कार्य्यान्वितज्ञानोपस्थितावन्यान्वितज्ञानमप्युपस्थित-मिति लाघवात् कार्य्यांशमपहायान्विते शक्तिरस्त्वतामिति चेत् न ज्ञाने हि पदानां शक्तिः शक्यत्वात्, नार्थे । अन्यच्च कार्य्यान्विते ज्ञानमन्यदन्वितज्ञानं विषयभेदेन ज्ञान-भेदात् । तदुक्तमभाववादे, "अन्यदुभूतलज्ञानं अन्यच्च घटवद्भूतलज्ञानमिति" अन्वितज्ञानमुपस्थाप्य तत्र शक्तिरेव इति गौरवमेव लघुनि शक्ये सम्भवत्यन्यस्य गुरु-न, युगपदुपस्थितौ तथ स्यात् । न च तस्याप्यनुपस्थिति पुरुषविशेषदोषात् सर्व्वैरेवाप्रवृत्तौ तथानवगमात् । तथापि न कार्य्यान्विते शक्तिः कार्य्यवाचिलिङादीनां व्यभिचारादिति चेत् न सर्व्वपदानां कार्य्यत्वविशिष्टधी-जनकत्वात् तच्च कार्य्यान्वितस्वार्थप्रतिपादकतयेतरान्वित-स्वार्थकार्य्यप्रतिपादकतया वेति । एवं कार्य्यान्वितव्युत्पत्तौ सत्यामनाकाङ्क्षादौ व्यभिचारादाकाङ्क्षादेरुपाधित्वम् । तयोश्चोपजीव्यप्रथमभाविकार्य्यान्वितव्युत्पत्त्यनुरोधेन सिद्ध-स्थलेऽपि कार्य्याध्याहारः । कश्चित्तु तत्र च गमनगीवह इति सिद्धार्थेऽन्वयप्रतीतिदर्शनादुत्तरकालमन्वितमात्रे शक्तिरेव कल्प्यतां प्राचीनकार्य्यान्वितज्ञानं बाध्यमानमित्यपास्तम् एव निरस्तपूर्व्वकल्पनात् कल्पनान्तरप्रसङ्गाच्च । उत्तरकालभाविसिद्धार्थप्रयोगस्य लक्षणादिभिरप्युपपत्तेरन्यथासिद्धत्वाभावेन प्राचीनज्ञानाबाधकत्वात् उपजीव्यव्याघाताच्च । अथ सिद्धार्थेऽपि व्युत्पत्तिः सम्भवति तथाहि उपलब्धचैत्रपुत्रजन्मा वाक्यहर्षेण वार्त्ता-हारेण चैत्रसमीपं गत - चैत्र ! पुत्रस्ते जात इति वार्त्ता-हारवाक्यं शृण्वन् चैत्रस्य मुखप्रसादं पश्यन् मोदर्षं-मनुमिमीते । हर्षाच्च तत्कारणं पुत्रजन्मज्ञानं कल्पयति उपस्थितत्वात् उपपादकत्वात् अन्योपस्थितौ गौरवाच्च तत्र वाक्यस्य कारणतां कल्पयति लाघवादिति चेत् न हर्षहेतूनां बहूनां सम्भवात् हर्षेण लिङ्गेन पुत्रजन्म-ज्ञानस्य वाक्येनानुमातुमशक्यत्वात् प्रियान्तरज्ञानस्य परि-शेषयितुमशक्यत्वात् । अथ पुत्रजन्मज्ञानाव्यभिचारि दृष्टि-माल्यादिक्रियाविशेषदर्शनात् पुत्रजन्मज्ञानानुमानमिति चेत् तर्हि पुत्रस्ते जात इति वाक्य तत्तत्क्रियाकर्त्तव्यता पर्य्यवसित कार्य्यान्वितज्ञानजनकत्वमेव तस्य कल्पतो स्यात् तदुत्तरं च पुत्रजन्मज्ञानानुमानमिति न व्युत्पत्ति-कार्य्य सम्भवति । यत्रापि च कुक्कुरतरौ द्विरोरे-शादि पांसुहार्दकर्दमान्माधिकरणादिभिर्व्युत्पत्ति-

सत्यापि व्यवहाराधीनव्युत्पत्तिपूर्व्विका कार्य्यान्वित एव दुक्ता विकपदशक्तिः । पूर्व्वं नाशक्रोतीति चेत् तत्रापि पिकमानयेत्यादौ कार्य्यान्वित एव व्युत्पत्ते उपजीव्यजातीयतया च तस्यानन्यथात्वम् । किञ्चेदमपि पद कार्य्यान्वितज्ञानजनकम् पदत्वादिति सामान्यतोऽवगत विशेष तार्थे पद नाधिगत स इदानीं वृद्धव्यपदेशादिभिरव-गम्यते । अत सिद्धप्रवृत्तिपराणां शब्दानां प्रवर्त्तकज्ञान-जनकता तच्च क्वचित् साक्षात् क्वचित् परम्परया, कार्य्या-न्वयात् कार्य्यान्वितस्वार्थबोधकमिति । यत्र पुराण-भारतादिपाठे फलश्रुतिरस्ति तत्रार्थवादकल्पितविधि-शेषीभूतत्वेन प्रवृत्तिपरत्वेन तेषामिति परम्परया कार्य्या-न्वयत् कार्य्यान्वितस्वार्थबोधकत्व स्वरूपाख्यानपराणान्तु काव्यनाटकादीनां पदार्थसंसर्गाद्यहेण संसर्गव्यवहारो न सम्भवत्येव इति ।

तदेतन्मतं पूर्व्वपक्षत्वेनोक्त्वा मणिकृता निराकृतं यथा- "अत्रोच्यते घटमानयेति वाक्यश्रवणानन्तरं प्रयोज्यस्य घटा-नयनगोचरप्रवृत्त्या घटानयनकार्य्यताज्ञानमनुमितं बालेन तत्र कार्य्यान्वितज्ञानं प्रवृत्तिविशेषे तस्याऽहेतुत्वात् विषया-दिपदशक्तिग्रहे तस्यानुपयोगाच्च तत्र च ज्ञानविशेषे घट मानयेति वाक्यविशेषस्यावापोद्वापितपदविभागस्य हेतुत्वमव-धार्य घटपदादिनावापोद्वापाभ्यां प्रत्येकावापोद्वा-देन घटकर्मत्वानयनकार्य्यत्वज्ञानेषु प्रत्येकं कारणत्वमव-गम्य शक्तिं कल्पयति । प्रवृत्तिसामान्येनानुमित कार्य्यान्वितमात्रे वाक्यमात्रस्याकाङ्क्षादिमत्त्वेन कार्य्यानवप-हायान्वितज्ञानमात्रे शक्तिं कल्पयति नतु प्रथमं वाक्य मात्रस्य कार्य्यान्वितज्ञानमात्रहेतुत्वकल्पनम् ।

अथ घटानयनक्रियाया प्रथमं क्रियात्वज्ञानात्प्रवृत्ति मात्रानुमानं न तु कार्य्यान्वितज्ञानमनुमाय तत्र वाक्यमात्रस्य हेतुत्वं कल्पयित्वा शक्तिं कल्पयति तदु-त्तर विशेषयो कार्य्यकारणभाव इति चेत् न प्रथमं प्रवृत्तिमात्रकार्य्यान्वितज्ञानमात्रयोरनुमानं वानन्य-क्रमशो भवत्यत्र मानाभावात् घटादिपदशक्तिग्रहस्य तेन विनापि सम्भवात न च तदनुमानसामग्री तदा वृत्तेति वाच्यम् तदा व्याप्त्यादिस्मृतौ मानाभावात् सामान्ययो कार्य्यकारणभावग्रहे विशेषयोस्तद्ग्रहे हेतुरिति चेत न विशेषयोरन्वयव्यतिरेकाभ्यामेव तद्ग्रहात् यथा धूमवह्निविशेषयो कार्य्यकारणभावग्रहे तत्सामान्ययोरपि वेदवेदमज्ञाता शब्दे अन्यथा न स्वरूपमनन्या व्याप्ति

[illegible]

शक्तिकल्पनमयुक्तं हेत्वभावात् उपस्थित्यन्तरे गौरवात् । अथ कार्य्यान्वितज्ञानोपस्थितावप्यन्वितज्ञानमप्युपस्थितमिति लाघवात् कार्य्यागमनप्रत्ययान्विते शक्तिरस्तामिति चेत् न ज्ञाने हि पदानां शक्तिः अकॢप्तत्वात्, नार्थे । अन्यच्च कार्य्यान्विते ज्ञानमन्यदन्वितज्ञानं विषयभेदेन ज्ञानभेदात् । तदुक्तमभाववादे, "अन्यद्भूतलज्ञानं अन्यच्च घटवद्भूतलज्ञानमिति" अन्वितज्ञानमुपस्थाप्य तत्र शक्तिरस्त्विति गौरवमेव लघुनि शक्ये सम्भवत्यन्यस्य गुरुत्वे, युगपदुपस्थितौ तथा स्यात् । न च तस्याप्यनुपस्थिति पुरुषविशेषदोषात् सर्व्वैरेवाप्रवृत्तौ तथानवगमात् । तथापि न कार्य्यान्विते शक्तिः कार्य्यवाचिलिङादीनां व्यभिचारादिति चेत् न सर्व्वपदानां कार्य्यत्वविशिष्टधीजनकत्वात् तच्च कार्य्यान्वितस्वार्थप्रतिपादकतयेतरान्वितस्वार्थकार्य्यप्रतिपादकतया वेति । एवं कार्य्यान्वितव्युत्पत्तौ सत्यामनाकाङ्क्षादौ व्यभिचारादाकाङ्क्षादरुपाधित्वम् । तयोश्चोपजीव्यप्रथमभाविकार्य्यान्वितव्युत्पत्त्यनुरोधेन सिद्धस्थलेऽपि कार्य्याध्याहारः । कश्चित्तु तथा च पदसङ्गतिग्रह इति सिद्धार्थेऽन्वयप्रतीतिदर्शनादुत्तरकालमन्वितमात्रे शक्तिरेव कल्प्यतां प्राचीनकार्य्यान्वितज्ञानं बाध्यतामित्यप्यतएव निरस्तं पूर्व्वकल्पनात् कल्पनान्तरप्रसङ्गाच्च । उत्तरकालभाविसिद्धार्थप्रयोगस्य लक्षणादिभिरप्युपपत्तेरनन्यथासिद्धत्वाभावेन प्राचीनज्ञानाबाधकत्वात् उपजीव्यव्याघाताच्च । अथ सिद्धार्थेऽपि व्युत्पत्तिः सम्भवति तथाहि उपलब्धचैत्रपुत्रजन्मा वामसाहगेनैव वार्त्ताहारेण चैत्रसमीपं गतः-चैत्र ! पुत्रस्ते जात इति वार्त्ताहारवाक्यं शृण्वन् चैत्रस्य मुखप्रसादं पश्यन् मोदहर्षमनुमिनोति । हर्षश्च तत्कारणं पुत्रजन्मज्ञानं कल्पयति उपस्थितत्वात् उपपादकत्वात् अन्योपस्थितौ गौरवाच्च तत्र वाक्यस्य कारणतां कल्पयति लाघवादिति चेत् न हर्षहेतूनां बहूनां सम्भवात् हर्षेण लिङ्गेन पुत्रजन्मज्ञानस्य वाचेनानुमातुमशक्यत्वात् प्रियान्तरज्ञानस्य परिशेषयितुमशक्यत्वात् । अथ पुत्रजन्मज्ञानाव्यभिचारि वृद्धिश्राद्धादिक्रियाविशेषदर्शनात् पुत्रजन्मज्ञानानुमानमिति चेत् तर्हि पुत्रस्ते जात इति वाक्यं तत्तत्क्रियाकर्त्तव्यतापरमेवेति कार्य्यान्वितज्ञानजनकत्वमेव तस्य प्रथमतो ग्रहात् तदुत्तरकालं पुत्रजन्मज्ञानानुमानमिति न व्युत्पत्तिः कथं सङ्गतिः । यत्रापि [illegible] दिक्कोटौ न.ति प्रसिद्धार्थकपदसामानाधिकरण्यादिभिर्व्युत्पत्तिसत्यपि व्यवहाराधीनव्युत्पत्तिपूर्व्विका कार्य्यान्वित एव युक्ता पिकपदशक्तिः । पूर्व्वं नास्तीति चेत् तत्रापि पिकमानयेत्यादौ कथञ्चित् कार्य्यान्वित एव व्युत्पत्तेरुपजीव्यसजातीयतया च तस्यावलम्बनम् । किञ्चेदमपि पदं कार्य्यान्वितज्ञानजनकं पदत्वादिति सामान्यतोऽवगत विशेषतार्थ्ये पर नाधिगत स इदानीं सुहृदुपदेशादिभिरवगम्यते । अत सिद्धप्रवृत्तिपराणां शब्दानां प्रवर्त्तकज्ञानजनकता तच्च क्वचित् साक्षात् क्वचित् परम्परया, कार्य्यान्वयात् कार्य्यान्वितस्वार्थबोधकमिति । यत्र पुराणभारतादिपाठे फलश्रुतिरस्ति तत्रार्थवादकल्पितविधिशेषीभूतत्वेन प्रवृत्तिपरत्वेन तेषामिति परम्परया कार्य्यान्वयः न कार्य्यान्वितस्वार्थबोधकत्व स्वरूपाख्यानपराणान्तु काव्यनाटकादीनां पदार्थसंसर्गाग्रहेण संसर्गव्यवहारो न संसर्गग्रह इति ।

तदेतन्मतं पूर्व्वपक्षत्वेनोक्त्वा मणिकृता निराकृतं यथा— "अत्रोच्यते घटमानयेति वाक्यश्रवणानन्तरं प्रयोज्यस्य घटानयनगोचरप्रवृत्त्या घटानयनकार्य्यताज्ञानमनुमितं बालेन न तु कार्य्यान्वितज्ञानं प्रवृत्तिविशेषे तस्याऽहेतुत्वात् विषयादिपदशक्तिग्रहे तस्यानुपयोगाच्च तत्र च ज्ञानविशेषे घटमानयेति वाक्यविशेषस्यावाक्रान्तपदविभागस्य हेतुत्वमवधार्य्य घटपदादिवाचकविधिप्रत्ययानां प्रत्येकावापोद्वापेण घटकर्म्मानयनकार्य्यत्वज्ञाने प्रत्येकं कारणत्वमवगम्य शक्तिं कल्पयति । पश्चात् प्रवृत्तिसामान्येनानुमितकार्य्यतान्वितज्ञाने वाक्यमात्रस्यान्यलभ्यत्वेन कार्य्यावगमपहायान्वितज्ञानमात्रे शक्तिं कल्पयति न तु प्रथमं वाक्यमात्रस्य कार्य्यान्वितज्ञानमात्रहेतुत्वकल्पनम् ।

अथ घटानयनक्रियायां प्रथमं क्रियात्वज्ञानात् प्रवृत्तिमात्रानुमानं न तु कार्य्यान्वितज्ञानमनुमाय तत्र वाक्यमात्रस्य हेतुत्वं कल्पयित्वा शक्तिं कल्पयति तदुत्तरं विशेषयोः कार्य्यकारणभाव इति चेत् न प्रथमं प्रवृत्तिमात्रकार्य्यान्वितज्ञानमात्रयोरनुमानं बालस्य क्रमशो भवत इत्यत्र मानाभावात् घटादिपदशक्तिग्रहस्य तेन विनापि सम्भवात न च तदनुमानसामग्री तदा वृत्तेति वाच्यम् तदा व्याप्त्यादिस्मृतौ मानाभावात् सामान्ययोः कार्य्यकारणभावग्रहो विशेषयोस्तद्ग्रहे हेतुरिति चेत् न विशेषयोरन्वयव्यतिरेकाभ्यामेव तद्ग्रहात् यथा धूमवह्निविशेषयोः कार्य्यकारणभावग्रहे तत्सामान्ययोरपि हेतुहेतुमद्भावा गृह्यते अन्यथा न तद्ग्रहणमत्रा व्याप्ति

[illegible]

[illegible]

शक्तिर्न स्यादेव प्रयोज्यमानहेतुना सङ्गत्वात्। आप्तस्यैवाभिहितशब्दानुविधानस्य च तुल्यत्वात् अन्यविशेषणानामपि स्थानेऽपि वा तदुपस्थितिनियमे मानाभावात् सन्देहाभावोपपत्तेः लिङ्गाभासजन्यकार्य्यानुमानवत् शब्दादनुमितिरूपैव लिङ्गेन पुत्रजन्मसामान्यानुमानसम्भवात्। तथाभासत्वे मानुमितेर्भ्रमत्वे तद्वैपरीत्यापत्तौ भ्रम, विषयस्य तथाभावेन तयोर्यथार्थत्वात्। यथा कश्चित् स्वयमस्वाराधिष्ठित चाटुपुत्रक घटमानयेति निगृहीतं न च समानयति तदा चेतनव्यवहारादिवत् तद्बोधो बालो व्युत्पद्यते—इयं क्रिया, कृतिजन्या, सा ज्ञानजन्या, ज्ञानं तद्वाक्यजन्यमित्यनुमितिपरम्परायां भ्रमत्वेऽपि शब्दत्व शक्तिग्रहः तज्जन्यशाब्दबोधश्च यथार्थ एव विषयस्य तथाभावादिति सिद्धं सिद्धार्थे शक्तिग्रह इति। अतएव यत्र दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपनीतञ्च तत् सुखं स्वःपदास्पदम्" इत्यर्थवादोपस्थिते सुखे वेदादेव स्वर्गपदस्य शक्तिग्रहः"।

कार्य्यिन् त्रि० कार्य्यमस्त्यस्य इनि १कार्य्ययुक्ते २कार्य्यार्थिनि (उमेदार) व्याकरणोक्ते ३आदेशस्थानिनि च "कार्य्यमनुभवन् हि कार्य्यी निमित्ततया नाश्रीयते" परिभा० १ अत्र कार्य्यीति निर्देशात् "एकाक्षरात् कृतो जाते सप्तम्याश्च न तौ (इनिठनौ) स्मृतौ" इत्युक्तिरप्यनित्या। ततः मतुप् मस्य व कार्य्यवत्। ठन् कार्य्यिक-तदर्थे त्रि०। तत्र इनौ मतुपि च स्त्रियां ङीप्।

कार्शकेय पु स्त्री कृशकस्यापत्यं बा० ढञ्। कृशकर्षेरपत्ये ऋषिभेदे स्त्रियां ङीप् "कार्शकेयीपुत्रात् कार्शकेयीपुत्र" शत० ब्रा० १४,९,४ ३३, वंश ब्राह्मणे।

कार्शाश्वीय त्रि० कृशाश्वेन निर्वृत्तादि कृशाश्वा० चतुरर्थ्यां छण्। कृशाश्वनिर्वृत्तादौ।

कार्श्मरी स्त्री कृश-स्वार्थे णिच्-भावे मनिन् कार्श्म तत् राति रा-क गौरा० ङीप्। श्रीपर्णीवृक्षे कर्के २गाम्भारीवृक्षे भरत।

कार्श्य न० कृशस्य भावः ष्यञ्। १कृशत्वे "निर्बन्धसञ्जातरुषार्थकार्श्यम्" रघु। स्वार्थे ष्यञ्। २कृशे ३शालवृक्षे, ४कर्चूरे (कैश्वो) पु० ५कचूरे च पु० राजनि०।

कार्ष त्रि० कृषि शीलनस्य छत्रा० ण। कृषिशीले कृषीवले भरत।

कार्षापण पु न० कर्षस्येदम् स्वार्थे वा अण्। तेन आपणायते आ+पण—कर्म्मणि घ। १अशीतिरत्तिके ताम्रिके कर्षे 'कार्षापणस्तु विज्ञेय कार्षिकस्ताम्रिक पण' मनु। २षोडशपणात्मके पुराणे (काहन) इति ख्याते मानभेदे। "माष षोडशभागस्तु ज्ञेय कार्षापणस्य तु। काकिणी (गण्डि) तु चतुर्भागो माषस्य परिकीर्त्तिता। पञ्चनद्याः प्रदेशे तु सञ्ज्ञेय व्यावहारिकी। कार्षापणप्रमाणन्तु निबन्धनम् (परिभाषितम्) इहैव तत्" कात्या० स्मृ० "षोडशेन्यत्र ईषाद्री विंशतीति पाठ। अतएव 'द्वात्रिंशत्पणिका गाथो पञ्च पौराणिकोभवेत्" कात्या० स्मृतौ पुराणद्वयपञ्चद्वात्रिंशत्पणानां न मूल्यत्वे नाभिधानम्। "अशीतिभिर्वराटकैः पण इत्यभिधीयते। ते षोडश पुराण स्यात् रजत सप्तभिस्तु तैः" भविष्यपु०। "कार्षापणैस्त्रमूल्या हि दरिद्राणां प्रकीर्त्तिता" प्रा० त०। "कार्षापण भवेद्दण्ड्यो यत्रान्य प्राकृतोजन। तत्र राजा भवेद्दण्ड्य सहस्रमिति धारणा" "अक्षारलवणान्नाशी स्यादथोऽसमापदि। स द्वौ कार्षापणौ दद्यात्" मनुः। 'कार्षापणो दक्षिणस्यां दिशि रौप्य प्रवर्त्तते। पणोनिबद्ध पूर्व्वस्यां षोडशैव पणा पणम्। इति नारदोक्ते ३दक्षिणदेशप्रसिद्धे पूर्व्वदेशप्रसिद्धपण परिमाणे च। कार्षापणेन क्रीत टिठन् वा प्रतिरादेशश्च इदन्तारणार्थे कार्षापणिक पक्षे प्रतिक तत्क्रीते त्रि० स्त्रियां ङीप्। कार्षापणिकी प्रतिकी अध्यर्द्धपूर्व्वात् द्विगोश्च तस्य वा लुक्। अध्यर्द्धकार्षापण अध्यर्द्धकार्षापणिक सार्द्धकार्षापणक्रीते एवं द्विकार्षापण द्विकार्षापणिक कार्षापणद्वयक्रीते त्रि०। पद्मादिपाठात् स्वार्थेऽण्। कार्षापण कार्षापणसभजीविषु त्रि० सि० कौ०।

कार्षि त्रि० कर्षतीति कृष तत स्वार्थे बा० इञ्। १कर्षण शीले २अन्तर्गतमलापनेतरि। 'कार्षिरसि समुद्रस्य त्वा क्षित्या उन्नयामि" यजु० ६,२८। कर्षतीत्यवशोध्य कार्षि अन्तर्गतमलस्यापनेतासि" वेददी० "कार्षिरसीत्याह शमलमेवासायपप्लावयति" तैत्ति०।

कार्षिक त्रि० कर्ष मित्यमर्हति छेदा० ठञ्। १नित्यकर्षणार्हे कर्षेण क्रीत ठञ्। १कर्षेण क्रीते। तत्परिमाणमस्य ठक्। ३कर्षपरिमाणयुक्ते। कर्ष कर्षण शीलमस्य ठक्। ४कृषके हेमच०। स्वार्थे ठक्। ५कर्षपरिमाणे। "ताम्रिक कार्षिक पण" मनु।

कार्ष्ठ्य न० कटस्य भावः इढा० ष्यञ्। कटत्वे पक्षे इमनिच् कटिमन् तदर्थे पु०। षित्त्वात् स्त्रियां ङीप्यलोपौ।

कार्ष्ण त्रि० कृष्णस्येदम् अण्। १कृष्णसम्बन्धिनि। "कार्ष्णरौरव-वास्तानि चर्म्माणि ब्रह्मचारिण" मनु। २कृष्णद्वैपायन-सम्बन्धिनि च "कार्ष्णं वेदमिमं विद्वान् श्रावयित्वार्थम् श्नुते" भा० आ० प० १अ०। कृष्णोदेवतास्य अण्। ३कृष्णस्य-

[illegible]

सूर्यगतयो विशेषणतामनुभवन्ति । न च स्वरूपप्रत्ययासन्ना एव ता तथाऽऽहैतादृशविशिष्टप्रत्ययान्यथानुपपत्त्या विशेषणप्रापक यद् द्रव्यं स कालः" उपस्कारवृत्तिः ।

"ननु विभुत काल, स तु नित्यो द्रव्यं वेति न प्रमाणमत आह" ।

"द्रव्यत्वनित्यत्वे वायुना व्याख्याते" क०सू० ।

"यथा वायुपरमाणोर्गुणवत्त्वाद्द्रव्यत्वम् अद्रव्यद्रव्यत्वाच्च नित्यत्वं तथा कालस्यापीत्यर्थः" उप० ।

"तथापि सन्तु बहव काला इत्यत आह" ।

"तत्त्वम्भावेन" क०सू० ।

व्याख्यातमिति विपरिणतेनान्वयः । यथाऽऽदिमत्त्वमात्मा कालविङ्गाना सर्वत्राविशेषादनेकत्वेऽप्यनुमानाभिव विशेषलिङ्गाभावात् सत्तावदेकत्वं कालस्येत्यर्थः । नन्वेवं क्षणलवमुहूर्त्तयामदिवसाहोरात्रपक्षमासर्त्त्वयनसंवत्सरादिभेदेन भूयांस कालाःसन्ति कथमेक इति चेन्न भेदमानस्य उपाधिभेदप्रभवत्वात् यथा एक एव स्फटिकमणिर्ज्जवातापिञ्छाद्युपाध्यपरागेण भिन्न इव भासते तथैक एव काल सूर्यस्पन्दाद्युपच्छेदभेदेन तत्तत्कार्यविच्छेदकभेदेन च भिन्न इव भासत इत्युपगमात् तथाच कालोपाध्यव्यापकः कालोपाधिः, स्वाधेयकादाचित्कभावप्रतियोग्यनाधार कालो वा क्षणः प्रतिक्षणं कस्यचिदुत्पत्तेः कस्यचिद्विनाशादेव व्यवसेयम् । क्षणद्वयस्तु लव इत्याद्यागमप्रसिद्धम् । ननु तथाप्यतीतानागतवर्त्तमानभेदेन कालत्रयस्तु, श्रूयते हि 'त्रैकाल्यमुपावर्त्तते' "त्रैकाल्यासिद्धे " इत्यादौ इति चेन्न त्रैकाल्यव्यवहारात् येन हि वस्तुना य कालोऽवच्छिद्यते स तस्य वर्त्तमान यत्प्रागभावेन य कालोऽवच्छिद्यते स तस्य भविष्यत्कालः यत्प्रध्वंसेन य कालोऽवच्छिद्यते स तस्यातीतकाल तथाचावच्छेदकत्रित्वाधीन कालत्रित्वव्यवहार " उपस्कारवृत्ति ।

"इदानीं सर्वोत्पत्तिमतां कालः कारणमित्याह" ।

"नित्येष्वभावादनित्येषु भावात् कारणे कालाख्येति" क०सू०।

इतिशब्दो हेतौ इतिहेतो कारणे-सर्वोत्पत्तिमत्कारणे काल इत्याख्या । हेतुमाह नित्येष्वभावात् अनित्येषु भावादिति नित्येषु आकाशादिषु युगपज्जात चिरजातः क्षिप्र जात इदानीं जात दिवा जात रात्रौ जात इत्यादिप्रत्ययाभावात् अनित्येषु घटपटादिषु यौगपद्यादिप्रत्ययानां भावात् अन्वयव्यतिरेकाभ्यां कारणं काल इत्यथः । न केवलं यौगपद्यादिप्रत्ययबलात् कालस्य सर्वोत्पत्तिमन्निमित्तकारणत्वम् अपि तु पुष्पफलादीनां हैमन्तिकवासन्तिकप्रावृषेण्यादिभावबलादेव तदध्यवसेयम्" उप० ।

भाषापरिच्छेदयोश्च संक्षेपेण तन्निरूपणं यथा

"जन्यानां जनक कालो जगतामाश्रयो मतः ।"

"परापरत्वधीहेतु क्षणादि स्यादुपाधितः" भाषा ।

"कालं निरूपयति जन्यानामिति तत्र प्रमाणं दर्शयितुमाह जगतामिति तथाहि इदानीं घट इत्यादिप्रतीति सूर्यपरिस्पन्दादिकं यदि विषयीकरोति तदा सूर्यपरिस्पन्दादिना घटादे सम्बन्धोवाच्य स च संयोगादिर्न सम्भवतीति कालएव तत्सम्बन्धघटक कल्प्यते इत्थञ्च तस्याश्रयत्वमपि सम्यक् । प्रमाणान्तर दर्शयति परापरत्वेति परत्वापरत्वबुद्धेरसाधारणं निमित्त काल एव परत्वापरत्वयोरसमवायिकारणसंयोगाश्रयोवा घटादतिरिक्त कल्प्यत इति भाव । नन्वेकस्य कालस्य सिद्धौ क्षणदिनमासवर्षादिसमयभेदोन स्यादत आह क्षणादिरिति कालस्त्वेकोऽपि उपाधिभेदात् क्षणादिव्यवहारविषय । उपाधिस्तु स्वजन्यविभागप्रागभावावच्छिन्न कर्म, पूर्व्वसंयोगावच्छिन्नविभागो वा पूर्व्वसंयोगावच्छिन्नोत्तरसंयोगप्रागभावो वा उत्तरसंयोगावच्छिन्नं कर्म्म वा । नचोत्तरसंयोगानन्तरं क्षणव्यवहारो न स्यादिति वाच्यं कर्म्मान्तरसत्त्वादिति । महाप्रलये क्षणादिव्यवहारोयद्यपि, तदाऽभावात्तु ध्वंसेनोपपादनीय । दिनादिव्यवहारस्तु तत्तत्क्षणकूटैरेवेति" मुक्तावली ।

तार्किकशिरोमणिना रघुनाथशिरोमणिना च पदार्थनिरूपणप्रकरणे "तत्र दिक्कालौ नेश्वरादतिरिच्येते" इति वदता विभुरूपस्यैकस्य कालस्य खण्डनं कृतम् । रघुदेवरामभद्राभ्यां तद्विवृत तत्र अस्मिन् पदार्थतत्त्वसारे च जयनारायणतर्कपञ्चाननेन दर्शित यथा

"दिक्कालौ नेश्वरादतिरिच्येते प्राच्यां घट इदानीं घट इत्यादिव्यवहारस्य ईश्वरात्मकविभुविषयकत्वेनैवोपपत्ते, नच तयोर्भिन्नविषयकत्वमनुभवसिद्धमिति वाच्यं तथा सति प्राच्यां घटः प्रतीच्यां घट' इदानीं घट तदानीं घट इत्यादेरपि भिन्नभिन्नविषयकत्वानुभवात् कालदिशोरपि बहुत्वाङ्गीकारप्रसङ्गात्, तथा च उपाधिभेदादेकया दिशा एकेन कालेन च यथा भवतां बहूनां व्यवहाराणामुपपत्ति तथाऽस्माकमपि एकेनेश्वरेणागमानुमानाभ्यां सिद्धेन सर्व्वेषामेव तादृशव्यवहाराणामुपाधिभेदादुपपत्ति सम्भवति,

[illegible]

व्यवहारादीनां चाक्षुषत्वेन तेष्वपि भवत्पक्षे प्रत्ये-
ऽन वार्य्यते? । यद्यन्ये विशेष्य “समष्टेरपि सुखदुःख-
मोहात्मकत्वेन गुणत्रयान्तर्गतत्वं दृश्यं सर्वात्मकत्वं च प्रत्य-
क्षते तर्हि कालस्याप्यसौ न दण्डवारित इति युक्ति
समाधत्स्व । कालस्य गुणत्रयपरिणामत्वे सावयवत्वम-
नित्यता च घटादेरिव प्रसज्येतेति चेत् ? निरवयव-
त्वाद्यवस्थानिवेशनतो वैशेषिकादेः पतत्येव दण्डप्रहार-
निरपि । वेदवादिनां तु न कापि क्षतिः । कालस्योत्-
पत्तिविनाशयोः प्रत्यक्षश्रुतावुपलभ्यमानत्वात् । तैत्ति-
रीयशाखायां नारायणीये कालोत्पत्तिराम्नायते “सर्वे
निमेषा जज्ञिरे विद्युतः पुरुषादधि कलामुहूर्त्ताः काष्ठा-
श्चाहोरात्राश्च सर्वशः । अर्द्धमासा मासा ऋतवः संव-
त्सरश्च कल्पन्तामिति” तस्यामेव शाखायामारुणकेतुकचयन
ब्राह्मणे सावित्रस्य चयने उक्तो वेदो मासाश्च च सा-
वत्सराभिनः पतीच्छ्येपिति” । इतोऽस्मादनुवाकात्मनो
ऽपि च यत्नेन व्यवस्थेव कालाभिमानिनां स्वरूपं व्याख्यातो
भेद उक्तः बहुमाया चोक्तानीयथ । नित्यत्वनिरवयव-
त्वाभिधायिनो वैशेषिकादिशास्त्रस्य “अस्तता देवता” इति
वदापेक्षिकनित्यतायामन्तर्भावगत्या पेयचरावलाद्वत् स-
मर्थयोग्यादयवस्थान्यतया च तात्पर्य्यं वर्णनीयम् ।

“अथ मन्यसे महता तपसा शिवमाराध्य तत्प्रसाद
लब्धसर्वतत्त्वपदः कणादमुनिर्यदाह तदर्थं सम्यगवैत्तीति वेद-
स्येव मन्दमतिप्रतीतादर्थादर्थान्तरं नेतव्यमिति । एवमपि
यस्य प्रसादादयं सर्वज्ञतामलभत स एव शिवो मुख्यः
सर्वज्ञ इति तन्मतानुसारेण कणादमतस्यैवान्यथानयनम-
स्त्वनुचितम् । शिवो हि शैवेषु आगमेषु पटति षट्-
त्रिंशत्तत्त्वानि निरूपयन् कालतत्त्वस्योत्पत्तिमङ्गीचकार ।
निखिलशैवागमसारमार्य्याभिः सङ्क्षिपन् भोजराज
पुरारि पञ्च तत्त्वानि शिवशक्तिसदाशिवेश्वरविद्याख्यानि
निर्दिश्येतराणि निर्दिशन्मायाकार्य्यतोक्तिपूर्वकमेव काल-
निरदिशत् “पुंसो जगत् सतये मायातत्त्वसम्भवं भवति ।
कालो नियतिश्च तथा कला च विद्या च रागश्च” इति
तानि मायाषट्कान्त्यैकादश तत्त्वानि सांख्यप्रसिद्धपञ्च-
विंशतितत्त्वानि चोद्दिश्य विदलयन्निदमाह ‘माया
विभवात्मिका सा जनयति कालतत्त्वमेवादौ । भावि भवद्-
भूतमयं कलयति जगदेव कालोऽतः” इति । तट्टीकाकार
इत्थं व्याचख्यौ । ‘अन्येष कालो नैयायिकादिभिर्नित्यो
ऽभ्युपगतः अत एवाह भाविभवद्भूतमयमिति । भूतादि

रूपेण त्रिविधत्वात् अनेकत्वमनित्यत्वञ्च सिद्धमिति
भावः । केन कार्य्येणास्य सिद्धिरित्याह “कलयति जगदेव
कालोऽतः” इति । क्षिप्राक्षिप्रादिप्रत्ययोपाधिद्वारेण कल-
यत्याच्छादयत्यर्थः” इति । इत्थं प्रत्यक्षश्रुतिसङ्कलनेनापि
कणादशास्त्रस्य बाधे सति उत्तरमीमांसागतद्वितीया-
ध्यायप्रथमाधिकरणन्यायोऽनुसर्त्तव्यः तस्य च न्यायस्य
सङ्ग्राहकौ श्लोकौ “सांख्यस्मृत्यास्ति सङ्कोचो न वा वेदस-
मन्वये । धर्म्मे वेदस्यावकाश सङ्कोच्योऽनवकाशया । प्रत्य-
क्षश्रुतिमूलाभिर्मन्वादिस्मृतिभिः स्मृतिः अमूला कापिला
बाध्या न सङ्कोचोऽनया ततः” इति । अयमर्थः । ऋग्वे-
दादिभिरग्निहोत्रादिधर्म्मो ब्रह्मणो जगत्कारणत्वञ्च प्रति-
पाद्यते । सांख्यस्मृतिस्तु प्रधानस्य जगत्कारणत्वं
प्रतिपादयति तत्र तया स्मृत्या वेदस्य सङ्कोचोऽस्ति न
वेति संशये स्मृतेर्जगत्कारणत्वमन्तरेणानवकाशत्वात् प्राबल्यं
वेदस्य तु धर्म्मेऽपि चरितार्थत्वाद्दौर्बल्यम् । ततः स्मृत्य-
नुसारेण वेदः सङ्कुचित इति पूर्व्वः पक्षः । प्रत्यक्षश्रुतिभि-
र्वह्वीभिरनुमितश्रुतिमूलाभिर्मन्वादिस्मृतिभिः ब्रह्मकारणता-
माप्यते सांख्यस्मृतिस्त्वेका मूलहीना चेति दुर्बलत्वात्
सैव बाध्या अतो नास्ति वेदस्य सङ्कोच इति सिद्धान्त
इति । अथ तार्किकाभिमानपक्षपाते सत्यपि सन् परमार्थ
एवं ब्रूषे भूतादीनामौपाधिकानां कालविशेषाणामेवो-
त्पत्तिर्न तु निरुपाधिकस्य मुख्यस्य कालस्येति तर्हि
आपदिक्षाम्येवाय महत्तत्त्वचिन्तामपि मलमतिर्येवावि
रामायण मोक्षस्याभावकस्य तमेव विषयोऽभूत् । अतः साध-
र्म्यवैधर्म्म्यज्ञानाय द्रव्य दीन्यभिधायन् परमभूततत्त्वमथागम ।
व्यवहारहेतूनां भूतादिकालविशेषाणामाधारस्तत्त्वं व्या-
ख्यातोऽनित्यो निरवयवो मुख्योऽयं कालः स परमा-
त्मैव । तथा च श्वेताश्वतरा आमनन्ति । “य कालकालो
गुणी सर्व्वविद्य” इति । आस्तां नित्यानित्यत्वसावयवत्व-
चिन्ता । सर्व्वथाप्यस्ति सांख्यतत्त्वेषु आर्थिकः कालसंग्रहः
आख्यातः यज्ञाभावस्तु ज्योतिष्टोमादिवत् प्रकृतिपुरुष-
विवेकानुपयोगादित्यवगन्तव्यम् । तृतीयचतुर्थपञ्चमौ तु मतौ
वैशेषिकपरिच्छयगन्धोऽपि नास्तीति प्रकटयतः । वैशेषिक
ग्रन्थेषु सर्व्वेष्वपि कालप्रकरणेषु तल्लक्षणस्य तत्साधकानुमा-
नस्य च पर्य्याप्तत्वात् प्रमाणान्तराणि तु कालसाधकानि
दृश्यैरोपन्यस्तानि तथा च तैत्तिरीया आरुणकेतुके
मन्त्रमामनन्ति ‘स्मृतिः प्रत्यक्षमैतिह्यम् अनुमानश्चतुष्टयम् ।
एतैरादित्यमण्डलं सर्व्वैरेव विधास्यते’ इति । तत्र स्मृति

[illegible]

[illegible]

तस्य धर्मानुष्ठानेऽप्युपेक्षत्वेन हेयत्वादनुपादेयत्वाच्च । यस्त्वीश्वरो मासपक्षतिथ्यादिरूपः सोऽपि ज्योतिःशास्त्रे सम्यङ्निर्णीत इति एतमनया कालनिर्णयमप्रत्यक्षोऽति माधवे नून उभयमप्यत्र निर्णेतव्यं कालकालस्य जगदीश्वरस्य सर्वेषु कर्मारम्भेषु अनुसर्त्तव्यत्वात् अतएव शिष्टाः पुण्याहवाचनादावीश्वरमनुस्मरन्ति । "सर्वेषु कालेषु समस्तदेशेष्वशेषकार्येषु तथेश्वरेश्वर । सर्वैः स्वरूपैर्भगवाननादिमानमासु माङ्गल्यविवृद्धये हरि । यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतमिति" । मासादिरूपभेदस्य तु स्वरूपेण ज्योतिषे निर्णीतत्वेऽपि श्रौतस्मार्त्तकर्मविशेषेण सह कालस्याङ्गाङ्गिभावो निर्णेतव्य । यद्यप्यसौ हेमाद्रिप्रभृतिषु अन्येषु निर्णीतस्तथाप्यनेकत्र विप्रकीर्णस्यैकत्र सम्पादनेनात्र यत्न क्रियते । तदेवं चिकीर्षितस्य ग्रन्थस्य कालरूपो विषय संग्रहरूप प्रयोजनं चास्तीति अथ ग्रन्थ आरभ्यते" । "नित्यो जन्यश्च कालौ द्वौ तयोराद्यः परेश्वर । सोऽखण्ड नमवगम्योऽपि दृश्यो भक्तानुकम्पया" नित्यकालस्य परमेश्वरत्वे प्रमाणं पूर्वमेवोपन्यस्तम् । परमेश्वरस्य वाङ्मानसागोचरत्वे सर्वे वेदान्तास्तदनुसारिस्मृतिपुराणानि तत्त्वविदनुभवश्च प्रमाणम् । भक्तानुग्राहिमूर्त्तिस्वीकारश्च तलवकाराख्ये सामवेदशाखाविशेषे कस्यांचिदाख्यायिकायामाम्नायते तथा ह्याख्यायिकायामेवमुक्तम्—अग्निवाय्विन्द्रादयो देवा ईश्वरानुग्रहेणैव सर्व्वत्र विजयमाना स्वकीयमेव तत्सामर्थ्यमित्यभिमन्यन्ते स्म । तान् बोधयितुमवाङ्मनसगम्यः परमेव ब्रह्म पूज्यां चतुर्वर्गप्रदां काञ्चिन्मूर्त्तिं च रचयित्वा प्रादुर्बभूव । तया सह वाद कृत्यापि राजसचित्तावग्निवायू तद्ब्रह्मतत्त्वं नैव बुबुधाते इन्द्रस्तु सात्त्विकचित्तो बुबुधे इति । वाशिष्ठरामायणेऽपि शुक्रोपाख्याने शुक्रं मृतमवलोक्य तत्पिता भृगुः क्रुद्धो मारयितारं कालं शशाप तदानीं कालोऽनुपचरितमोहरूपेण रूपेणाविर्बभूवेति पठ्यते "अथाकल्पितरूपोऽसौ काल कवचितमज्ज । आधिभौतिकमास्थाय वपुर्नियमितायतौ । षड्भुजायुधधर श्रीमान् कराङ्गी कवचान्वित । ऋतुषट्कमयोदारवक्त्रषट्कसमन्वित । मासद्वादशकोद्दामभुजद्वादशकोत्कट । स्वाकारसमया सहसा सृतः किङ्करसेनया । स उपेत्य प्रशस्यादौ कुपितं तं महामुनिम् । कल्पक्षुब्धाब्धिगम्भीर सान्त्वपूर्व्वमुवाच ह । समाश्वसनतया विप्र । वयं नियतिपालका तेन सम्पूज्यसे पूज्य । साधो । नेतरपीठया । मा तप क्षपयाऽस्यु । कल्पकान्तमहानलं । यो न दग्धोऽग्नि मे तस्य किं त्वं शापेन धक्ष्यसि ? । महाकल्पाग्नयो येन निगीर्णा रुद्रकोटय । भुक्तानि विष्णुवृन्दानि केन नाम वद मुने । भोक्तारो हि वयं मुग्धान् भोजनं युष्मदादयः । स्वयं नियतिरेषा हि नावयोरेतदोचितमिति" । न च भक्तानुग्रहाय स्वीकृता मूर्त्तिरीश्वरस्येति कश्चिन्नियमोऽस्ति सर्वात्मकस्य परमेश्वरस्य भक्ताभिरुचितयायाः सर्वस्या अपि मूर्त्तेः स्वकीयत्वात् अतएव भगवद्गीतायाम् "यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति । तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् । स तया श्रद्धया युक्तस्तस्याराधनमीहते । लभते च ततः कामान् मयैव विहितान् हितानिति" । विष्णुरुद्रादिरूपा चेतनमूर्त्तयोऽपि तत्तत्फलविशेषार्थिभिरीश्वरत्वेनोपास्या । तदेतद्वेदे समाम्नायते । "एत ह्येव बह्वृचा महत्युक्थे मीमांसन्ते एतमग्नावध्वर्यव, एतं महाव्रते छन्दोगा, एतमस्याम् (पृथिव्याम्) एतं दिव्येतं वायावेतमाकाशे एतमोषधीषु एत वनस्पतिष्वेतं चन्द्रमस्येतं नक्षत्रेष्वेतं सर्वेषु भूतेष्विति" वाजसनेयिनोऽपि मण्डलब्राह्मणे "तमेतमग्निरित्यध्वर्यव उपासते इत्यारभ्य पठन्ति "विषमिति सर्पा, सर्प इति सर्पविद, ऊर्गिति देवाः, रयिरिति मनुष्या, मायेत्यसुरा, स्वधेति पितरो देवजन इति देवजनविदो रूपमिति गन्धर्वा, गन्ध इत्यप्सरस तं यथा यथोपासते तदेव भवतीति" । तैत्तिरीयाश्च पठन्ति "क्षेम इति वाचि योगक्षेमम् इति प्राणापानयोरित्यादि" । परब्रह्मण्यारोपितं यद्यावज्जगद्रूपम् अस्ति तेन सर्व्वेण रूपेणोपासनया परमेश्वरो रूपवानभवतीति हिरण्मयाधिकरणतेजोमयाधिकरणयो सर्वाशितम् । एव च सति यो यदा यत्कर्मारभते स तदा तत्कर्मोपयुक्तां कालात्मकस्येश्वरस्य मूर्त्तिमिष्टदेवतारूपेणानुस्मरेत् । अत एव मन्त्रशास्त्रेषु नानाविधानि ध्यानान्युपदिष्टानि । लोकेऽप्याविद्वद्गोपालाङ्गनं सर्वोऽपि जन एकैकां देवतां स्वेच्छया पूजयति तदेतद्भगवानाह "यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसा प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः" इति तस्मादारभ्यमाणकर्मफलप्रदो निजेष्टदेवतारूपो नित्य कालः कर्मारम्भेषु अनुस्मर्त्तव्य इति सिद्धम् ।

अथ जन्य कालं निरूपयाम । ननु कालस्य जन्यत्वे सति कथं प्रलये कालव्यवहार । प्रलयत्वस्य जन्यानधिकरणस्वरूपत्वात् । प्रलयोऽतीतः प्रलयो भावीति ... अनित्य ... ऽपि समो दोष । नित्यस्य कालस्य

[illegible]

तस्य धर्मानुष्ठानेषूहेतुत्वेन ज्ञेयत्वादनुपादेयत्वाच्च। यस्त्वितरो मासपक्षतिथ्यादिरूपः सोऽपि ज्योतिःशास्त्रे सम्यङ्निर्णीत इति कृतमनया कालनिर्णयप्रश्नस्येति माधवः। उभयमप्यत्र निर्णेतव्यं कालकालस्य जगदीश्वरस्य सर्व्वेषु कर्मारम्भेषु अनुसर्त्तव्यत्वात्। अतएव शिष्टा पुराणाद्युपाख्यानादीश्वरमनुस्मरन्ति। "सर्व्वेषु कालेषु समस्तदेशेष्वशेषकार्य्येषु तथेश्वरेश्वर। सर्व्वं स्वरूपैर्भगवाननादिमान् ममास्तु माङ्गल्यविवृद्धये हरिः। यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु। न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतमिति"। मासादिरूपभेदस्य तु स्वरूपेण ज्योतिषे निर्णीतत्वेऽपि श्रौतस्मार्त्तकर्मविशेषेण सह कालस्याङ्गाङ्गिभावो निर्णेतव्यः। यद्यप्यसौ हेमाद्रिप्रभृतिषु ग्रन्थेषु निर्णीतस्तथाप्यनेकत्र विप्रकीर्णस्यैकत्र सङ्ग्रहार्थमत्र यत्नः क्रियते। तदेव चिकीर्षितस्य ग्रन्थस्य कालरूपो विषयः सम्बन्धरूपं प्रयोजनं चास्तीति अथ ग्रन्थ आरभ्यते"। "नित्यो जन्यश्च कालौ द्वौ तयोराद्यः परेश्वरः। सोऽयाति नत्यगस्योऽपि देहो भक्तानुकम्पया" नित्यकालस्य परमेश्वरत्वे प्रमाणं पूर्व्वमेवोपन्यस्तम्। परमेश्वरस्य वाङ्मनसगोचरत्वे सर्व्वे वेदान्तास्तदनुसारिस्मृतिपुराणानि तत्त्वविदनुभवश्च प्रमाणम्। भक्तानुग्राहिमूर्त्तिस्वीकारश्च तत्प्रकाराश्चे सामवेदशाखाविशेषे तत्रैव चिदाख्यायिकाया माम्नायते तस्या आख्यायिकायामिदमुक्तम्—अग्निवायिन्द्रादयो देवा ईश्वरानुगृहीताः सर्व्वत्र विजयमाना स्वकीयमेव तत्सामर्थ्यमित्यभिमन्यन्ते स्म। तान् बोधयितुमवाङ्मनसगम्य परमेव ब्रह्म पूज्यां चक्षुर्गम्यां काञ्चिन्मूर्त्तिं स्वीकृत्य प्रादुर्बभूव। तदा सह याद कृत्यापि राजसविचारनिशायू तद्दुग्नज्ञातत्त्व मेव बुबुधाते इन्द्रस्तु सात्त्विकचित्तोबुबुधे इति। वासिष्ठरामायणेऽपि शुक्रोपाख्याने शुक्र मृतमवलोक्य तत्पिता भृगुः क्रुद्धो मारयितारं कालमनुशुशाप तदानीं कालोऽनुपदुम् तमोदयेन रूपेणाविर्बभूवेति पठ्यते "अथाकल्पितरूपोऽसौ कालः कवचितप्रभः। आधिभौतिकमास्थाय वपुर्ग्भिनिरुपाययौ। खड्गपाशधरः श्रीमान् कुण्डली कवचान्वितः। षड्भुजपट्कमयोदारवक्त्रपट्कसमन्वितः। मासद्वादशकोद्दामभुजद्वादशकोद्भटः। स्वाकारसमया यष्ट्या युतः किङ्करसेनया। स उपेत्य प्रथमं तदा कुपितं तं महामुनिम्। कल्पक्षुब्धाब्धिगम्भीरं सान्त्वपूर्व्वमुवाच ह। त्वमत्यन्ततपा विप्र। वय नियतिपालकाः तेन सम्पूज्यसे पूज्य। साधो। नेतरथेच्छया। मा

तप क्षपयाऽमुधा कल्पकालमहामते। यो न दग्धोऽस्मि मे तस्य किं त्वं शापेन धक्ष्यसि?। संसारावलयो यस्य निगीर्णारुद्रकोटयः। भुक्तानि विष्णुवृन्दानि केन यस्य वय मुने। भोक्तारो हि वयं ब्रह्मन् भोजनं युष्मदादय'। स्वयं नियतिरेषा हि नाववोरेतदोचितमिति"। न च भक्तानुजिघृक्षया स्वीकृता मूर्त्तिरीश्वरस्येति कश्चिन्नियमोऽस्ति सर्व्वात्मकस्य परमेश्वरस्य भक्तचित्तप्रियाया सर्व्वस्या अपि मूर्त्तेः स्वकीयत्वात् अतएव भगवद्गीतायाम् "यो यो यां यां तनुं भक्तः श्रद्धयार्च्चितुमिच्छति। तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम्। स तया श्रद्धया युक्तस्तस्याराधनमीहते। लभते च ततः कामान् मयैव विहितान् हितानिति"। विष्णुरुद्रादिवत् अचेतनमूर्त्तयोऽपि तत्तत्फलविशेषार्थिभिरीश्वरत्वेनोपास्याः। तदेतदृग्वेदे समाम्नायते। "एतं ह्येव बह्वृचा महत्युक्थे मीमांसन्त एतमग्नावध्वर्य्यव, एतं महाव्रते छन्दोगा, एतमस्याम् (पृथिव्याम्) एतं दिव्येतं वायावेतमाकाश एतमोषधीषु एतं वनस्पतिष्वेतं चन्द्रमस्येतं नक्षत्रेष्वेतं सर्व्वेषु भूतेष्विति" वाजसनेयिनोऽपि मत्स्यब्राह्मणे "तमेतमग्निमध्वर्य्यव उपासत इत्यारभ्य पठन्ति "विषमिति सर्पा, सर्प इति सर्पविद, ऊर्गिति देवा, रयिरिति मनुष्या, मायेत्यसुरा', स्वधेति पितरो, देवजन इति देवजनविदो रूपमिति गन्धर्व्वा, गन्धइत्यप्सरसस्त यथायथोपासते तदेव भवतीति"। तैत्तिरीयाश्च पठन्ति "क्षेम इति वाचि, योगक्षेमस् इति प्राणापानयोरित्यादि"। परब्रह्मण्यारोपितं यद्यावज्जगद्रूपम् अस्ति तेन सर्व्वेण व्युपासनया परमेश्वरो रूपवान्भवतीति हिरण्मयाधिकरणतेजोमयाधिकरणयोः प्रपञ्चितम्। एवं च सति यो यदा यत्कर्म्मारभते स तदा तत्कर्म्मोपयुक्तकालात्मकस्येश्वरस्य मूर्त्तिमिष्टदेवतारूपेणानुस्मरेत्। अतएव मन्त्रशास्त्रेषु नानाविधानि ध्यानान्युपदिष्टानि। लोकेऽप्यविद्वद्गोपालाङ्गनपर्य्यन्तोऽपि जन एकैकां देवतां स्वेच्छया पूजयति तदेतदभिप्रायमाह "यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः" इति तस्य आरभ्यमाणकर्म्मफलप्रदो नित्येष्टदेवतारूपो नित्यकालः कर्म्मारम्भेषु अनुस्मर्त्तव्य इति सिद्धम्।

अथ जन्यं कालं निरूपयामः। ननु कालस्य जन्यत्वे सति कथं प्रलये स व्यवहारः। प्रलयस्य जन्यानधिकरणस्वरूपत्वात्। प्रलयोऽतीतः प्रलयो भावीति कालनित्यसत्वाटिमित्ताच्चापि समोदोषः। नित्यस्य कालस्य

[illegible]

[illegible]

कालेपश्यवित्वेन सवतुरस्याभ्यर्हितत्वाद्ल्पाक्षरत्वतया सूचीकटाहन्यायानुसारेण च सत्र आदौ निर्दीयत-इतिस्थितम्” ।

सू० सि० रङ्ग० कालविभागश्चैत्थं प्रदर्शित

“लोकानामन्तकृत्कालः कालोऽन्यः कलनात्मकः । स द्विधा स्थूलसूक्ष्मत्वान्मूर्त्तश्चामूर्त्त उच्यते” सू० सि० ।

‘कालो द्विधा तत्रैकः कालोऽखण्डदण्डायमानः शास्त्रान्तरप्रमाणसिद्धः । लोकानां जीवानां सुपलक्षणाद्चेतनानामपि । अन्तकृद्विनाशकः । यद्यपि कालस्तेषामुत्पत्तिस्थितिकारकस्तथापि विनाशस्यानन्तत्वात् कालस्वप्रतिपादनाय चान्तकृदित्युक्तम् । अन्तकृदित्यनेनैवोत्पत्तिस्थितिकृदित्युक्तमन्यथा नाशकत्वासम्भवात् । अतएव “कालः सृजति भूतानि कालः संहरति प्रजाः” इत्याद्युक्तमन्यान्तरे । अन्यो द्वितीयः कालः खण्डकालः । कलनात्मको ज्ञानविषयस्वरूपः । ज्ञातुं शक्य इत्यर्थः । स द्वितीयः कलनात्मकः कालोऽपि द्विधा भेदद्वयात्मकः । तदाह स्थूलसूक्ष्मत्वादिति महत्त्वाणुत्वाभ्याम् । मूर्त्तः—इयत्तावच्छिन्नपरिमाणः । अमूर्त्तस्तद्भिन्नः कालस्तत्त्वविद्भिः कथ्यते । चकारो श्चैवक्रमेण मूर्त्तामूर्त्तक्रमार्थकः । तेन महान् मूर्त्तकालोऽपरमूर्त्तः काल इत्यर्थः । अथोक्तभेदद्वयं स्वरूपेण प्रदर्शयन् प्रथमभेदं प्रतिपिपादयिषुस्तदवान्तरभेदेषु भेदद्वयमाह” रङ्गनाथ ।

“प्राणादिः कथितो मूर्त्तस्त्रुट्याद्योऽमूर्त्तसंज्ञकः । षड्भिः प्राणैर्विनाडी स्यात् तत्षष्ट्या नाडिका स्मृता” सू० सि० ।

“प्राणः स्वस्थसुखासीनस्य श्वासोच्छ्वासान्तर्वर्ती कालो दशगुर्वक्षरोच्चार्यमाणः आदिर्यस्यैतादृशः प्राणमानान्तर्गतो मूर्त्तः काल उक्तः । त्रुटिराद्या यस्यैतादृशः काल एव प्राणान्तर्गततत्त्रुटितत्परादिकोऽमूर्त्तसंज्ञः । अथामूर्त्तस्य मूर्त्तादिभूतस्य व्यवहारायोग्यत्वेनाप्रधानतयानन्तरोद्दिष्टस्य भेदप्रतिपादनमुपेक्ष्य मूर्त्तकालस्य व्यवहारयोग्यत्वेन प्रधानतया प्रथमोद्दिष्टभेदान् विवक्षुः प्रथमं पलमध्याह । षड्भिरिति । षड्भिः प्राणैरसुभिः पानीयपलं भवति षष्टीनां षष्ट्या घटिकोक्ता कालतत्त्वज्ञैः । अथ दिनमासादिकमाह” रङ्ग० ।

‘नाडीषष्ट्या तु नाक्षत्रमहोरात्रं प्रकीर्तितम् । तत्त्रिंशता भवेन्मासः सावनोऽर्कोदयैस्तथा”।

“ऐन्दवस्तिथिभिस्तद्वत् सङ्क्रान्त्या सौर उच्यते । मासैर्द्वादशभिर्वर्षं दिव्यं तदह उच्यते” ।

“सुरासुराणामन्योऽन्यमहोरात्रं विपर्ययात् । तत्षष्टिः षड्गुणा ३६० दिव्यं वर्षमासुरमेव च” ।

“तद्द्वादशसहस्राणि चतुर्युगमुदाहृतम् । सूर्याब्दसंख्यया द्वित्रिसागरैरयुताहतैः ४३२०००० ” ।

“सन्ध्यासन्ध्यांशसहितं विज्ञेयं तच्चतुर्युगम् । कृतादीनां व्यवस्थेयं धर्मपादव्यवस्थया” ।

‘युगस्य दशमो भागश्चतुस्त्रिद्व्येकसङ्गुणः । क्रमात् कृतयुगादीनां, षष्ठांशः सन्ध्ययोः स्वकः’ ।

“युगानां सप्ततिः सैका मन्वन्तरमिहोच्यते । कृताब्दसंख्या १७२८००० तस्यान्ते सन्धिः प्रोक्तो जलप्लवः” ।

“ससन्धयस्ते मनवः कल्पे ज्ञेयाश्चतुर्दश । कृतप्रमाणः कल्पादौ सन्धिः पञ्चदश स्मृतः” ।

“इत्थं युगसहस्रेण भूतसंहारकारकः । कल्पो ब्राह्ममहः प्रोक्तं शर्वरी तस्य तावती” ।

“परमायुः शतं तस्य तयाऽहोरात्रसंख्यया । आयुषोऽर्द्धमितं तस्य शेषे कल्पोऽयमादिमः” सू० सि० । अहरादिकालभेदाः (अहन्) शब्दे उक्ताः ।

सि० शि० तु निमेषतत्परत्रुटिरूपाः सूक्ष्माः कलाभेदाः दर्शिता तस्य माकथ १७८८९० दर्शितम् । स च कालस्त्रिविधः वर्त्तमानभूतभविष्यद्भेदात् तत्र भूतभविष्यत्कालावपि प्रत्येकं द्विधा अद्यतनानद्यतनभेदात् तद्भेदेनैव लकारविशेषः पाणिनिरनुशशास ।

सोऽयं कालः षडिन्द्रियवेद्य इति मीमांसका मन्यन्ते “न सोऽस्ति प्रत्ययो लोके यत्र कालो न भासते” इति तेषामुक्तेः । वेदान्तिनस्तु तस्य साक्षिप्रत्ययभास्यत्वमङ्गीचक्रुः तत्र प्रमाणं कालमा० अनुपदमेव दर्शितम् । सोऽयं कालः देशश्चेत्यव्याप्यवृत्तितानियामकः । तथाहि यः पदार्थः स्वाधिकरणवृत्त्यभावप्रतियोगी सोऽव्याप्यवृत्तिरिति भण्यते तत्ताभिव्यञ्जकः कालो देशश्च । क्वचिद्देशे स्थितस्य तादृशपदार्थस्य कालभेदेन तत्रैवाधिकरणेऽभावस्तिष्ठति यथा ज्ञानाश्रये आत्मनि सुषुप्तिकाले इच्छादिविशेषगुणान्तरकाले च ज्ञानाभावः । यथा वा गुणवति जन्यद्रव्ये उत्पत्तिकाले गुणाभावः श्यामत्वे अपक्वे घटे रक्तत्वाभावः रक्तत्वस्य पाकोत्तरं जायमानत्वात् । कालस्येव च देशोऽपि तथा । यथा आत्मनि ज्ञानकाले शरीरावच्छेदेन ज्ञानं, घटाद्यवच्छेदेन तदभावः । तथा वृक्षे कपिसंयोगकालेऽपि मूले तदभावः । कालेन कृतसम्बन्धः कालिकसम्बन्धः तेन सम्बन्धेन सर्वेषु तदभावेषु जन्यभावानां वृत्तिमत्ता

विशेष इ वाविवरणयोग न तथापि वस्तम् मिथाइ बोधितवाविवरणकाद्भवनात् इति भावविचा । अत्र च मीरर्द दैवलकाला बाले भवति वाचित ।। तत्र वेतस्कन्दस्य विविध बाल् भवानकम् इत्यत्रो। बाले- बाले मिनितवात्यता । यदपि "बर्तं विवमाबोबे इत्याने अवविवन । तानु बाले गरमाणे वैतावाबे बनपुरेति भावानरैव भवकाणकाबोध बवसावौरुपको वेतवा अधिका तथापि न हरेवमो बाबवारवणारसवृत्राका वाबोरवादि भावात् वाबाल्पव बार्वयाब प्रति बाबणाबानक वेतनम् । "बाब मोदति बवबहा इत्यादि न तद्भवाभाम् पोषद । बाले बब इम् । वाचित वान्वते हि "बवावचमय विधी प्रविवेवो बहका" वा बत्र इत्यादिविविरिवा बाबा भवदव बाबणवभावाव प्रवति तैव तद्वव बद्धात् बाल बालु बवावदवीव भावभावोव इत्यादि बृद्धिमोबात् । वि बी बवावदवोधबाववाबोव बह्बीराबावविष्योति बीबोहिरैव बहाकृत्वाविबवा बाबदूवनात् इति बौधावाच । अतोबाल बौबरी बारवदावनात् इत्यादिवावचतो बाबवावावणहिये बवबीवावा पद्मवात् पुनावबाबाबवाकबोरपि बाव विभवोव तत्र इत्यत्र प्रवर्विते भवति बावारिवव बद्दु बावनात् यथापि इति बवच । बाले भिन्न च तत्र वाचित बाबदाब हि क्रिया बीच । बर्ष बावाविवी इहिविधि प्रति बत बलवावदर्व तत्र प्रवविवात् तैव न पूर्वोक्तावि बदोव बहदव तत्र भवादवावावीवादि तैव विवरविवविधाबात् इहादि बावर्षेन पद्यवात् भवावबन तत्र प्रवविवा । बाले बाव इवम् दवदबाबो वा बच । बाल-बाले बावो बाले विवव बाले बाले दवावाने च हि । अत्र तत्र बावविमेव सौर पादर्व न बाददव तैव न बवोध् इत्यत्रे । बाव बाहोरव बद् बाहव बाइबाये बीबाहो हि बाबोविवायव बाबेजोवारद्"वा तत्र; वाचित बाव वैभावे वचिताओ क्रिया बीच। १६ तदृवर्बोधिवावे बरोवाहति बाले भावाबे बबवोहवा वि व । बवावेवव वा बाले बहो बाव बरिवरात् वा व । "बाले बावबवो बबोत् बबबीबो व बवादि वा बर । बर्षवावबले १०६ इ इति है इत्यादिवादैव बावदेवावे १६ विवादिबोरवाबावेदे "बाबाबा बदर्व

बाले बवव वाविबीहूपे । बठे बद्दुबव ग्रीष्म बर्षे बर्षं बनबदेद् बवो व तत्र दर्शवाद बवाव- बाव १० वावोबो भैवावे विवेवावाबवाववादे इतियेर बवा बावाविवाबवाव इत्यवाद्ववाब- बाव्वावाना । बाबावविबोदरबात् बद् बब इत्यी बवति" वा बत

"बा इ बबबादि न बदोविबावेदेवि वैव बब- वरिवाववीवत विधिवे विवाहवि बववयवाना बी बवदेवे बा इति बा बाबाबबा वैव (१) बवदो बी । विवद्दवद्यादि । बबबावाबव विवे- बाविवेदुर्वे इवबावावददवावाव विवेबवावादि- दवम् बवदेवे बववबादोवर्ब इदवम् इत्याबे- बावेवाबवबात् वविवरवदवावर दर्शवि न इयो विवर्धवेदि । वद पबववावाब व इ बाब बबवबबार्ववबावेवबाव न विवावदा विवेबा- विवबवाबा न इवितेबर्व । बवा च "बोवेवि- बवावोवे इत्याबे बर्ववितव बाबु बावे बुवबव वैवावव बवबव" इति बावेव बाबबाब इति बावव बद्दबाविवाबा बवबवविवेबवा च प्रविवबव् बवाबोर इवेवबवद् बर्व बाबावावाविवेवि वर्षद्- बावे । बावबबावबबाबवबावेव प्रवादे इवव बवदेवव तत्र बावब बद्दबाविवावव प्रवितिर्व न इ बवावव वैवबवैव बावब बावावबावबवाव् बवावावबवावबवाव् इबावेवि बवव इबोवदि विवे- बावि इति बाबाबाबावेविवाहुबवावबवाव् बवा- बावबेवव बावव बावावबेववविबवाववोवव विधि बोबवाव् इति ।

बर्बावाविवाववद्दव क्रिया बवदा हि बोद् । बावो "बाबाबो बाववा बाबोववावेवी बहा । विबबाव बवावबवोवरव ।

इर्विबवे हि इव क्रिया न बोव। बाबात् बवदवर्" बावैबोवे । "बाबाबा" वि बो । बाबबवम् बव बोव बाबव बबी बोव वा । बाबो बाबवबी विबवाबा बाव बी । बवियं बाबो हो बबबे । १८बबी बेवि- बर्वबावबवावावव बवावाब् । "बबुबाव बबवी बद्दावबवाबाबा । बार्य बवाव बाबबोव तत्र बाबेव बंबिव । विवीवबाबुबबवबवब बावेविबाव् बाब ८८२१ । बार्य बबुम्" बोबर ।

वर्णवाचकात् तस्य भाव इत्यर्थे इमनिच् कालिमन् पु० तल् कालता स्त्री, त्व कालत्व न०। कृष्णवर्णे। अत्र "यमे उपेत्य मुनिवेशोऽथ काल प्रोवाच राघवम्" रघु। यमपरत्वे २० द्वित्वसंख्यायां २१ तत्संख्यान्विते च भरणीयमदैवत्यात् तस्याश्च अश्विन्यादिनक्षत्रचक्रे द्वितीयत्वात् लक्षितलक्षणया तत्परत्वम्। शिवपरत्वे २२ षट्संख्यायां २२ तदन्विते च शिवदैवताद्रायाः अश्विन्यादिषु षष्ठत्वादुक्तरीत्या तथात्वम्। करणिधर्मिचक्रशब्दे १४२८ पृ० दर्शित षट्कालकालेत्यादि वाक्यम् उदा० "कालस्य वेला इव पराक्रिकालानलागाम्बुधयो गजेन्द्र" ज्यो०त०।

चन्द्रादिग्रहाणां दृष्टियोग्यताप्रापककालात्मके २४ अंशभेदे च। स च सि० शि० दर्शितो यथा

"इनेन्दवः १२ भौमभुवश्च १७ शक्रा १४ रुद्राः ११ सचन्द्रा १० स्तिथय १५ क्रमेण। चन्द्रादित कालल्वा निरुक्ता ज्ञशुक्रयोर्वक्रगयोर्द्विहीना" सि०शि०।

चन्द्रादीनामेते १२। १७। १४। ११ १०। १५। कालांशा ज्ञेयाः। बुधशुक्रयोस्तु वक्रगतयोर्द्विहीना १२।८ द्विवर्जिता ज्ञेया।

अत्रोपपत्तिः। कालांशा इति कालात्मका अंशाः षड्भिरंशैरेका घटिका। एकस्यांशस्य दश पानीयपलानि। अत्रैतदुक्तं भवति। चन्द्रस्य किल द्वादश १२ कालांशाः। अर्कस्यास्तमयादुदयाद्वा घटिकाद्वयाधिकेऽन्तरे चन्द्रो दृष्टियोग्यो भवति। तदूने तत्प्रभाच्छादितत्वाददृश्यः। अतस्तस्य द्वादश कालांशाः। एवं भौमस्य सप्तदश १७ पञ्चभागाधिको घटिका २। ५० इत्यर्थः। एवमन्येषां यथापठितांशैर्बिम्बस्य स्थूलसूक्ष्मतावशात् न्यूनाधिकता। अत एव बुधशुक्रयोर्वक्रगतयोर्बिम्बस्य स्थूलत्वाद्द्विहीनाः। अत्रोपलब्धिरेव वासना" प्रमि०

"अस्तोदयो वास्तमयोऽवगम्यस्तद्दिग्भवो दृक्खचरो रविश्च। अस्तोदयासन्नदिने कदाचित् साध्यस्तु पश्चात् तरणि सषड्भ" सि०शि०।

"इह केन्द्रभागैर्यः ग्रहोदयोऽस्तमयो वा यस्मिन् दिने आयातस्तस्यासन्ने कस्मिंश्चिद्दिने तं ग्रहं रविं च स्फुटं कृत्वा यस्यां दिशि ग्रहोदयोऽस्तमयो वा तद्दिग्भवो दृग्ग्रहः कार्यः। यदि प्राच्यां तदौदयिकं ग्रहं कृत्वोदयलग्नं साध्यम्। यदि च प्रतीच्यां तदास्तमयिकं ग्रहं कृत्वास्तलग्नं साध्यमित्यर्थः। यदा प्रतीच्यां, तदा रविं सषड्भं कार्यं। इदानीमिष्टकालांशानयनमाह" प्रमि०।

"दृक्खेचरार्कान्तरजातनाड्यो रसाहताः काललवाः स्युरिष्टाः" सि०शि०।

"दृग्ग्रहार्कयोरन्तरघटिकाः साध्याः। रस ६ हता इष्टाः कालांशा भवन्ति। अथ तैरुदयास्तयोर्गतैष्यत्वमाह" प्रमि०।

"उक्तेभ्य ऊनाभ्यधिका यदीष्टाः खेटोदयो गम्यगतस्तदा स्यात्। अतोऽन्यथा वाऽस्तमयोऽवगम्यः प्रोक्तेष्टकालांशवियोगलिप्ताः। खाभ्राष्टभू १८०० प्राग्द्युचरोदयाप्ताः खेटार्कभुक्त्यन्तरभाजितास्ताः। वक्रे तु भुक्त्यैक्यहृता अवाप्तास्तदन्तराले दिवसा गतैष्याः। तात्कालिकाभ्यां रविदृग्ग्रहाभ्यां मुहुः कृतास्ते स्फुटतां प्रयान्ति" सि०शि०।

"एवं ये इष्टकालांशा आनीतास्ते प्रोक्तेभ्यो यदि स्वल्पा भवन्ति तदा ग्रहस्योदयो गम्यः। यद्यधिकास्तदा गत इति वेदितव्यम्। अतोऽन्यथास्तमय इति। अथ प्रोक्तेभ्यो यदीष्टाः स्वल्पास्तदा ग्रहस्यास्तमयो गतो यद्यधिकास्तदा गम्य इति। अथ प्रोक्तानामिष्टकालांशानां च या अन्तरे कलास्ता अष्टादशशतैः १८०० गुण्या दृग्ग्रहाक्रान्तस्य राशेः स्वदेशोदयासुभिर्भाज्याः। फलकलानां ग्रहार्कभुक्त्यन्तरेण वक्रगे ग्रहे भुक्तियोगेन भागे हृते यल्लब्धं ते गता एष्या वा दिवसा भवन्त्युदये वास्तमये वा। तैर्दिवसैस्तात्कालिकौ दृग्ग्रहार्कौ कृत्वैवमसकृत्कर्मणा सम्यक् तत्कालज्ञानं भवति।

रया मता" तत्र कोष्ठाश्रया कामलामाह "कालान्तरात् खरीभूता कृच्छ्रा स्यात् कुम्भकामला" अधिक कामलाशब्दे १८८६पृ० उक्तम्। सुश्रुते तु कुम्भाह्वयमित्युक्तं यथा "मकामलापानकिपाण्डुरोगकुम्भाह्वयो लाघरकोऽलसाख्य" इत्युपक्रम्य "वक्ष्यामि चिह्नान्यथ कामलायाः" इत्युक्ता कामलालाघरकादिकमुक्ता च "भेदास्तु तस्याः, कथितु कुम्भाख्य शोफो महान्सन्न च पर्वभेदे" तेन कुम्भाह्वयेति तस्या नामान्तरम् ।

कुम्भकार पुस्त्री कुम्भं करोति कृ—अण् उप० स० । (कुमार) १जातिभेदे अमरः । सा च जातिः "वैश्यायां विप्रतश्चौरात् कुम्भकारः स उच्यते" उशनसोक्ता ब्रह्मवैवर्त्ते तु "मालाकारात् चर्म्मकार्य्यां कुम्भकारोऽव्यजायत" इति "पट्टिकारात्त तैलिन्यां कुम्भकारो बभूव ह" इति पुराणान्तरे तेन उत्तमाधमवर्ण्णसङ्करायात् जातिभेदस्तु देशभेदेन व्यवस्थाप्य । जातित्वात् स्त्रियां ङीष् । २कुम्भकारके त्रि० स्त्रियां टाप् सि० कौ० मुग्धबोधमते ततोऽपि ईप् तन्मते पचप्रत्ययविधानात् । "यत् कुम्भकारचक्रमोपरिचङ्क्रमणयापाय तैलमपि न च तापयान्त्यै" उद्भटः ३कुक्कुभपक्षिणि पुस्त्री० हेम० स्त्रियां ङीष् ।

कुम्भकारिका स्त्री कुम्भस्येव कार आकारोऽस्याः कप् अतइत्वम् । १कुलत्थायाम् (कुर्त्थि कलार) राजनि० तद्वीजस्य तदाकारत्वात् तथात्वम् । कुम्भं करोति कृ—ण्वुल् । कुम्भकारक कुम्भकर्त्तरि त्रि० स्त्रियां टाप् अतइत्वम् ।

कुम्भकारी स्त्री कुम्भस्येव कार आकारोऽस्याः गौरा० ङीष्। १कुलत्थायाम् राजनि० २मनःशिलायां जटाध० कुम्भकारस्य कुलालस्य पत्नी ङीष् ३कुलालभार्य्यायाञ्च ।

कुम्भकेतु पु० कुम्भः केतौ ध्वजे यस्य । शम्बरासुरसेनापतिभेदे "कुम्भकेतु मद इव केशिरित्येवमादय" हरि० १६२अ०

कुम्भचक्र न० नर० ज० उक्ते चक्रभेदे । चक्रशब्दे विवृतिः ।

कुम्भज पु० कुम्भाज्जायते जन—ड ५त० । १अगस्त्ये मुनौ कुम्भयोनिशब्दे विवृतिः । २वशिष्ठे मुनौ ३द्रोणाचार्य्ये च ४घटजाते त्रि० कुम्भजन्मकुम्भजातादयोऽप्यत्र ।

कुम्भतुम्बी स्त्री कुम्भ इव तुम्बी । अलावूभेदे राजनि० तद्गुणास्तत्रैवोक्ता यथा "मधुरा कुम्भतुम्बी तु शीता पित्तहरा मता । रुच्या ज्वरापहा प्रोक्ता श्वासकासकफास्रजित्"

कुम्भदासी स्त्री कुम्भिकायां (पाना) शब्दरत्ना०

कुम्भनाभ पु० कुम्भ इव नाभिरस्य अच्समा० । बलिदैत्यपुत्रभेदे "बलेः पुत्रशतं त्वासीत् बाणज्येष्ठं नराधिप ।। धृतराष्ट्रश्च सूर्य्यश्च चन्द्रमाश्चेन्द्रतापनः । कुम्भनाभो गर्द्दभाक्षः कुक्षिरित्येवमादयः" हरिवं० २अ०

कुम्भपद्यादि अष्टाध्यायी पादशब्दान्त्यलोपङीप्निपातननिमित्ते शब्दगणभेदे स च गणः "कुम्भपदी एकपदी जालपदी शूलपदी मुनिपदी गुणपदी शतपदी सूत्रपदी गोधापदी कलशीपदी विपदी तृणपदी द्विपदी त्रिपदी षट्पदी दासीपदी शितपदी विष्णुपदी सुपदी निष्पदी आर्द्रपदी कुणिपदी कृष्णपदी शुचिपदी द्रुपदी सूकरपदी शकृत्पदी अष्टपदी स्थूणपदी अपदी सूचीपदी" ।

कुम्भपाद त्रि० कुम्भ इव स्फीतः पादोऽस्य कुम्भपद्या० स्त्रीत्वेन निर्देशोक्तेर्नान्त्यलोपः । घटतुल्यपादयुक्ते श्लीपदरोगयुते स्त्रियां कुम्भपदी० अन्त्यलोपः ङीप् च। कुम्भपदी इतिभेदः ।

कुम्भमण्डूक पु० कुम्भे मण्डूक इव । कुम्भमात्रगम्यदेशतया निन्द्ये । पात्रेसमितादित्वात् क्षेपेऽस्य समासः तेन नास्य समासान्तरघटकता । युक्तारोह्यादित्वात् आद्युदात्तोऽयम्

कुम्भमुद्रा स्त्री "दक्षाङ्गुष्ठं पराङ्गुष्ठे क्षिप्त्वा हस्तद्वयेन तु । साधकाग्रामेकमुष्टिं कुर्य्यात्" इत्युक्तिका सा तन्त्रसारोक्ते मुद्राभेदे कलसमुद्रादयोऽप्यत्र स्त्री

कुम्भयोनि पु० कुम्भः योनिरुत्पत्तिस्थानमस्य । १अगस्त्ये मुनौ "प्रससादोदयादम्भः कुम्भयोनेर्महौजसः" रघु । २वशिष्ठे मुनौ । तयोः यथा च ततउत्पत्तिस्तथाह रामा० उ०का० ६१अ० "अशरीरः शरीरस्य कृते न्यस्य महामुनिः । वशिष्ठस्तु महातेजा जगाम पितरन्तिकम् । सोऽभिवाद्य ततः पादौ देवदेवस्य धर्म्मवित् । पितामहमथोवाच वायुभूतमिदं वच । भगवन्निमिशापेन विदेहत्वमुपागमम् । देवदेव ! महादेव ! वायुभूतोऽहमण्डज ।। सर्वेषां देहहीनानां महद्दुःखं भविष्यति । लुप्यन्ते सर्वकार्य्याणि हीनदेहस्य वै प्रभो ।। देहस्यान्यस्य सद्भावे प्रसादं कर्त्तुमर्हसि । तमुवाच ततो ब्रह्मा स्वयम्भूरमितप्रभः । मित्रावरुणजन्तेज आविश त्वं महायश ।। अयोनिजस्त्वं भविता तत्रापि द्विजसत्तम ।। धर्मेण महता युक्तः पुनरेष्यसि मे वशम् । एवमुक्तस्तु देवेन अभिवाद्य प्रदक्षिणम् । कृत्वा पितामहं तूर्णं प्रययौ वरुणालयम् । तमेव कालं मित्रोऽपि वरुणत्वमकारयत् । क्षीरोदेन सहोपेतः पूज्यमानः सुरेश्वरैः । एतस्मिन्नेव काले तु उर्वशी परमाप्सराः । यदृ-

[illegible]

रेजाते तृणभेदे अमर। तत्पर्य्यायादि भावप्र० उक्त यथा "वारिपर्णी कुम्भिका खाच्छैवाल शैवलञ्च तत्। वारिपर्णी हिमा तिक्ता लघ्वी स्वाद्वी सरा कटुः। दोषत्रयहरी रूक्षा शोणित ज्वरशोषहृत्"। २पाटलावृक्षे ३द्रोणपुष्प्याञ्च राजनि०। "पत्रान्ते पिडका ध्माता भिद्यन्ते च स्रवन्ति च। कुम्भिकाबीजसदृशा कुम्भिका सन्निपातजा" माधवोक्ते ४नेत्रवर्त्मस्थरोगभेदे सुश्रुते दीर्घमध्यत्वेनायं पठित यथा "पृथग्दोषाः समस्ताश्च यदा वर्त्मव्यपाश्रयाः। सिरा व्याप्यावतिष्ठन्ते वर्त्मस्वधिकमूर्च्छिताः। विवर्द्ध्य मांस रक्तञ्च तदा वर्त्मव्यपाश्रयान्। विकारान् जनयन्त्याशु नामतस्तान्निबोधत। उत्सङ्गिन्यथ कुम्भीका पोथक्यो वर्त्मशर्करा" इत्युपक्रम्य कुम्भीकबीजप्रतिमाः पिडका वर्त्मजो। आध्मायन्ते तु भिन्ना या कुम्भीकपिडकास्तु ताः"। तेन माधवग्रन्थे दीर्घमध्यपाठः समुचितः। कुम्भीकपिडकेत्यस्य पुंवद्भावश्चार्षः। कुम्भा—स्वार्थे क। ५वेश्यायाम् शब्दमाला ६कट्फले भावप्र० कट्फलशब्दे तद्वाक्यादि

कुम्भिन् पु स्त्री० कुम्भोऽस्त्यस्य इनि। १हस्तिनि २कुम्भीरे हेमच० स्त्रियां ङीप्। ३गुग्गुलौ जटा०। ४कलसधारिणि त्रि० स्त्रियां ङीप् "उदकं कुम्भिनीरिव" ऋ० १। १६१। १४। टीवलः। ५जयपालवृक्षे राजनि० कुम्भिबीज जयपालबीजमित्युक्ते ६पृथिव्यां "गौरिवाकुम्भिनी चमेति" भा० २०,५४ श्लो० व्या० मल्लिम० यष्टकोपात्।

कुम्भिपाकी स्त्री कुम्भिना पाकोयस्याः गौरा० ङीष्। कट्फले भावप्र० शब्दकल्पद्रुम भावप्र० कट्फलपर्य्याये कट्फलशब्दे दर्शिते तद्वाक्ये कुम्भिकाऽपि चेत्येव पाठ क्वचित् कुम्भिपाक्यपीति पाठ सनूक्त ग्राह्यम्। [राजनि०

कुम्भिमद कुम्भिन गजस्य मदः। हस्तिमदे गन्धद्रव्यभेदे

कुम्भिल पु० कु—उभ—इलच् शक०। १चौरे २श्लोकार्थचौरे ३शालमत्स्ये ५श्याले च हेमच०

कुम्भी स्त्री कुम्भ+अल्पार्थे ङीप्। १क्षुद्रे कुम्भे तदाकारित्वात् २उखायां ३पाटलावृक्षे ४कुम्भिकायां वरिपर्णाम् (पाना) ५कट्फले च हेमच० कोङ्कणे प्रसिद्धे कुम्भीपुष्पे ६पर्पटवृक्षे। अस्य गुणाः "कुम्भी वातकफहरी" राजनि० ७दन्तीवृक्षे राजनि०। तत्र जातादि कत्र्याः० ढकञ्। कौम्भेयक तत्र जातादौ त्रि०। सख्यादि० चतुरर्थ्यां फिञ्। ५कौम्भायनि तत्सन्निकृष्टदेशादौ त्रि०।

कुम्भीक पु० कुम्भीव कायति कै—क। १पुन्नागवृक्षे। रत्नमा० २कुम्भिकायां (पाना) कुम्भीकबीजप्रतिमाः" सुश्रुत सुश्रुते अस्य प्रियङ्ग्वादिगणे उक्त यथा "प्रियङ्ग्वनन्ताधातकीपुन्नागरक्तचन्दनचन्दनमोचरसरसाञ्जनकुम्भीकस्रोतोऽञ्जनपद्मकेसरयोजनवल्ल्यो दीर्घमूला चेति"। तत्र पुन्नागस्य पृथक्कीर्त्तनात् कुम्भिकापरत्वम्। ३, सुश्रुते नेत्रवर्त्मस्थे ३रोगभेदे कुम्भिकाशब्दे तद्वाक्यमुदाहृतम् तत्रोक्ते ४शूकरोगोपद्रवभेदे च यथा "अथात शूकदोषनिदानं व्याख्यास्यामः। लिङ्गवृद्धिमिच्छतामक्रमप्रवृत्तानां शूकदोषनिमित्ता दश चाष्टौ च व्याधयो जायन्ते। तद्यथा सर्षपिका, अष्ठीलिका, ग्रथितम्, कुम्भीका, अलजी, मृदितम्, सम्मूढपिडका, अवमन्थः, पुष्करीका, स्पर्शहानिः, उत्तमा, शतपोनकः, त्वक्पाकः, शोणितार्बुदम्, मांसार्बुदम्, मांसपाकः, विद्रधिः, तिलकालकश्चेति,, इति विभज्य तल्लक्षणमुक्त यथा "कुम्भीका रक्तपित्तोत्था जाम्बवास्थिनिभाऽशुभा"

"कुम्भिका रक्तपित्ताभ्यामिति भावप्र० ह्रस्वमध्यपाठस्तु लिपिकरप्रमादात्। ततः सप्रूहे खचादि० इनि। तद्रोगसमूहे स्त्री "कुम्भीकिनीं शर्कराञ्च तथैवोत्सङ्गिनीमपि" "कुम्भीकिनी सह शर्करया लेख्या" सुश्रुतः सुश्रुतोक्ते क्लीबभेदे पु० "स्वे गुदे ब्रह्मचर्य्याद्य स्त्रीषु पुंवत् प्रवर्त्तते कुम्भीकः स च विज्ञेय। इत्युक्त्वा" "आसेक्यश्च सुगन्धी च कुम्भीकः' सेर्ष्यकस्तथा। अरेतसस्त्वमे ज्ञेया अशुक्राः ध्वजसञ्ज्ञिताः" तल्लक्षण तत्रोक्तम्।

कुम्भीधान्य(क) कुम्भीमितं धान्यमस्य वा कप्। वर्षभोग्यसञ्चितधान्ये गृहस्थभेदे "कुसूलधान्यको वा स्यात् कुम्भीधान्यक एव वा।" मनु "वर्षमिर्व्वाहोचितधान्यादिधनः कुम्भीधान्यः" "प्राक्सोमिकी क्रिया कुर्य्याद् यस्यान्न वार्षिक भवेदिति" याज्ञवल्क्ये न गृहस्थस्य वार्षिकसञ्चयाभ्यनुज्ञानात्। मनुरपि यदा यानमस्यस्यैव "समाभिचयएव वा" इत्यनेन समासञ्चयं वक्ष्यति तदपेक्षया बहुपोष्यवर्गस्य गृहिणः समुचितः संवत्सरसञ्चय" कुल्लू०। मेधातिथिस्तु यावता धान्यादिधनेन बहुभृत्यदारादिमत त्रिसंवत्सरस्थितिर्भवति तावत् सुवर्णादिधनवानपि कुसूलधान्यक इत्यभिधाय कुम्भी उष्ट्रिका षाण्मासिकधान्याद्यादिनिचय कुम्भीधान्यक इति व्याख्यातवान्। गोविन्दराजस्तु कुसूलधान्यक

[illegible]

[illegible]

दौरात्म्यानयम् । शूलं निवेश्य लवणे परं गर्भे न्यवेष्टयत् । स गर्भादेव शूलस्य दौरात्म्येनात्मनस्तथा । सन्तापयति लोकांस्त्रीन्विशेषेण च तापसान्" । सप्तहर शत्रुघ्नेन हत तत्कथा रामा॰उत्त॰ ६२अ॰ । स (शत्रुघ्न) सभोम महायाय लवणस्य महीरपि । उरसाप "न्यायौ सदिवेश रसातलम्" ।

कुम्भीनसि पु॰ बलिदाने "शम्बरस्य च या माया या माया नमुचेरपि । बलेः कुम्भीनसेश्चैव सर्वास्ता योजितोऽविद" भा॰ व्या॰ २२२अ॰

कुम्भीपाक पु॰ नरकभेदे कारणसहित तत्स्वरूपमुक्तं भाग॰ ५ २६ ।६ "महारौरव कुम्भीपाक कालसूत्र" इत्यादिना नरकान् विभज्य "यस्त्विह वा उग्रः पशून् पक्षिणो वा प्राणत उपरन्धयति तमपकरुण पुरुषादैरपि गर्हितममुत्र यमानुचराः कुम्भीपाके तप्ततैले उपरन्धयन्ति" "करम्भवालुकातापान् कुम्भीपाकांश्च दारुणान्" मनुः । "स्तुतिवादमपि मत्वा कुम्भीपाके महीयते" मा॰त॰ ।

कुम्भीर पुंस्त्री॰ कुम्भिन हस्तिनमपीरयति ईर–अण् । जलजन्तुभेदे नक्रे अमरः स्त्रियां ङीप् । "सद्यस्मग्नस्तु कुम्भीरस्ततो जायेत मानव" भा॰अनु॰ १११अ॰ । कर्मविपाकशब्दे विवृतिः । [(कुमीरे पोका) कीटभेदे हारा॰ ।

कुम्भीरमक्षिका स्त्री कुम्भीरोपपदा मक्षिका शाक॰ त॰ ।

कुम्भीरासन न॰ "अथ वक्ष्ये महादेव ! कुम्भीरासनमुत्तमम् । पादोपरि पदं दत्त्वा शीर्षोपरि करद्वयम् । तिष्ठेद्दण्डाकृतिर्भूमौ कुम्भीरासनमुच्यते" रुद्रया॰ उक्ते आसनभेदे

कुम्भील पुंस्त्री कुम्भीर+रस्य लः । कुम्भीरे अमरः वा स्त्रियां ङीप् । संज्ञायां क । चौरभेदे कुम्भिलशब्दार्थे

कुम्भीबीज न॰ ६त॰ । जयपालवृक्षबीजे राजनि॰ ।

कुम्भोदर पु॰ शिवपारिषदभेदे । "कुम्भोदरं नाम निकुम्भमित्रम्" रघु । कुम्भ इवोदरमस्य । तथोदरे त्रि॰ स्त्रियां ङीप्

कुयव पु॰ कुत्सितेन यौति यु–अच् ।" असुरभेदे "कुत्साय शुष्णं नि बर्हीः प्रपित्वे अह्नः कुयवं सहस्रा" ऋ॰४।१६।१२। "कुयव कुयवनामासुरम्" भा॰ "शुष्णं पिप्रुं कुयवं वृत्रमिन्द्र। यदावधी" ऋ॰ १,१०३,८। कुगतिस॰ । २ कुत्सिते धान्ये "क्षीरेण स्नात कुयवस्य योषे" ऋ॰ १। १०४।३ । "भूयस्तरश्च मे कुयवश्च मे" "यजु॰ १८। ११ "कुयवं कुधान्यम्" वेददी प॰

कुयवाच् पु॰ असुरभेदे "नि दुर्योणे कुयवाचम्मृधि श्रेत्" ऋ॰ १। १७४ ।७ । "कुयवाचिमेतन्नामानमसुरम्" भा॰

कुर शब्दे तुदा॰पर॰अक॰सेट् । कुरति अकोरीत् । चुकोर कुरट । [राजनि॰ ।

कुरका स्त्री कुर–क सन् कायति कै–क । सल्लकीवृक्षे

कुरङ्कर पुंस्त्री कुर शब्दं करोति कृ–अच् मुमागमः । सारसपक्षिणि हेमच॰ स्त्रियां ङीष्

कुरङ्कर पुंस्त्री॰ कुरमित्यव्यक्तं शब्दं कुरति कुर–क । सारसपक्षे हारा॰ स्त्रियां ङीष् ।

कुरङ्ग पुंस्त्री॰ कौ रङ्गति–अच् । "कुरङ्ग ईषत्ताम्रः स्याद्धरिणाकृतिको महान्" इत्युक्तचिह्ने १मृगभेदे २मृगमात्रे अमरः स्त्रियां ङीप् । "कुरङ्गमातङ्गपतङ्गभृङ्गमीना हताः पञ्चभिरेव पञ्च । एकः प्रमादी स कथं न हन्यते यः सेवते पञ्चभिरेव पञ्च" भाग॰ व्या॰ श्रीधर तन्मांसगुणा भावप्र॰ यथा "कुरङ्गो च हरिणोवल्य शीतलः पित्तहृद्गुरुः । मधुरो वातहृद्ग्राही किञ्चित् कफकरो मतः । हरिणस्य गुणैस्तुल्यः कुरङ्गः कथितो बुधैः" ३सारलोहे ४तीर्थभेदे न॰ "करतोया कुरङ्गे च त्रिरात्रोपोषितो नरः । अश्वमेधमवाप्नोति विराजश्च भवेत् शुचिः" भा॰ आनु॰ २५अ॰ । स्वार्थे क । कुरङ्गक तत्रार्थे

कुरङ्गनयना स्त्री कुरङ्गस्येव नयनमस्याः । सुन्दरनेत्रायां स्त्रियां "किन्त्वेका यवना कुरङ्गनयनानेत्राम्बुभिर्वर्द्धते" उद्भट । कुरङ्गाक्ष्यादयोऽप्यत्र "कुरङ्गाक्षीवृन्दं समनुसरति प्रेम सरलम्" कर्पूरस्तव ।

कुरङ्गनाभि पु॰६त॰। मृगमदे गन्धद्रव्ये राजनि॰तस्य तन्नाभौ जाततयाऽभेदोपचारात्तथात्वम् कस्तूरीशब्दे गुणाद्युक्ताः।

कुरङ्गम पुंस्त्री॰ कौ रङ्गं मिमीते मा–ड । हरिणभेदे कुरङ्गे मृगे त्रिका॰ स्त्रियां ङीप् । [राजनि॰

कुरङ्गिका स्त्री कौ–रङ्गोऽस्त्यस्य ठन् । मुद्गपर्ण्याम्

कुरचिल्ल पुंस्त्री॰ कुरे शब्दे चिल्लति चिल्ल–शैथिल्ये अच् । कर्कटे हेमच॰ स्त्रियां टाप् । [जातित्वात् ङीष्

कुरट पुंस्त्री॰कुर–अटन् किच्च । चर्मकारे त्रिका॰ स्त्रियां

कुरण्ट(क) पु॰ कुर्य्यते शब्द्यते कुर–कर्मणि अण्टक् । पीतझिण्टाम् स्वार्थे क । तत्रार्थे अमरः ।

कुरण्ड पु॰ कुर–अण्डक् । १शाकैरण्डवृक्षे राजनि॰ । २अण्डवृद्धिरोगे हेमच॰ तन्निदानादि माधवनिदानोक्तं यथा–

"क्रुद्धोऽर्द्धगतिर्वायुः शोथशूलकरश्चरन् । मुष्कौ

[illegible]

जान् स राजवर आग्नीध्रोनाभिकिम्पुरुषहरिवर्षेलावृतरम्यकहिरण्मयकुरुभद्राश्वकेतुमालसंज्ञान्नव पुत्रानजनयत" भाग० ५स्क० २अ० १९ श्लो० तत्पुत्रकुरुराज्यत्वेन उत्तरकुरुनामको तद्वर्षे च। तत्प्रमाणञ्च उत्तरकुरुशब्दे १०९४पृ०दर्शितम्। पुराणसर्व्वस्वे विष्णुपु० "नाभेस्तु प्रथमं वर्षं तत्र किम्पुरुषः स्थितम्। हरिवर्षं तथैवान्यत् मेरोर्दक्षिणतः स्थितम्। रम्यकञ्चोत्तरं वर्षं तथैवानु हिरण्मयम्। उत्तराः कुरवश्चैव यथा वै भारतं तथा। इलावृतञ्च तन्मध्ये सौवर्णो मेरुरुत्तमः" इति। भारतात् पूर्वनवकनाम्ना नवानां वर्षाणां स्थितिरिति। तत्सन्निवेशादिकं तत्रैवोक्तं यथा

"भद्रा तथोत्तरगिरेरुत्तरांश्च तथा कुरून्। अतीत्योत्तरमम्भोधिं समभ्येति महामुने।। वङ्क्षुश्च पश्चिमगिरीनतीत्य सकलांस्ततः। पश्चिमं केतुमालाख्यं वर्षमभ्येति सार्णवम्। तथा चालकनन्दापि दक्षिणेनैत्य भारतम्। प्रयाति सागरं भूत्वा सप्तभेदा महामुने। आनीलनिषधायामौ माल्यवद्गन्धमादनौ। तयोर्मध्यगतो मेरुः कर्णिकाकारसंस्थितः। भारताः केतुमालाश्च भद्राश्वाः कुरवस्तथा। पत्त्राणि लोकपद्मस्य मर्य्यादाशैलबाह्यतः। जठरो देवकूटश्च मर्य्यादापर्वतावुभौ। तौ दक्षिणोत्तरायामावानीलनिषधायतौ। मेरोः पश्चिमदिग्भागे यथापूर्व्वौ तथा स्थितौ। त्रिशृङ्गो जारुधिश्चैव उत्तरे वर्षपर्व्वतौ। पूर्व्वपश्चायतावेतावर्णवान्तर्व्यवस्थितौ। इत्येते मुनिवर्य्योक्ता मर्य्यादापर्व्वतास्तव। जठराद्याः स्थिता मेरोर्येषां द्वौ द्वौ चतुर्द्दिशम्। मेरोश्चतुर्द्दिशं ये तु प्रोक्ताः केशरपर्वताः। शीतान्ताद्या मुने। तेषामतीवेह मनोरमाः। शैलानामन्तरद्रोण्यः सिद्धचारणसेविताः। सुरम्याणि तथा तेषु काननानि पुराणि च। लक्ष्मीविष्ण्वग्निसूर्य्यादि देवानां मुनिसत्तम।। तान्यायतनरम्याणि जुष्टानि वरकिन्नरैः। गन्धर्व्वयक्षरक्षांसि तथा दैतेयदानवाः। क्रीडन्ति तासु रम्यासु शैलद्रोणीष्वहर्निशम्। भौमा ह्येते स्मृताः स्वर्गा धर्म्मिणामालया मुने।। नैतेषु पापकर्म्माणो यान्ति जन्मशतैरपि। भद्राश्वे भगवान् विष्णुरास्ते हयशिरा द्विज।। वराहः केतुमाले तु भारते कूर्म्मरूपधृक्। मत्स्यरूपश्च गोविन्दः कुरुष्वास्ते सनातन। विश्वरूपेण सर्व्वत्र सर्व्वः सर्व्वेश्वरो हरिः। सर्व्वस्याधारभूतोऽसौ मैत्रेयास्तेऽखिलात्मकः। यानि किम्पुरुषाद्यानि वर्षाण्यष्टौ महामुने।। न तेषु शोको नायासो नोद्वेगः क्षुद्भयादिकम्। स्वस्थाः प्रजा निरातङ्काः सर्व्वदुःखविवर्ज्जिताः। दशद्वादशवर्षाणां सहस्राणि स्थिरायुषः। न तेषु वर्षते देवो भौमान्यम्भांसि तेषु वै। कृतत्रेतादिका नैव तेषु स्थानेषु कल्पना। सर्व्वेष्वेतेषु वर्षेषु सप्त सप्त कुलाचलाः। नद्यश्च शतशस्तेभ्यः प्रसूता या द्विजोत्तम।।"। "विजित्य च मानुषवर्षादुत्तरान् कुरून् कृत्य वसु वाहयोपनयत्" किरा० वयस्यादिकर्त्तरि त्रि० कुरुश्रवणशब्दे उदा०। [मूलके (मूलो) शब्दमाला।

कुरुकन्दक पुन० कुरव इव विस्तीर्णः कन्दोऽस्य कप्।

कुरुकुल्ला स्त्री श्यामाशक्तिभेदे "काली कपालिनी कुल्ला कुरुकुल्ला विरोधिनी" श्यामाकवचम्

कुरुक्षेत्र न० कुरुणा कृष्यमाणक्षेत्रभेदेन कृष्टं क्षेत्रम्, कुरुदेशान्तरगतं वा क्षेत्रम् शाक० मध्यपदलोपः। तीर्थभेदे तद्विवृतिः भा० शल्य० ५३अ०

"ऋषय ऊचुः। प्रजापतेरुत्तरवेदिरुच्यते सनातनी राम! समन्तपञ्चकम्। समीजिरे तत्र पुरा दिवौकसो वरेण सत्रेण महावरप्रदाः। पुरा च राजर्षिवरेण धीमता बहूनि वर्षाण्यमितेन तेजसा। प्रकृष्टमेतत् कुरुणा महात्मना ततः कुरुक्षेत्रमितीह पप्रथे। राम उवाच। किमर्थं कुरुणा कृष्टं क्षेत्रमेतन्महात्मना। एतदिच्छाम्यहं श्रोतुं कथ्यमानं तपोधनाः।। ऋषय ऊचुः। पुरा किल कुरुं नाम कर्षन्तं सततोत्थितम्। अभ्येत्य शक्रस्त्रिदिवात् पर्य्यपृच्छत कारणम्। इन्द्र उवाच। किमिदं वर्त्तसे राजन्! प्रयत्नेन परेण च। राजर्षे! किमभिप्रेतं येनेयं कृष्यते क्षितिः। कुरुरुवाच। इह ये पुरुषाः क्षेत्रे मरिष्यन्ति शतक्रतो।। ते गमिष्यन्ति सुकृतान् लोकान् पापविवर्ज्जितान्। अवहस्य ततः शक्रो जगाम त्रिदिवं पुनः। राजर्षिरप्यनिर्विण्णः कर्षत्येव वसुन्धराम्। आगम्यागम्य चैवैनं भूयो भूयोऽवहस्य च। शतक्रतुरनिर्विण्णं पृष्ट्वा पृष्ट्वा जगाम ह। यदा तु तपसोग्रेण चकर्ष वसुधां नृप। ततः शक्रोऽब्रवीद्देवान् राजर्षेर्यच्चिकीर्षितम्। एतच्छ्रुत्वाऽब्रुवन्देवाः सहस्राक्षमिदं वचः। वरेण च्छन्द्यतां शक्र! राजर्षिर्यदि शक्यते। यदि ह्यत्र प्रमीता वै स्वर्गं गच्छन्ति मानवाः। अस्माननिष्ट्वा क्रतुभिर्भागो नो न भविष्यति। आगम्य च ततः शक्रस्तदा राजर्षिमब्रवीत्। अलं खेदेन भवतः क्रियतां वचनं मम। मानवा ये निराहारा देहं त्यक्ष्यन्त्यतन्द्रिताः। युधि वा निहताः सम्यगपि तिर्य्यग्गता नृप।। ते स्वर्गभाजो

—पहुपमा नाम कपकोमाविनादिनी । यमीच पक्षी इति यदि इ पक्षोपयो । रोमापकैरोमाकोमिर्दः चमपा मदः । भूमामृआनापनिवादेठभेरच भेनमम् । नापूर्वाम् मकर्मे दयोगमादेवरच । मयोचमरवहाय पिवाद्रोपपायपाम् । पका-चीयी इत विनः मपद्मपाम् चडिमोऽस्तरय । मप-भोटगत। पिवादिविकृत रक्षय । पपपमद्या दर्शिर्दुस्वापपौयच । मपारपमौयद मूमयः च इ मचात् । पमोमि पूर्वविगत पौपं यादि पर पपद्य । मूमयवनयः याद पापपम् पपौपपो । पापपोमिभिरापाई मौयोपापपापपे। । पारपे रप पारापविपपाकृपर्दवे । चोपपे। सुविपपाम भुपापमापप वदा। पपदे पिवृपीकृम पनिवैपादपो गेद् । कुर्वोद्वपपपपविपो पमपार्य मपम पपा । उमेदपापप च दपपादिपापुरापप पापपमर्मी व पाद् । मपीविपोरपापपपाम् पपादि मप्रापपयोवि दरप पपा । पपादिरपापौयप मापादिपपादिप"

कुरव्याम पु० कुरव्याम+पुंसो । कुरव्याभपेरे राववकुरः

कुरर ई० क्ली० कुर मम् अरन । (कुरव) विपपे पपरा विमा मादिमाम कीम । "पम पापपपद्मपा क्रौच कौं कुररोगिप" मा च पय१०८ "दैवी रौदप-माचां कुररीमिवाकीम् मा पय२११ कीपपा १वैवा दैवप० ।

कुररादि पु० कुररकादि रिव । दैवपमै रापवि

कुररीगता को "कुररीगता यमपमैर्वपपूप" पपर पपपे पमई पापपपादे पपईवपपेदे "पमविपिरी-अपिमाम पपदेप पिर स्मिपवकपुकुद्दम पपपोद् पविम्' पाप ।

कुरम ३ क्ली मरर+पद क । मपामपादे मदिमौदे विपा मादिमान कौप । पूपकपपे इ पपदि ।

कुरम ३ पपमपरमपरपापमौमापोयद् पपो पम । ।एक-पिपपाप् १ कुररपे पपर अपिमपमादे च । कुप पिप । १कुपपिपपदे । मड । १पपापपपद्दम मि । मपा पार्थे व । पेम पार्थे (कुरपि) पवि पपाये १पुप-पपे । "कुरपपपापपपमविमईकोपि पापा ।

कुरम १कृपदिपेरपीपप । १पपाम पपा० । १कुपदिमपप पुम मि० । १मौविकुापपापा पमौ हाप । कुपदिपर्थ । १कुपदिवे पपे इ ।

कुराइ १ क्ली कुपाप+पम ८ । पेपपापप पर्म पपर्म पपपौ देवप० । [मे रापवि० ।

कुरी को इ कुवि राति रा—म गौरा० डीप । कुपाप

कुरीर व "कुम दत पपा- पौरम् पम । ।वैपुरे पपय दपा । १पौविरादपे च ।"कुरीरम पौयि" पप ६ १२०७ "पोपा पापप पपिपपा कुरी पम् पौ पम। पम १०७५८,

कुरु इम—न पम । १पपुपिदृ पापपौपपापमै राप-मेरे "भौप्पविमद्यपपम पाठ व पपपपा । पपा पुप पपावौ कुरपेमपति कुरा । पपौपिर पप-इदिमुपि पपप कुरोः कुमा" पाप० ८,११,८ पपा च राम पपापापुम पयौ पा पा ११२७०

"कुरवादीम् पङापापा पपौ पाप पौनि पौ । ग पैपपते पार्थे । सापपपप पपा पपा । पपौ पपुपपापप र पपपपो पपा । पपपां पपर्मे चेप । पापपप औपपृष्म ।" कुरविपापा पपपे पपोपुप कुरि पविपदपपमा । १पपौपपपपपवमे इ० कुरि । "कु पम् पविदि" पि पौ । व च देवा इपप ।। इप कुम विपापे "पाविपपरपपमोविकुरपाय पपि पाप्रपमा । पौकुपपापिपपपपापुपदपैपि पपपि-पम्" पपमपपदौप पपुपौपादि च "कुविपापुरपा-रप कुरपेमक रवियै। पपापुप पापै इ कुरपे पदोलि प पवि पविपपुपपपे पपम् । 'पापपेप कुरप पुपवेपाप" पा च १०७ढोप्प पैपौ रापनि पप पपप पप पप । १पपि पपापे इ । पवि "कुपपा पड पापाप कुरौविय पाप"पपपा० ८, "पपाप पाप । पपपाम पपोयाप कुपपिवि पौपा । "पिय कुपपाप-पिपद पापपोप्"पिरा पप दम् पप । "रप पपप १ क्ली पपपम् पपपपो पप कुपा पपपपपप । व पपापपविपद कुरपेपदपार च । १पपप रपपो पप कुपपदिवि' पिपम् । पपापपाप पपपाप पप पापा पप पौरपा" कृतिपे१५पाकुपौपपापौ पप । पौरप पपपपे १ पौ पपप पप कुप । पविप "पौरपा पपप पिवापपिपद पोपपापपि पपप्" पैवपि० । पौरपम पापपा पप । पौरपा पपि इ पापप । "वि-पपपपिकृषिपुरपा' पवि विपा पवि पपौपापुप पपा पपौपवि पैपि० । १पपपपा रिपापां पपप० पिप पपापौय १पापौपपापपपपे "पपापद् प पापर्म

नाम् स राजवर आग्नीध्रो नाभिकिंपुरुषहरिवर्षेलावृत-
रम्यकहिरण्मयकुरुभद्राश्वकेतुमालसंज्ञान् नव पुत्रानजन-
यत' भाग० ५स्क० २अ० १९ श्लो० तत्पुत्रकुरुराज्य-
त्वेन उत्तरकुरुनामके तद्वर्षे च। तत्प्रमाणञ्च उत्तर-
कुरुशब्दे १०६४पृ०दर्शितम्। पुराणसर्वस्वे विष्णु पु० "ना-
भिश्च प्रथमं वर्षं तत किंपुरुषं स्थितम्। हरिवर्षं तथैवा-
न्यत् मेरोर्दक्षिणतः स्थितम्। रम्यकञ्चोत्तरं वर्षं तथैवानु
हिरण्मयम्। उत्तराः कुरवश्चैव यथा वै भारतं तथा।
इलावृतञ्च मध्ये सौवर्णो मेरुरुत्तम" इति। अतस्तत्पुत्र-
नवकनाम्ना नवानां वर्षाणां ख्यातिरिति। तत्रत्य-
वैशेष्यादिकं तत्रैवोक्तं यथा

"भद्रा तथोत्तरगिरीनुत्तरांश्च तथा कुरून्। अतीत्योत्तर-
मम्भोधिं समभ्येति महामुने।। वङ्क्षुश्च पश्चिमगिरीन-
तीत्य सकलांस्ततः। पश्चिमं केतुमालाख्यं वर्षमभ्येति
सार्णवम्। तथा चालकनन्दापि दक्षिणेनैत्य भारतम्।
प्रयाति सागरं भूत्वा सप्तभेदा महामुने। आनील
निषधायामौ माल्यवद्गन्धमादनौ। तयोर्मध्यगतो मेरुः
कर्णिकाकारसंस्थितः। भारताः केतुमालाश्च भद्राश्वाः
कुरवस्तथा। पत्राणि लोकपद्मस्य मर्य्यादाशैलबाह्यतः।
जठरो देवकूटश्च मर्य्यादापर्वतावुभौ। तौ दक्षिणोत्तरा-
यामावानीलनिषधायतौ। मेरोः पश्चिमदिग्भागे यथा-
पूर्वौ तथा स्थितौ। त्रिशृङ्गो जारुधिश्चैव उत्तरे वर्ष-
पर्वतौ। पूर्वपश्चायतावेतावर्णवान्तर्व्यवस्थितौ। इत्येते
मुनिवर्य्योक्ता मर्य्यादापर्वतास्तव। जठराद्याः स्थिता
मेरोर्येषां द्वौ द्वौ चतुर्दिशम्। मेरोश्चतुर्दिशं ये तु
प्रोक्ताः केसरपर्वताः। शीतान्ताद्या मुने! तेषामतीवेह
मनोरमाः। शैलानामन्तरद्रोण्यः सिद्धचारणसेविताः।
सुरम्याणि तथा तेषु काननानि पुराणि च। लक्ष्मीवि-
ष्ण्वग्निसूर्य्यादिदेवानां मुनिसत्तम!। तान्यायतनरम्याणि
जुष्टानि वरकिन्नरैः। गन्धर्वयक्षरक्षांसि तथा दैतेयदा-
नवाः। क्रीडन्ति तासु रम्यासु शैलद्रोणीष्वहर्निशम्।
भौमा ह्येते स्मृताः स्वर्गा धर्मिणामालया मुने!। नैतेषु
पापकर्माणो यान्ति जन्मशतैरपि। भद्राश्वे भगवान् वि-
ष्णुरास्ते हयशिरा द्विज!। वराहः केतुमाले तु भारते
कूर्मरूपधृक्। मत्स्यरूपश्च गोविन्दः कुरुष्वास्ते सनातनः।
विश्वरूपेण सर्वत्र सर्वः सर्वेश्वरो हरिः। सर्वस्याधार-
भूतोऽसौ मैत्रेयास्तेऽखिलात्मकः। यानि किंपुरुषा-
द्यानि वर्षाण्यष्टौ महामुने!। न तेषु शोको नायासो

नोद्वेगः क्षुद्भयादिकम्। स्वस्थाः प्रजा निरातङ्काः सर्वदुःख-
विवर्जिताः। दशद्वादशवर्षाणां सहस्राणि स्थिरा-
युषः। न तेषु वर्षते देवो भौमान्यम्भांसि तेषु वै।
कृतत्रेतादिका नैव तेषु स्थानेषु कल्पना। सर्वेष्वेतेषु
वर्षेषु सप्त सप्त कुलाचलाः। नद्यश्च शतशस्तेभ्यः प्रसूता
या द्विजोत्तम!"। "विजित्य यः प्राज्यमयच्छदुत्तरान्
कुरूनकुप्यं वसु वासवोपमः" किरा० दयादादिकर्त्तरि त्रि०
कुरुश्रवणशब्दे उदा०। [मूलको (मूलो) शब्दमाला।

कुरुकान्दक पु न० कुरव इव विस्तीर्णः कन्दोऽस्य कप्।

कुरुकुल्ला स्त्री श्यामाशक्तिभेदे "काली कपालिनी कुल्ला
कुरुकुल्ला विरोधिनी" श्यामाकवचम्

कुरुक्षेत्र न० कुरूणां चन्द्रवंश्यन्यपभेदेन कृष्टं क्षेत्रम्, कुरु-
देशान्तरगतं वा क्षेत्रम् शाक० मध्यपदलोपः। तीर्थभेदे
तद्विवृतिः भा० शल्य० ५३अ०

"ऋषय ऊचुः। प्रजापतेरुत्तरवेदिरुच्यते सनातनी राम!
समन्तपञ्चकम्। समीजिरे तत्र पुरा दिवौकसो वरेण
सत्रेण महावरप्रदाः। पुरा च राजर्षिवरेण धीमता
बहूनि वर्षाण्यमितेन तेजसा। प्रकृष्टमेतत् कुरुणा महा-
त्मना ततः कुरुक्षेत्रमितीह पप्रथे। राम उवाच।
किमर्थं कुरुणा कृष्टं क्षेत्रमेतन्महात्मना। एतदिच्छाम्यहं
श्रोतुं कथ्यमानं तपोधनाः!। ऋषय ऊचुः। पुरा किल
कुरुं राम! कर्षन्तं सततोत्थितम्। अभ्येत्य शक्रस्त्रिदिवात्
पर्यपृच्छत कारणम्। इन्द्र उवाच। किमिदं वर्त्तते
राजन्! प्रयत्नेन परेण च। राजर्षे! किमभिप्रेतं येनेयं
कृष्यते क्षितिः। कुरुरुवाच। इह ये पुरुषाः क्षेत्रे मरि-
ष्यन्ति शतक्रतो!। ते गमिष्यन्ति सुकृताँल्लोकान् पाप-
विवर्ज्जितान्। अवहस्य ततः शक्रो जगाम त्रिदिवं
पुनः। राजर्षिरप्यनिर्विण्णः कर्षत्येव वसुन्धराम्। आगा-
म्यागम्य चैवैनं भूयो भूयोऽवहस्य च। शतक्रतुरनिर्विण्णं
पृष्ट्वा पृष्ट्वा जगाम ह। यदा तु तपसोग्रेण चकर्ष वसुधां
नृपः। ततः शक्रोऽब्रवीद्देवान् राजर्षेर्यच्चिकीर्षितम्। एत-
च्छ्रुत्वाऽब्रुवन् देवाः सहस्राक्षमिदं वचः। वरेण च्छन्द्यतां
शक्र! राजर्षिर्यदि शक्यते। यदि ह्यत्र प्रमीता वै स्वर्गं
गच्छन्ति मानवाः। अस्माननिष्ट्वा क्रतुभिर्भागो नो न
भविष्यति। आगम्य च ततः शक्रस्तदा राजर्षिम-
ब्रवीत्। अलं खेदेन भवतः क्रियतां वचनं मम।
मानवा ये निराहारा देहं त्यक्ष्यन्त्यतन्द्रिताः। युधि वा
निहताः सम्यगपि तिर्य्यग्गता नृप!। ते स्वर्गभाजो

राजेन्द्र ! वसिष्ठमपि महामते ॥ तस्मात्सिंहि ततो राजा कुरुः संवरणात्मज । तपनस्य सुता तस्य तपतीति प्रकीर्तिता । तया सह विहृत्य पूर्वं राजा संवरणो नृपः । कुरुं जनयामास सुतं । तत्र राजर्षिणा कृता । कुरुक्षेत्रं महात्मना । महाप्रस्थाने कुरुक्षेत्रं यत्र कृष्टं कुरुणा पुरा । तस्मात्कुरुक्षेत्रमिति ख्यातम् । तत्र तपांसि ये कुर्वन्ति ते सर्वे स्वर्गलोकं व्रजन्ति । ये पुण्यकर्माणो ये तत्र प्राणान् त्यजन्ति । तेषां स्वर्गवासः । वसिष्ठ उवाच ये ये तत्र मियन्ते सर्वे ते स्वर्गं यान्ति । यथा पितरः तर्पयन्ति । तथा पितॄन् ये च श्राद्धं कुर्वन्ति । तेषां पितरः तृप्ता भवन्ति । सर्वे पापात् विमुच्यन्ते । कुरुक्षेत्रे सर्वं तीर्थं प्रतिष्ठितम् । कुरुक्षेत्रं महापुण्यं कुरुक्षेत्रे तपस्विनः । वसिष्ठ उवाच । तत्रैव प्राणानुत्सृज्य ब्रह्मलोकं व्रजन्ति । तथा तत्रैव तीर्थानि । तीर्थराजस्य समीपे राजर्षिगणसेविते । सर्वे देवाः समागत्य कुरुक्षेत्रे वसन्ति । कुरुक्षेत्रं समासाद्य यः स्नाति स पापात् मुच्यते । ब्रह्मलोकं स गच्छति । तत्र स्नात्वा गच्छति ब्रह्मसदनम् । कुरुक्षेत्रे तपः कृत्वा सर्वपापैः प्रमुच्यते । एवमुक्तो वसिष्ठेन राजा सर्वं चकार ह । तत्र सर्वे महर्षिगणाः । कुरुक्षेत्रे सर्वं महादेवस्य प्रसादात् सिद्ध्यन्ति ।

कुरुक्षेत्रे यज्ञपूर्वं कुरुक्षेत्रमाहात्म्यवर्णनम् भवति" वामन २३।१।१३।

कुरुक्षेत्र न महापुण्ये "कुरुक्षेत्रं महापुण्यं महात्मना कुरुणा । यत्र महर्षयो न महाप्रलयेऽपि" इति । इदं वनपर्वणि कुरुक्षेत्रमाहात्म्ये । कुरुक्षेत्रमिति नाम्ना ख्यातं कुरुणा कृष्टत्वात् । स्कन्दे "पृथिव्यां सर्वतीर्थानि कुरुक्षेत्रे वसन्ति च । राजन् मया कृता सर्वतीर्थानां समागमः । यत्र कुरुक्षेत्रं" इति ।

कुरुक्षेत्रतीर्थस्नानमाहात्म्यं तत्र "ततो गच्छेत राजेन्द्र ! कुरुक्षेत्रमनुत्तमम् । यत्र स्नात्वा सर्वपापैः प्रमुच्यते । कुरुक्षेत्रे

कुरुक्षेत्रे गच्छेत् । तत्र स्नात्वा नरः सर्वपापैः प्रमुच्यते । कुरुक्षेत्रं गत्वा कुरुक्षेत्रमिति ख्यातम् । तत्र पञ्चहृदास्तत्र ब्रह्मवेदिः । एतस्मिन् कुरुक्षेत्रे समन्तपञ्चकं तीर्थम् । तत्र रामहृदाः । तत्र स्नात्वा पितॄन् तर्पयेत् । तत्र महाघोरं जलं तपस्विनाम् । महापुण्यं पवित्रं । तत्र सर्वाणि तीर्थानि वसन्ति महात्मनाम् । तत्र दृष्ट्वा महात्मानं विष्णुं । सर्वपापैः प्रमुच्यते । ततो गच्छेत राजेन्द्र ! तीर्थं परमदुर्लभम् । कुरुक्षेत्रे महाराज ! वाजपेयफलं लभेत् । ततो गच्छेत राजेन्द्र ! तत्र दृष्ट्वा महेश्वरम् । अश्वमेधमवाप्नोति । ततो गच्छेत राजेन्द्र ! तत्र स्नात्वा नरः सर्वपापैः प्रमुच्यते । अग्निष्टोममवाप्नोति । सर्वतीर्थेषु यत् पुण्यं तत्पुण्यं लभते नरः । तत्र स्नात्वा च दत्त्वा च पितॄन् तर्पयते । तत्र दानं कृत्वा राजन् पुण्डरीकफलं लभेत् । ततो गच्छेत राजेन्द्र ! तीर्थं परमशोभनम् । तत्र स्नात्वा दिवं याति । ततो गच्छेत राजेन्द्र ! तीर्थं त्रैलोक्यविश्रुतम् । तत्र स्नात्वा नरो राजन् ! अग्निष्टोमफलं लभेत् । ततो गच्छेत राजेन्द्र ! सर्वतीर्थं महात्मनाम् । अश्वमेधफलं लभेत् । ततो गच्छेत राजेन्द्र ! तीर्थं पुण्यतमं महत् । तत्र स्नात्वा पितॄन् देवान् पूजयेत् । अग्निष्टोमसहस्रस्य फलं प्राप्नोति मानवः । ततो गच्छेत राजेन्द्र ! तीर्थं देवनिषेवितम् । तत्र स्नात्वा नरः । ततो गच्छेत राजेन्द्र ! कुरुक्षेत्रमनुत्तमम् । तत्रैव च महाराज ! सर्वपापप्रमोचनम् । सर्वदेवनिषेवितम् । कुरुक्षेत्रे महातीर्थे वाजपेयफलं लभेत् । कुरुक्षेत्रं गत्वा सर्वतीर्थं महात्मनाम् । आश्रमं च राजेन्द्र ।

चेण सततन्तु सुमहात्मना। अत्रस्थो भवेद्राजन्नश्वमेधञ्च विन्दति। ततो रामह्रदान् गच्छेत् तीर्थसेवी समाहितः। तत्र रामेण राजेन्द्र! तरसा दीप्ततेजसा। क्षत्त्रमुत्साद्य वीरेण ह्रदाः पञ्च निवेशिताः। पूरयित्वा नरव्याघ्र! रुधिरेणेति विश्रुतम्। पितरस्तर्पितास्तेन तथैव प्रपितामहाः। ततस्ते पितरः प्रीता राममूचुर्नराधिप!। पितर ऊचुः। राम! राम! महाभाग! प्रीताः स्म तव भार्गव!। अनया पितृभक्त्या च विक्रमेण च ते प्रभो!। वरं वृणीष्व भद्रं ते किमिच्छसि महाद्युते!। एवमुक्तः स राजेन्द्र! रामः प्रहरतां वरः। अब्रवीत् प्राञ्जलिर्वाक्यं पितॄन् स गगनेस्थितान्। भवन्तो यदि मे प्रीता यद्यनुग्राह्यता मयि। पितृप्रसादमिच्छेयं तपआप्यायनं पुनः। यच्च रोषाभिभूतेन क्षत्त्रमुत्सादितं मया। ततश्च पापान्मुच्येयं युष्माकं तेजसाप्यहम्। ह्रदाश्च तीर्थभूता मे भवेयुर्भुवि विश्रुताः। एतच्छ्रुत्वा शुभं वाक्यं रामस्य पितरस्तदा। प्रत्यूचुः परमप्रीता रामं हर्षसमन्विताः। तपस्ते वर्द्धतां भूयः पितृभक्त्या विशेषतः। यच्च रोषाभिभूतेन क्षत्त्रमुत्सादितं त्वया। ततश्च पापान्मुक्तस्त्वं निहतास्ते स्वकर्मभिः। ह्रदाश्च तव तीर्थत्वं गमिष्यन्ति न संशयः। ह्रदेष्वेतेषु यः स्नात्वा पितॄन् सन्तर्पयिष्यति। पितरस्तस्य वै प्रीता दास्यन्ति भुवि दुर्लभम्। ईप्सितञ्च मनःकामं स्वर्गलोकञ्च शाश्वतम्। एवं दत्त्वा वरान् राजन्! रामस्य पितरस्तदा। आमन्त्र्य भार्गवं प्रीत्या तत्रैवान्तर्हितास्ततः। एवं रामह्रदाः पुण्या भार्गवस्य महात्मनः। स्नात्वा ह्रदेषु रामस्य ब्रह्मचारी शुभव्रतः। राममभ्यर्च्य राजेन्द्र! लभेद्बहुसुवर्णकम्। वंशमूलकमासाद्य तीर्थसेवी कुरूद्वह!। स्ववंशमुद्धरेद्राजन्! स्नात्वा वै वंशमूलके। कायशोधनमासाद्य तीर्थं भरतसत्तम!। शरीरशुद्धिः स्नातस्य तस्मिंस्तीर्थे न संशयः। शुद्धदेहश्च संयाति शुभाँल्लोकाननुत्तमान्। ततो गच्छेत धर्मज्ञ! तीर्थं त्रैलोक्यविश्रुतम्। लोका यत्रोद्धृताः पूर्वं विष्णुना प्रभविष्णुना। लोकोद्धारं समासाद्य तीर्थं त्रैलोक्यपूजितम्। स्नात्वा तीर्थवरे राजन्! लोकानुद्धरते स्वकान्। श्रीतीर्थञ्च समासाद्य स्नात्वा नियतमानसः। अर्च्चयित्वा पितॄन् देवान् विन्दते श्रियमुत्तमाम्। कपिलातीर्थमासाद्य ब्रह्मचारी समाहितः। तत्र स्नात्वार्च्चयित्वा च पितॄन् स्वान् दैवतान्यपि। कपिलानां सहस्रस्य फलं विन्दति मानवः। सूर्यतीर्थं समासाद्य स्नात्वा नियतमानसः। अर्च्चयित्वा पितॄन् देवानुपवासपरायणः। अग्निष्टोममवाप्नोति सूर्यलोकञ्च गच्छति। गवां भवनमासाद्य तीर्थसेवी यथाक्रमम्। तत्राभिषेकं कुर्व्वाणो गोसहस्रफलं लभेत्। शङ्खिनीतीर्थमासाद्य तीर्थसेवी कुरूद्वह!। देव्यास्तीर्थे नरः स्नात्वा लभते रूपमुत्तमम्। ततो गच्छेत राजेन्द्र! द्वारपालं करन्तुकम्। तच्च तीर्थं सरस्वत्यां यक्षेन्द्रस्य महात्मनः। तत्र स्नात्वा नरो राजन्नग्निष्टोमफलं लभेत्॥" "धर्म्मक्षेत्रे कुरुक्षेत्रे द्वादशयोजनावधि" हारा०। २देवयजनस्थाने "कुरुक्षेत्रेऽमी देवा यज्ञं तन्वते" शत०ब्रा० ४।१।५।१३। "तेषां कुरुक्षेत्रं देवयजनं तस्मादाहुः कुरुक्षेत्रं देवानां देवयजनं तस्माद्यत्र क्व च कुरुक्षेत्रस्य निगच्छति तदेव मन्यत इदं देवयजनमिति तद्धि देवानां देवयजनम्" शत० ब्रा० १४।१।१।२ अस्मिन् पक्षे च कुरु देवयज्ञाधारभूतक्षेत्रम् आधारे कर्त्तृत्वोपचारात् कर्त्तरि कुप्रत्यय इति मन्तव्यम्। ३अविमुक्ते क्षेत्रे च। देवयजनपरताऽविमुक्तपरता चास्य "धर्म्मक्षेत्रे कुरुक्षेत्रे" इति गीताव्या० नीलकण्ठेन समर्थिता यथा "तत्र वेदे तेषां कुरुक्षेत्रं देवयजनमासेति" कर्मकाण्डप्रसिद्धं कुरुक्षेत्रमन्यत् "अविमुक्तं वै कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्म सदनम्" इत्यविमुक्ताख्यं ब्रह्मप्राप्तिस्थानभूतं कुरुक्षेत्रमन्यत् ब्रह्मसदनत्वं चास्य "अत्र हि जन्तोः प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे येनासावमृती भूत्वा मोक्षी भवतीति" वाक्यशेषेण व्युत्पादितम् एतद्व्यावृत्त्यर्थं धर्मक्षेत्रे इति विशेषणं कुरुदेशान्तरगतं हि कुरुक्षेत्रं धर्मक्षेत्रमेव न तु तत् ब्रह्मसदनमपवर्गकाण्डे तस्य धर्मक्षेत्रत्वमात्रश्रवणात्"

कुरुक्षेत्रीयोग पु० एकस्मिन् सावने तिथिनक्षत्रयोगानां क्षयरूपे ज्यो० उक्ते १योगभेदे। २कुरुक्षेत्रे मृत्युसूचके पङ्कयोगभेदे च। "पञ्चपङ्कयुते मृत्यौ लग्नकण्टे ग्रहस्सतौ। सौम्यक्षेत्रगते लग्ने कुरुक्षेत्रे मृतिर्भवेत्" जातकास्तते योगाध्याय।

कुरुजाङ्गल न० जङ्गलमेव जाङ्गलं कुरुषु जाङ्गलम्। १कुरुक्षेत्रे "तस्य नाम्नाऽभिविख्यातं पृथिव्यां कुरुजाङ्गलम्। कुरुक्षेत्रं स(कुरु) तपसा पुण्यं चक्रे महातपाः" भा०आ०६४ अ०। "यदा परीक्षित् कुरुजाङ्गले वसन्" भाग०१,१६,११, कुरवश्च जाङ्गलाश्च द्व०। "कुरुदेशे जाङ्गलदेशे च पु भूम्नि "कथमाचक्षित पौरै

राजेन्द्र । वरिन्द्रमपि महामते ।। पञ्चाशदपि यो राजा
कुरु सत्रमयाज च । ततस्तत्प्रभृत्येव महर्षेराभरा-
श्रमा । समाज त्रिदिवं सूत दिवं सुवर्णभूषणा । रत्न-
वैदूर्य्यभूषणैः । तत्र राजर्षयो हरा । यज्ञैर्य यजन्त
सार्व्व महार्घेण यदैसता । तासां सततं सम भूमि
कालं यविन्द्रपि । एवं तपांसि वै किञ्चित् तथा यत्
सर्व्वं मता । देवमानेन ते सर्व्वे यावन्ति अक्षया चयम् ।
ते इत्थं सततमासौ वै साम दाक्षिणि चावना । तैर्न
यज्ञमुखैर्व यविन्द्रसमिरैव वै ये येन मिल
सहसा निसृष्टानि पुरोहिताः । सबल मिल ते तु न
पूर्वाणि चरान्त । यजति ये च महर्षिदत्त्वैर्वे
सेवताः । तैर्न त्रिदिवे यातो यावद् विमेदिनीयपि ।
अपि चात्र सर्व्वे ततो यमी मातां सुरापिता । कुरु-
क्षेत्रमिदं ये वै अमुत्र कृतपुण्य ।। पांशवोऽपि कुरु
क्षेत्रस्य वायुना समुदीरिताः । अपि दुष्कृतकर्माणं नयन्ति
परमां गतिम् । सर्व्वैस्ता ब्राह्मणसमाज तथा समासाद्य
सरस्वतीक्षेत्राः । तथा यत्रापि महर्षिभिर्यदि । यज्ञेष्व
देवान् यजन्ति ततः । तरन्तुकारन्तुकयोर्यदन्तरं राम-
ह्रदानाञ्च मचक्रुकस्य । एतत् कुरुक्षेत्रसमन्तपञ्चकं प्रजा-
पतेरुत्तरवेदिरुच्यते । शिवं महापुण्यमिदं दिवौकसां
सुसम्मतं सर्व्वगुणैः समन्वितम् । अतश्च सर्व्वे निहता नृपा
रणे यास्यन्ति पुण्यां गतिमक्षयां सदा । इत्युवाच स्वयं
शक्रः सह ब्रह्मादिभिस्तदा । तच्चानुमोदितं सर्व्वं ब्रह्म-
विष्णुमहेश्वरैः ।

कुरुक्षेत्र सर्व्वेषु तीर्थेष्वपि मध्यवर्त्तितीर्थमध्यवर्त्तितीर्थं
भवति यस्मात् ५३।१।२४।

कुरुक्षेत्रं च महर्षिभिः "कुरुक्षेत्रं तद् समन्तपञ्चकं महाभाग
पूर्व्वमभवत् । तत महर्षिभिर्वै महापुण्यमिदमभवत्"
इत्युक्ते । एवं चैतत्कुरुक्षेत्रमपरामृतमर्थमवाप्य महात्मा
सर्व्वमिदम् वामन कुरुक्षेत्रमिति नाम्नाख्यं "कुरुक्षे
त्रमिति कुरुक्षेत्रम् । वा वामनपुराणे । "यथा
च सरस्वत्यामौ तथा कुरुक्षेत्रम् । राजन च यथा
सर्व्वे सर्व्वेषु इति वेदिरे । तत्र मासान्तरमपि त्रिकालं
पूर्णिमां कुरुक्षेत्रम् । कुरुक्षेत्रं च सततं तत्र
तत्र चतुर्युगात्" इति ।

कुरुक्षेत्रस्य तीर्थविशेषाणि वामनपुराणे यथा "ततो
गच्छेत राजेन्द्र । कुरुक्षेत्रमभिष्टुतम् । पापेभ्यो
विप्रमुच्यन्ते तद्गताः सर्व्वजन्तवः । कुरुक्षेत्रं गमिष्यामि

कुरुक्षेत्रे वसाम्यहम् । य एवं सततं ब्रूयात् सोऽपि
पापैः प्रमुच्यते । पांशवोऽपि कुरुक्षेत्रे वायुना समुदी-
रिताः । अपि दुष्कृतकर्माणं नयन्ति परमां गतिम् ।
दक्षिणेन सरस्वत्या दृषद्वत्युत्तरेण च । ये वसन्ति कुरुक्षेत्रे
ते वसन्ति त्रिविष्टपे । तत्र मासं वसेद्धीरः । सरस्वत्यां
युधिष्ठिर ।। यत्र ब्रह्मादयो देवा ऋषयः सिद्धचारणाः ।
गन्धर्व्वाप्सरसो यक्षाः पन्नगाश्च महीपते ।। ब्रह्मक्षेत्रं
महापुण्यमभिगच्छन्ति भारत ।। मनसाप्यभिकामस्य कुरु-
क्षेत्रं युधिष्ठिर ।। पापानि विप्रणश्यन्ति ब्रह्मलोकं
च गच्छति । गत्वा हि श्रद्धया युक्तः कुरुक्षेत्रं कुरूद्वह ।।
फलं प्राप्नोति च तदा राजसूयाश्वमेधयोः । ततो मच-
क्रुकं नाम द्वारपालं महाबलम् । यक्षं समभिवाद्यैव
गोसहस्रफलं लभेत् । ततो गच्छेत धर्म्मज्ञ विष्णोः
स्थानमनुत्तमम् । सततं नाम राजेन्द्र । यत्र सन्निहितो
हरिः । तत्र स्नात्वा च नत्वा च त्रिलोकप्रभवं हरिम् ।
अश्वमेधमवाप्नोति विष्णुलोकं च गच्छति । ततः पारिप्लवं
गच्छेत्तीर्थं त्रैलोक्यविश्रुतम् । अग्निष्टोमातिरात्राभ्यां
फलं प्राप्नोति भारत ।। पृथिवीतीर्थमासाद्य गोसहस्रफलं
लभेत् । ततः शालूकिनीं गत्वा तीर्थसेवी नराधिप ।।
दशाश्वमेधे स्नात्वा च तदेव लभते फलम् । सर्पदर्व्वीं
समासाद्य नागानां तीर्थमुत्तमम् । अग्निष्टोममवाप्नोति
नागलोकञ्च विन्दति । ततो गच्छेत धर्म्मज्ञ द्वारपालं
तरन्तुकम् । तत्रोष्य रजनीमेकां गोसहस्रफलं लभेत् ।
ततः पञ्चनदं गत्वा नियतो नियताशनः । कोटितीर्थ-
मुपस्पृश्य हयमेधफलं लभेत् । अश्विनोस्तीर्थमासाद्य
रूपवानभिजायते । ततो गच्छेत धर्म्मज्ञ वाराहं तीर्थ-
मुत्तमम् । विष्णुर्वाराहरूपेण पूर्व्वं यत्र स्थितोऽभवत् ।
तत्र स्नात्वा नरव्याघ्र अग्निष्टोमफलं लभेत् । ततो
जयन्त्यां राजेन्द्र सोमतीर्थं समाविशेत् । स्नात्वा फल-
मवाप्नोति राजसूयस्य मानवः । एकहंसे नरः स्नात्वा
गोसहस्रफलं लभेत् । कृतशौचं समासाद्य तीर्थसेवी
नराधिप । पुण्डरीकमवाप्नोति कृतशौचो भवेन्नरः ।
ततो मुञ्जवटं नाम महादेवस्य धीमतः । तत्रोष्य
रजनीमेकां गाणपत्यमवाप्नुयात् । तत्रैव च महाराज ।
यक्षिणी लोकविश्रुता । स्नात्वाभिगम्य राजेन्द्र । सर्व्वान्
कामानवाप्नुयात् । कुरुक्षेत्रस्य तद्द्वारं विश्रुतं भरत-
र्षभ ।। प्रदक्षिणमुपावृत्य तीर्थसेवी समाहितः । सम्मितं
पुष्कराणाञ्च स्नात्वाभ्यर्च्य पितॄन् । जामदग्न्येन रा-

कञ्चुलिकायां (काचुली) स्वार्थे क । तत्रैवार्थे । "प्रागे-न्यारिसविशेषविषमभङ्गे कु(कू)र्पासकं शताम्बरणगलु-लिपत्नी" माघ । "मनोभव(कू)र्पासकमीर्ष्यतत्सना" रत्ना०   [१कर्त्तरि त्रि० । स्त्रियां ङीप् ।

कुर्वत् पुंस्त्री कृ—शतृ । १चर्मकारे २शिल्पे त्रि० नित्य

कुर्वद्रूप पु० कुर्वत् फलोन्मुखं रूपं यस्य । मतुमासिद्धे फलजननाय योग्ये धान्यादौ बीजे । तच्च बौद्धमते स्वातिशयात्मा सहकारिभिराधीयते इति स्थितम् यथा "अथ भावादभिन्नोऽतिशयः सहकारिभिराधीयते इत्यु-प्रपगम्यते तर्हि प्राचीनभावोऽनतिशयात्मा निवृत्त अ-न्यस्यातिशयात्मा कुर्वद्रूपादिपदवेदनीयो जायत इति" सर्व्वदर्शनसं० । क्षणिकशब्दे बौद्धशब्दे च विवृतिः ।

कुर्वाण त्रि० कृ—शानच् । १भृत्ये २कारके च शब्दचि० ।

कुर्वादि पु० अपत्ये ण्यप्रत्ययनिमित्ते पाणिन्युक्ते शब्दगणभेदे "कुरु गर्ग कुरु गर्गर मङ्गुष अजमार रथकार वावदूक (सम्राज क्षत्रिये) कवि विमति कापिञ्जलादि वाक् वाम-रथ पितृमत् इन्द्रजाली एजि वातकि दामोष्णीषि गण-कारि कैशोरि कुट शलाका मुर पुर एरका शुभ्र अभ्र दर्भ केशिनी (वेणा छन्दसि) शूर्पणाय श्यावनाय श्यावरथ श्यावपुत्र सत्यङ्कार वडभीकार पथिकार मूढ शकन्धु शङ्कु शाकम् शाकिन् शालीन कर्त्तृ हर्त्तृ इन पिण्डी (वामरथस्य कण्वादिवत् स्वरवर्जम्) कौरव्य

कुल बन्धे सङ्ख्याने च भ्वा०पर०अक० सेट् । कोलति अको-लीत् चुकोल । कुलम् । पर्ण्यस्य प्रयोग इति वदन् दुर्गादास व्याकुल सङ्कुलत्यादिप्रयोगमपश्यन् परास्तः । आ+व्याप्ततायाम् सङ्कुलतायाम् । आकोलति "किन्ने-मदियाकुलमीक्षित तने" माघ "उदपातदिवसाकुल बोधये" भट्टिः ।

सम्+सङ्कीर्णतायाम् सङ्कुल युद्धम् भा०द्रो०प० । "अलि-कुलसङ्कुलकुसुमनिराकुलेत्यादि" जयदेव । "शकुन्तकुला-कुलेन" माघ ।

कुल न० कुल—क, वाहु शब्दे मार्ग्गणे वा० मक्, कु भूमि लाति ला—क, कौ भूमौ लीयते "अन्येष्वपि" पा०ड० यथायथम् व्युत्पत्तिः । १जनपदे देशे । मध्यमहलद्वयेन यावती भूमिं कृष्यते तावत्यां भूमौ "दशौ कुलन्तु भुञ्जीत" मनुः । "अष्टागवं धर्म्महलं षड्गवं जीवि-तार्थिनाम् । चतुर्गवं नृशंसानां द्विगवं ब्रह्मघातिनाम्" हारीतस्मरणात् "षड्गवं मध्यमं हलमिति तथाविध-हलद्वयेन यावती भूमिं कृष्यते तावद्भूमिं कुल-मित्युच्यते" कुल्लू० । ३गोत्रे ४वंशे । ५सजातिगणे विप्र कुलम् पक्षिकुलम् । शिष्टकुलाय कुलानि ज्ञात्वा माघ तत्र मनुक्तधर्म्मः "अयाजो विवाहो क्रिया परिहा-नोर्वेदनम्रु । विना ह्याज्ञापीडा कन्या कुलसम्पादनम् । अभियुक्तोक्ता' तत्र माघभवाः "तान्यं पुं०।मू० ज०उक्ता यथा "गोभिरश्वैश्च यानैश्च कृष्या राजोपसेवया । कुलान्य-कुलतां यान्ति यानि हीनानि मन्त्रतः । कुविवाहैः क्रिया लोपैर्वेदानध्ययनेन च । कुलान्यकुलतां यान्ति ब्राह्मणा-तिक्रमेण वै । अनृतात् पारदार्य्याच्च तथाऽभक्ष्यभक्ष-णात् । अश्रौतधर्म्माचरणात् क्षिप्रं नश्यति वै कुलम् । अश्रोत्रियेषु वेदानां दानेषु वृषलेषु च । विहिताचार-हीनेषु क्षिप्रं नश्यति वै कुलम्" ।

मनुना तु कुलनाशकान्यो न्यारव्यक्तं यथा "शोचन्ति जामयो यत्र विनश्यत्याशु तत् कुलम् । न शोचन्ति तु यत्रैता वर्द्धते तद्धि सर्व्वदा । जामयो यानि गेहानि शपन्त्यप्रतिपूजिताः । तानि कृत्याहतानीव विनश्यन्ति समन्ततः । तस्मादेताः सदा पूज्या भूषणा-च्छादनाशनैः । भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च । सन्तुष्टो भार्य्यया भर्त्ता भर्त्रा भार्य्या तथैव च । यस्मि-न्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम् । यदि हि स्त्री न रोचेत पुमांसं न प्रमोदयेत् । अप्रमोदात् पुनः पुंसः प्रजनं न प्रवर्त्तते । स्त्रियान्तु रोचमानायां सर्व्वं तद्रोचते कुलम् । तस्यान्त्वरोचमानायां सर्व्वमेव न रोचते । कुविवाहैः क्रियालोपैर्वेदानध्ययनेन च । कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण च । शिल्पेन व्यवहारेण शूद्रापत्यैश्च केवलैः । गोभिरश्वैश्च यानैश्च कृष्या राजोपसेवया । अयाज्ययाजनैश्चैव नास्तिक्येन च कर्म्मणाम् । कुलान्याशु विनश्यन्ति यानि हीनानि मन्त्रतः । मन्त्रतस्तु समृद्धानि कुलान्यल्पधनान्यपि । कुलसङ्ख्याञ्च गच्छन्ति कर्षन्ति च महद्यशः" ।

कुलस्त्रार्थविवाहविषये त्याज्यकुलानि मनुनोक्तानि यथा "महान्त्यपि समृद्धानि गोऽजाविधनधान्यतः । स्त्रीसम्ब-न्धे दशैतानि कुलानि परिवर्ज्जयेत् । हीनक्रियं निष्पु-रुषं निश्छन्दोरोमशार्शसम् । क्षय्यामयाव्यपस्मारिश्वित्रि-कुष्ठिकुलानि च" । ६समूहे ७देहे च पुंक्लीबे लिं० मेदि० । "जीवप्रकृतितत्त्वञ्च दिक्कालाकाशमेव च । क्षित्यप्तेजो-वायवश्च कुलमित्यभिधीयते" तन्त्रोक्ते ८जीवादिषु ।९कु-

[illegible] "मीनरा" । [illegible]

[illegible]

[illegible] "मीता ।

[illegible]

कर्णुनिकायां (कांचुली) स्वार्थे क । ततः स्वार्थे । "सर्वे-तरवारिदविशेषविपक्षमस्ते कु(कू)र्पासकं घनतरघनकुचस्तु-चिपन्ती" माघ । "मनोज्ञकु(कू)र्पासकपीडितस्तनाः" रत्ना० [२कर्णीर लि० । स्त्रियां ङीप् ।

कुर्व्वत् पुस्त्री कृ—शतृ । १कर्म्मकारे २भृत्ये त्रि० त्रिका० ।

कुर्व्वद्रूप पु० कुर्व्वत् फलोन्मुखं रूपं यस्य । बौद्धमतसिद्धे फलजननाय योग्ये धान्यादौ बीजे । स च बौद्धमते अतिशयात्मा सहकारिभिराधीयते इति स्थितम् यथा "अथ मा भूदभिन्नोऽतिशयः सहकारिभिराधीयते इत्यु-पगम्यते तर्हि प्राचीनस्यातिशयात्मा निवृत्त अन्यस्यातिशयात्मा कुर्व्वद्रूपादिपदवेदनीयो जायत इति" सर्व्वदर्शनसं० । क्षणिकशब्दे बौद्धशब्दे च विवृतिः ।

कुर्व्वाण त्रि० कृ—शानच् । १भृत्ये २कारके च शब्दचि० ।

कुर्व्वादि पु० अपत्ये ण्यप्रत्ययनिमित्ते पाणिन्युक्ते शब्दगणभेदे "कुरु गर्ग मङ्गुष अजमार रथकार वावदूक (सम्राजः क्षत्रिये) कवि विमति कापिञ्जलादि वाक् वाम-रथ पितृमत् इन्द्रजाली एजि वातकि दामोष्णीषि गण-कारि कैशोरि कुट शलाका मुर पुर एरका शुभ्र अभ्र दर्भ केशिनी (वेणा छन्दसि) शूर्पणाय श्यावनाय श्यावरथ श्यावपुत्र सत्यङ्कार वडभीकार पथिकार मूढ शकन्धु शङ्कु शाकिन् शालीन कर्त्तृ हर्त्तृ इन पिण्डी (वामरथस्य कण्वादिवत् स्वरवर्जम्) कौरव्य

कुल बन्धे सङ्ख्याने च भ्वा०पर०अक० सेट् । कोलति अकोलीत् चुकोल । कुलम् । यद्यप्यस्य प्रयोग इति वदन् दुर्गादास आकुल सङ्कुलत्यादिप्रयोगमपपन्नम् परास्त । आ+व्यग्रतायाम् चञ्चलतायाम् । आकोलति "किमि-तदियाकुलमीक्षितं जनैः" माघः "उटयतादिममाकुलं लोचनैः" भट्टि ।

सम्+सङ्कीर्णतायाम् सङ्कुल युक्तम् भा०द्रो०प०। "अलि-कुलसङ्कुलकुसुमसमूहनिराकुलेत्यादि" जयदेव । "गजकुला-कुलेन" माघ ।

कुल न० कुल—क, कुल् शब्दे पाणिनि मा० नम्, कु भूमिं लाति ला—क, कौ भूमौ लीयते "अन्येष्वपि" पा०ड० यथायथम् व्युत्पत्तिः । १जनपदे देशे । मध्यमहलद्वयेन यावती भूमिं कृष्यते तावत्या २भूमौ "दशी कुलन्तु भुञ्जीत" मनु । "अष्टागवं धर्म्महलं षड्गवं जीवि-तार्थिनाम् । चतुर्गवं नृशंसानां द्विगवं ब्रह्मघातिनाम्" हारीतवचनात् "षड्गवं मध्यमं हलमिति तथाविध-हलद्वयेन यावती भूमिः कृष्यते तावद्भूमि कुल-मित्युच्यते कुल्लू० । ३गोत्रे ४वंशे । ५सजातीयगणे यथा कुलम् पक्षिकुलम् । ६सत्कुलाय कुलाचारविशिष्टान् गाथ तत्र सत्कुलधर्म्माः "आचारो विनयो विद्या प्रतिष्ठा तीर्थदर्शनम् । निष्ठा वृत्तिस्तपो दानं नवधा कुललक्षणम्' । अभियुक्तोक्ता' तस्य नाशकधर्म्मश्च कूर्म्म पु०१५ अ०उक्ता यथा "गोभिश्च घोटकैर्याभि । कृष्या राजोपसेवया । कुलान्य-कुलतां यान्ति यानि हीनानि सत्तम । कुविवाहैः क्रिया लोपैर्वेदानध्ययनेन च । कुलान्यकुलतां यान्ति ब्राह्मणा-तिक्रमेण वै । अनृतात् पारदार्याच्च तथाऽभक्ष्यस्य भक्ष-णात् । अश्रौतधर्माचरणात् क्षिप्रं नश्यति वै कुलम् । अश्रोत्रियेषु वेदानां वृषलेषु तथैव च । विहिताचार-हीनेषु क्षिप्रं नश्यति वै कुलम्" ।

मनुना च कुलनाशवृद्ध्योः कारणमुक्तं यथा "शोचन्ति जामयो यत्र विनश्यत्याशु तत् कुलम् । न शोचन्ति तु यत्रैता वर्द्धते तद्धि सर्वदा । जामयो यानि गेहानि शपन्त्यप्रतिपूजिताः । तानि कृत्याहतानीव विनश्यन्ति समन्ततः । तस्मादेताः सदा पूज्या भूषणा-च्छादनाशनैः । भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च । सन्तुष्टो भार्य्यया भर्त्ता भर्त्रा भार्य्या तथैव च । यस्मि-न्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम् । यदि हि स्त्री न रोचेत पुमांसं न प्रमोदयेत् । अप्रमोदात् पुनः पुंसः प्रजनं न प्रवर्त्तते । स्त्रियान्तु रोचमानायां सर्व्वं तद्रोचते कुलम् । तस्यान्त्वरोचमानायां सर्व्वमेव न रोचते । कुविवाहैः क्रियालोपैर्वेदानध्ययनेन च । कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण च । शिल्पेन व्यवहारेण शूद्रापत्यैश्च केवलैः । गोभिरश्वैश्च यानैश्च कृष्या राजोपसेवया । अयाज्ययाजनैश्चैव नास्तिक्येन च कर्म्मणाम् । कुलान्याशु विनश्यन्ति यानि हीनानि मन्त्रतः । मन्त्रतस्तु समृद्धानि कुलान्यल्पधनान्यपि । कुलसङ्ख्याञ्च गच्छन्ति कर्षन्ति च महद्यशः" ।

कुलरक्षार्थविवाहविषये त्याज्यकुलानि मनुनोक्तानि यथा "महान्त्यपि समृद्धानि गोऽजाविधनधान्यतः । स्त्रीसम्ब-न्धे दशैतानि कुलानि परिवर्ज्जयेत् । हीनक्रियं निष्पु-रुषं निश्छन्दोरोमशार्शसम् । क्षय्यामयाव्यपस्मारिश्वित्रि-कुष्ठिकुलानि च"। ६गृहे ७देहे च स्त्रीचे त्रि० मेदि० । "जीवप्रकृतितत्त्वञ्च दिक्कालाकाशमेव च । क्षित्यप्तेजो वायवश्च कुलमित्यभिधीयते' तन्त्रोक्तेषु ८जीवादिषु ९कु-

[illegible]

विग्रत" इति नित्यक्रियाम्नायेऽपि "सर्व्वं तावच्छिवा-ख्येया कामिनीषु विशेषत । महामते तत्रजायामतिर्हीन न कारयेदिति" एकया तत्त्व न योगिनां हृदयाम्भोजे नृत्यन्तीत्यस्य तैरेव गुरूपदेशेन ज्ञायते इत्यर्थ । "इयन्ना तैरेव सा देवी सदा देवकदेवितैरित्युक्तो सर्वभूतानाम् आधारे मूलाधारचक्रे स्फुरन्ती अनेन स्थाननिर्देशः विद्युदाकृति-रित्यनेन ध्यानमुक्तं यदाह "तडित्कोटिमहच्चं स्वरुचि-जितकामानलरुचिमिति" एव चानेन अनेकधा ज्योत्-पत्तिपक्षयेनानेकधा भवतीत्यु हृन्मध्ये च व्याप्ते स यथा शङ्खमध्यगाद्यत्व तिष्ठति तद्वदियमपि देवीत्यर्थ. । इदमवान्तरवाक्य मिदमेव शङ्खेति कुण्डलीत्यनयोर्द्वे तत्रैवमन्वये योजना । कुण्डलीभूता कुण्डलाकारतां प्राप्ता ये सर्पा तथाभूता । योषन कुण्डलीति भिन्न पद सर्पयन्ति भूतानि सर्पास्ते यथा कुटिलगतयश्चादिस-मर्पीत्यर्थ इति तत्र कुण्डली परदेवतेत्यनेन पुनरुक्तिः । सर्व्वदेवमयीति देवव्याप्तिः दीव्यतीति देवी तेजोरूपेत्यर्थः अनेन तेजोव्याप्ति । सर्वमन्त्रमयीति मन्त्रव्याप्तिः । शिवा शिवरूपेत्यर्थं यद्वा शिवा कल्याणरूपा । साक्षात् सर्व-तत्त्वमयीति तत्त्वव्याप्ति । सूक्ष्मा सूक्ष्मतरा विभुरिति विरोध परिहारस्तु सूक्ष्मा स्वरूपत सूक्ष्मतरा दुर्ज्ञाना यद्वा सूक्ष्मात् लघरेणोरपि सूक्ष्मतरा अणुतरा अनेना-स्वादिव्याप्तिर्दर्शिता तदुक्तं "वालाग्रस्य शतधा वि-दलितस्यैकेन भागेन या सूक्ष्मात्वात् सूक्ष्मो लिङ्गो सन नीति" विभु व्यापकतया व्यापकस्वभावा । त्रिधामेति सूर्यसो-माग्निरूपा । यद्वा त्रिधामेति स्थानत्रय पाताल भूस्वर्गरूपा अनेन स्थानव्याप्तिर्दर्शिता द्विचत्वारिंशद्वर्णात्मा मूर्त्तिः विमन्त्रमयो पञ्चाशद्वर्णरूपिणीति मातृकामयी" ।

तस्या ध्यानादिकमुक्तं प्रयोगसारे यथा

"मूलाधारे कुण्डलिनीं ध्यात्वा सम्पूजयेत्तर । ध्यान तस्या प्रवक्ष्यामि येन योगी प्रजायते । प्रसुप्तभुज-गाकारा स्वयम्भूलिङ्गमाश्रिताम् । विद्युत्कोटिप्रभा देवीं विचित्रवसनान्विताम् । शृङ्गारादिरसोल्लासां सर्व्व-दा कारणप्रियाम् । एव ध्यात्वा कुण्डलिनीं ततोयत्नेन समाहितः । प्रणवा गन्धपुष्पाद्यै सम्पूज्य वाग्भव जपेत् । ततोपि तोषयेत्तान्तु स्तवेनानेन साधक । "रुद्रयामले" च-य प्रात समुत्थाय पद्मरुत्तमपण्डित । गुरूणां चरणा-म्भोज मङ्गलं शीर्षपङ्कजे । विभाव्य पुनरेव हि श्रीपद भावयेद्धृदि । पूजयित्वा च विविधैरुपचारैर्नमेत् स्तवैः ।

त्तैलोक्यं तेजसा व्याप्तां महाकुलस्या सहायकम् । तडि-त्कोटिप्रभादीप्तिं चन्द्रकोटिसुशीतलाम् । सार्द्धत्रिवलया-कारा स्वयम्भूलिङ्गवेष्टिताम् । उत्थापयेन्महादेवीं प्र णामपूर्वं मनोन्मनीम् । स्वाधिष्ठानादुद्गच्छन्तीं षट्-चक्रारूपिणीम् । योगिनीं खेचरीं वायुरूपां मूलाम्बु-जस्थिताम् । चतुर्व्वर्णस्वरूपां तां वकारादिक्षसान्तकाम् । कोटिकोटिसहस्रार्कफिरणोज्ज्वलसोभिनीम् । महासू-क्ष्मपथमान्तरन्तरान्तरगामिनीम् । त्रैलोक्यरचिता साक्ष देवतां शब्दरूपिणीम् । षडाम्बुजिमदां देवीं शङ्खमुद्रा गामिनीम् । महासूक्ष्मपथे तेजोमयीं सत्युसर्वरूपिणीम् । कामरूपां महारूपां सर्व्वत्र सर्वविषमयीम् । ध्यात्वा पुन पुन शीर्षे सुधाब्धौ शिवनिर्मिताम् । सुधापान कारयित्वा पुन स्थाने समानयेत् । समानयनकाले तु सुषुम्णामध्य-मध्यकैः । पञ्चाशाभिस्तु ता कृत्वा पुन स्थानेषु पूजयेत् । अहोऽदृगमनकाले तु महातेजोमयी चरेत् । प्रतिमयाण काले तु सुधाधाराभिराप्लुताम् । कुलकुण्डलिनीं देवीं सहतामन्तर्विग्रहाम् । ध्यात्वा ध्यमना पुनर्ध्यात्वा सर्व्व-सिद्धीश्वरोभवेत् । तस्मिन् स्थाने महादेवीं विभाव्य किरणोज्ज्वलाम् । अस्रतानन्दमूर्त्तिं तां पूजयित्वा शुभां सदा । मानसोश्वारबीजेन मायां वा कामबीज-कम् । पञ्चाशद्वर्णमालाभिर्वापि नुलोमतस्तथा । विलोमेन पुनर्जपेति"

कुलक पु० कु+लक-याप्तौ भावे घञ् । करतालयाम् ङारा० ।

कुलक्षया स्त्री कुलस्य क्षयोयस्मा । १मूकविम्बया शब्द-चि० इत० । २कुलनाशे पु० । "कुलक्षयकृत दोष मित्रद्रोहे च पातकम्" । "कुलक्षये प्रणश्यन्ति कुल-धर्मा सनातना" गीता ।

कुलघ्न त्रि० कुल हन्ति हन–टक् । वंशघातके । "सङ्करो-नरकायैव कुलघ्नानां कुलस्य च । पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रिया । दोषैरेत कुलघ्नानां वर्णसङ्कर कारकै । उत्सादान्ते जातिधर्म्माः कुलधर्म्माश्च शाश्वता । उत्सन्नकुलधर्म्माणां मनुष्याणां जनार्द्दन । नरके नियतं वासोभवतीत्यनुशुश्रुम " गीता । तत्र यथोत्तर कार्य्य यथा तत्रैव "कुलक्षये प्रणश्यन्ति कुलधर्म्मा सनातना. । धर्म्मे नष्टे कुल कृत्स्नमधर्मोऽभिभवत्युत । अधर्म्माभि भवात् कृष्ण । प्रदुष्यन्ति कुलस्त्रिय । स्त्रीषु दुष्टासु वा-र्ष्णेय । जायते वर्णसङ्कर । सङ्करोनरकायैव कुल-घ्नानां कुलस्य च" एतदुत्तर कुलघ्नशब्दे दर्शितम्

कुलज त्रि कुले जायते जन–ड । सत्कुलोद्भवे । स्त्रियां टाप् ।

कुलजा स्त्री कुलजात् रजस्वति रज–विप् । कुलजनसे रामविभ्रमस्ता स । कुलजनोऽयम् "कुलजम्" कथिता अन्यत दोषवता । भूमरोऽपि वाणी च रामनि मधुपका उदाः

कुलटा स्त्री कुलात् कुलान्तरं व्यभिचारार्थं अटति अट–अच् । व्यभिचारिण्यां स्त्रियाम् । सा तु भिक्षार्थं कुलं भवति या कुलाटा इति अत च अक । इति भरतः

कुलटी स्त्री कुलमिव रमते रम–बाधने बर्ब्बरे च गौरा डीप् स्था वा । मनःशिलायां राजनि०

कुलतन्तु पु कुलस्य तन्तुरिव । कुलावलम्बनेऽपत्ये च कुलं तनोति च तन्तुः । धृतराष्ट्रेण कुलौ कुलतन्तुः ख्याता ॥

कुलतिथि स्त्री तिथितत्त्वोक्तायां तिथिविशेषे कर्तव्यतिथिषु चतुर्थ्यष्टमीद्वादशीचतुर्दशीषु यथोक्त तन्त्रसारे "द्वितीया दशमी षष्ठी कुलाकुलमुदाहृतम् । विषमा अकुला ज्ञेया शेषास्तु कुलसंज्ञिता ॥"

कुलत्थ पु कुलं तिष्ठति स्था–क पृषो । स्वनामख्याते (कुलथकलाइ) शस्यभेदे स्त्री टाप् राजनि० । तद्गुणादि भावप्र० उक्तं

"कुलत्थिका कुलत्थश्च ताम्रवृन्तो सितश्च सः । कुलत्थः कटुकः पाके कषायो रक्तपित्तकृत् । लघुर्विदाही वीर्योष्णः श्वासकासकफानिलान् । हन्ति हिक्काश्मरीशुक्रदाहानाहान् सपीनसान् । स्वेदसंग्राहको मेदोज्वरकृमिहरः परः । " राजनि० कुलत्थिकेति मिहिरः कुलत्थवत् तु वनजातत् स्वल्पकुलत्थकायां च स्त्री राजनि० कुलाली श्रोत्रवर्द्धिनी चक्षुष्या कुलत्थिका अत्यविषेति राजनि० चक्षुष्यकुलत्थायां कर्ब्बरे च । तत्रैव कुलाली श्रोत्रवर्द्धिनी । राजनि० कुलत्थ । कुलालाञ्जनाकारत्वात् तथात्वम् ।

कुलदर्शन न० कुलस्य दर्शनम् । कुलाचारे "कुलाचारादि चतुर्थ प्रयोगं कुर्यात् विधिवत् । निर्विशिष्टं नाम वर्णयेद्गुरुः" राजन कद्रुका कथा ।

कुलदीप पु० कुले दीप इव विशिष्टे कुलदीपक इत्यपरे "कुलदीपिकाकुलवाचक नित्यं वर्णितम् । महोर्धं यस्य चेष्टाये कलयतु । यो वदितुं कुलदीपे विशेष परिपूर्णो । सदभावात्मकम् नित्यतया कुलदीपकम् कुल दीपकं इति वचन । अतिप्रवाचकं कुलस्य हि

कुलदेवता स्त्री कुले पूज्या देवता । कुलस्वामिनीदेवतायाम् गौर्यादिष दिवस ताम्बूल इत्ये च । तथा तन्त्रसारोक्ते कुलाचरा "गौरी पद्मा शची मेधा सावित्री विजया जया । देवसेना स्वधा स्वाहा मातरो लोकमातरः । धृतिः पुष्टिस्तथा तुष्टिरात्मनः कुलदेवता ॥ मता । स्वाहा कुलदेवता"

कुलदेवी स्त्री कुले कुलाचारेणाराध्या देवी । तत्रोक्त देवीभेदे कुलदेवताः तन्त्रसारे उक्तायथा

"त्रिपुरा त्रिपुरेशी च सुन्दरी पुरसुन्दरी । भीमाक्षिणी च त्रिपुरा महात्रिपुरसुन्दरी । तन्त्रोक्ता यत्र सुप्ता देवा सुप्तदा परा । श्यामतारासवा योगा एकजटा एकवला । उग्रताररवेदा च तथा कामेश्वरी पुनः । कमलावी विशालिका भैरवी त्रिपुरसुन्दरी । महात्रिपुरसुन्दरी कुली ललिता कुलसुन्दरी । विद्या चण्डकाली च चिता तथा वज्रवैरोचनी । भावावागवादिनी विद्या नित्यो दूतवाहना । धूमावती च तथा बगला मातङ्गी मोहिनी तथा । विलासा घरदा देवी भगिनी चक्रदेवी । धनदेवी तथा योगी भामिनी कर्णकाल्पिका । विद्येशी तथा योगा दुर्गा महिषमर्दिनी । बालादेवी भुवनेशी च मातङ्गी सुरसुन्दरी । सरस्वती महीयता चित्ता कालहेरुदेवी । भावविद्या अन्नेकाली भैरवक्षारूपा । तथा चित्रा तथा च दुतिका मातङ्गकिनी । त्रिपुरा त्रिपुरा गौरी विज्ञानाधिकारिणी । भोगिनी चोदिनी प्रज्ञा कविता सप्तमाचिका । वर्णवल्लभुकरी तारा अपानी त्रिपुरारिणी । कमेश्वरी सुचारिता कविता तत्र भैरव !" । एवं कुलवाचका देवी नवविद्यापूरका उक्ता देवीभेदे च

कुलद्रुम पु "कुलद्रुमा अश्वत्थ बिल्वाश्वत्थन्यग्रोधा । निम्बो वटोऽश्वत्थो च आम्रो निम्बा तन्त्रभवा अ–शेषु तु वानस्पतिं स्मृत [तंत्रसारे तत निम्बः

कुलधारक पु० कुलं धारयति धृ–णिच्–ण्वुल्

कुलधुर्य त्रि कुलेषु धुर्य अपत्यः । कुलधुर्य

कुलनायक न० "कालाचाराविशिष्टं कुलाङ्कवासकम् । कुलानि वर्णसम्पातानि देवानि चाक्षुषाणि वै कथयन् कद्रूषु आचिन्तिमुखासंगितकुलानन्दकम् कार्यादि सर्वकर्मणि मधवे अनुचरत्व कौल गतिविधारे च

नक्तं चक्रुवे स्थायिनीभयम् । कुलाख्ये जयिनो नित्यम् साम्यञ्चैव कुलाकुले"

कुलनायिका स्त्री॰ तन्त्रोक्ते कुलैः सेव्ये नायिकाभेदे । शक्तिसाधनतन्त्रे १पटले तद्भेदादिकमुक्तं यथा
"नटी कापालिकी वेश्या रजकी नापिताङ्गना । ब्राह्मणी शूद्रकन्या च तथा गोपालकन्यका । मालाकारस्य कन्या च नव कन्याः प्रकीर्त्तिताः । विशेषवैदग्ध्ययुता सर्व्वा एव कुलाङ्गनाः । रूपयौवनसम्पन्ना शीलसौभाग्यशालिनी । पूजनीया प्रयत्नेन ततः सिद्धिर्भवेद्ध्रुवा" । अत्र विशेषयति निरुत्तरतन्त्रे १४पटले । "नटी कापालिकी वेश्या रजकी नापिताङ्गना । योगिनी श्वपची शुण्डी भूमीन्द्रतनया तथा । गोपिनी माल्यकारस्य कन्या कार्य्यविभेदतः । चतुर्व्वर्णोद्भवा रम्या कापाली सा प्रकीर्त्तिता । पूजाद्रव्यं समालोक्य वेश्याचरणमिच्छति । चतुर्व्वर्णोद्भवा रम्या सा वेश्या परिकीर्त्तिता । पूजाद्रव्यं समालोक्य रजोऽवस्थां प्रकाशयेत् । सर्व्ववर्णोद्भवा रम्या रजकी सा प्रकीर्त्तिता । पूजाद्रव्यं समालोक्य कुलजा वीरमाश्रयेत् । सत्यक्त्वा पशुभर्त्तारं कर्म्म चाण्डालिनी स्मृता । विपरीतरता पत्यौ पात्रं या परिपृच्छति । सर्व्ववर्णोद्भवा रम्या सा शौण्डी परिकीर्त्तिता । सर्व्वदा यन्त्रसंस्कारो यस्याश्च परिजायते । भूमीन्द्रजा तु रम्याऽसौ सर्व्ववर्णोद्भवा प्रिये ! । आत्मानं गोपयेद्या च सर्व्वदा पशुसङ्कटे । सर्व्ववर्णोद्भवा रम्या गोपिनी सा प्रकीर्त्तिता । पूजाद्रव्यं समालोक्य या माला परिकीर्त्तयेत् । सर्व्ववर्णोद्भवा रम्या मालिनी सा प्रकीर्त्तिता" । वेश्याया विशेषस्तत्रैवोक्तः । "गुप्तवेश्या महावेश्या कुलवेश्या महोदया । राजवेश्या देववेश्या ब्रह्मवेश्या च सप्तधा । कुलजा गुप्तवेश्या स्यात् निर्लज्जा मदनातुरा । पशुभर्त्तृरता लोके गुप्तवेश्या प्रकीर्त्तिता । कुलजा कुलवेश्या स्यात् महावेश्या प्रकीर्त्तिता । नागविद्धफलाभिश्च चुम्बयेच्च पुनः पुनः । एवंविधा कुलीना चेत् ब्रह्मवेश्या प्रकीर्त्तिता । दिव्यशक्तिर्वीरशक्तिस्तासां वश्या प्रकीर्त्तिता । चक्रवर्णोद्भवानाञ्च शक्तिता परिभाषिता । वेश्याव्रतं भ्रमते यस्मात् तस्माद्वेश्या प्रकीर्त्तिता । वर्णसङ्करतो जाता सर्व्ववेश्या प्रकीर्त्तिता" । कुलकामिन्यादयोऽप्यत्र

कुलनाश पु॰ ६त॰ । कुलस्य वंशे तत्कारणं कुलशब्दे उक्तम् तदभावकारणञ्च "यावच्च वेदधर्म्माः स्युर्यावत् स्याच्छास्त्रदर्शनम् । यावत् स्याच्छुचि सत्यञ्च तावन्न कुलनाशनम् ।

कुलं भूलग्नं नाशयति न+श्+अच् अच् शक् कृमेति समासः । १उष्ट्रे पुंस्त्री॰ हेमच॰ तस्योच्चतरकन्धरतया उन्नतप्रदेशस्य कण्टकादेः भूलग्नलग्नादेरपघातकत्वात् तथात्वम् स्त्रियां जातित्वात् ङीष् ।

"विरोधेऽर्थस्तत्परत्वात्" ५ सू० "पाठक्रमार्थक्रमयोर्विरोधे अर्थक्रम एव बलीयान् न पाठक्रमः । कुतः ? तत्परत्वात् पाठस्यार्थपरत्वात् अर्थोपित्वात् कार्यसिद्ध्यर्थत्वादित्यर्थः । तेन पूर्वं चोदनम् यवाग्वा द्रव्यया गाथया यत्कार्यमिति । अथ यत्र श्रुतेः श्रुतिपाठक्रमस्य च विरोधो भवति तद्यथा "संस्थिते यज्ञे दाक्षस्य तर्पयितवै सूयादिति" (शत०ब्रा०१।७।१।८)श्रुतिः कर्मणि समाप्ते संप्रतिष्ठिते पाठक्रमात्तु स्थितत्वात् पवात् मार्गत्वाच्चत्वारश्च पूर्वमिति तत्र केन क्रमेणानुष्ठानमित्याशङ्कायां सूत्रमाह भा० "श्रुतिः क्रमादानुमानिकत्वात्" ६ सू० "क्रमादिति श्रुतिपाठक्रमाच्छ्रुतिर्बलीयसी तेन श्रुतिप्रतीतक्रमेणैव संस्थिते कर्मणि वैधोऽङ्गारणम् न पाठक्रमेण । कुतः आनुमानिकत्वात् पाठक्रमस्य अर्थात्कृते प्रत्यक्षत्वादिति शेषः, प्रत्यक्षा हि श्रुतिः संस्थिते यज्ञे इति । पाठक्रमे त्वनुमानम् अतोऽनेन क्रमेण पदार्था अनुष्ठेया यतोऽनेनैव क्रमेण पाठ इति । दुर्बलं च प्रत्यक्षादनुमानम् । अतः श्रुतिक्रमेणानुष्ठानमिति सिद्धम् । एवम् "सप्तादेव दशमो पष्ठो स्यते तृतीय एव वषट्क्रियते" (शं०ब्रा०४।१।५।१६) इत्येतदप्युदाहरणम् किं श्रुतिमन्त्रपाठात्तृतीयस्थाने क्रियते? उत श्रुतिबलाद्दशमे? इति तत्र श्रुतिबलात्तु दशमे इति सिध्यति । अथ यत्र चोदनापाठक्रमस्य मन्त्रपाठक्रमस्य च परस्पर विरोधो भवति । यथाज्याधिश्रयणे "सोऽयाज्यमधिश्रयतीमे स्थेति" अधिश्रयणं विधाय तदनन्तरमेव "तत्पुनरुद्वासयत्यूर्जं स्थेति" (शत०ब्रा०१।२।२।१६) चोदनापाठक्रमः । मन्त्रपाठे आज्याधिश्रयणमन्त्रानन्तरं "घर्मोऽसि विश्वायुरित्यादिम् (यजु० १।२२) पत्नीसन्नहनमन्त्रान् मन्त्रगणं पठित्वा आज्योद्वासनमन्त्र "ऊर्जं स्थेति" पठितः । पूर्वाधिकरणे हि क्रमाश्रुते प्रत्यक्षत्वाद्बलीयस्त्वमुक्तम् अतोऽभयोः प्रत्यक्षत्वात्किं चोदनापाठक्रमेणाज्योद्वासनं कर्त्तव्यमुत मन्त्रपाठक्रमेणेति संशये सूत्रमाह" भा० "मन्त्रचोदनयोर्मन्त्रबलं प्रयोगित्वात्" ७सू० । "मन्त्रचोदनयोरिति मन्त्रपाठचोदनापाठयोर्विरोधे मन्त्रबलम् मन्त्रपाठ एव बलवानित्यर्थः । कुतः ? प्रयोगित्वात् मन्त्राणाम्, मन्त्रा हि कर्म्मकाले प्रयुज्यन्ते पठ्यन्ते न चोदनावाक्यानि अतो मन्त्रपाठः पदार्थानां सन्निकृष्टः चोदनापाठस्तु विप्रकृष्टः । तथा हि समिधो यजति"(शत०ब्रा०१।५।३।६) इत्यनेन पदार्थो विहितः, सोऽनुष्ठानवेलायां येन वाक्येन विहितस्तद्वाक्यं स्मारयति तेन वाक्येन पदार्थानुष्ठानवेलायां स पदार्थः स्मारितः सन्ननुष्ठीयते, इतीतरेतराश्रयः स्यात् अर्थेन वाक्यं स्मार्यते वाक्येन चार्थ इति नैष दोषः सामान्यविशेषभेदात् सामान्येन हि दर्शपूर्णमासकर्त्तव्यमित्यवगम्यते विशेषणपदार्थं विधायकं वाक्यं बोधयति तेन वाक्यबोधितेन पदार्थविशेषेण स्मारितोऽनुष्ठीयते अनुष्ठितश्चासौ प्रतिज्ञेव द्वितीयं पदार्थं स्मारयति तदीयाः यन्त्रानन्तरेण स्मृतेषु पौर्वापर्य्यस्मरणात्क्रमत्वात् कि तदनुष्ठानोत्तरकाले योऽसौ क्रतमानोऽनुष्ठीयते समिद्यागोऽयं कृत इति स चानोच्यमानो येन समिधो यजतीत्यनेन (शतपथ)।।५।३।६। ब्राह्मणवाक्येन विहितस्तत्स्मारयति तत्र स्मृतः प्रातुत्तरम् "तनूनपातं यजति"(?) तत् स्मारयति कुतः ? पाठात् तत्र पर हि तत्पाठितमिति तदनन्तरं पुनः पदार्थं विदधाति विधिरेव तत्र कार्यम् न स्मृतिः अनुष्ठानवेलायां तदेव ब्राह्मणं विधिव्यापारं कृत्वा विरमितव्यापारं प्रयोगकालाद्बहिर्भूतं स्मारकमपेक्षितम् । अथ मन्त्रपाठाद्ब्राह्मणपाठे विप्रकर्षः । तत्र उत्तरान्तःकृतः प्रयुज्यमानं परिसमाप्यमानम् उत्तरं मन्त्रं पर्य्युपस्थापयति । स चोत्तरो मन्त्रः पर्य्युपस्थाप्य उत्तरं पदार्थं पर्य्युपस्थापयन्नेव पर्य्युपतिष्ठते । तस्मात्स्वाचोदनान्तरापेक्षाभावात्सन्निकर्षः । एतदुक्तं भवति स्मारकत्वेन तावत्तुल्यत्वम् न च मन्त्रे सम्यगर्थे सति ब्राह्मणस्य स्मारकत्वम् अप्रयुज्यमानतया सामर्थ्याभावात् । न हि निर्वपामीति मन्त्रोच्चारणमन्तरेण निर्वपणमनुतिष्ठति यमकर्त्ता कर्म करोति किं तु मन्त्रस्मृतिमात्रतया प्रयोगबहिर्भूत सत् अनेन वाक्येनेदं विहितमत एतत्करोमीत्येवमालोचनेन स्मारकं भवति । मन्त्रस्तु प्रयुज्यमान एवाभिधानत एव स्मारक इति सन्निकृष्टः । विप्रकृष्टाच्च सन्निकृष्टं बलवदित्येव प्राप्ते प्राह" भाष्यम् "न समत्वात्" ८सू० । "मन्त्रपाठ एव बलवान् यदुक्तं तन्न कुतः ? समत्वात् मन्त्रपाठचोदनापाठयोः । कथमुभयोः समता उच्यते मन्त्राः कर्मणि क्रियमाणस्य कर्म्मणः स्मरणार्थे प्रयुज्यन्ते, चोदना तु कर्मणो विधायिका अत एव चोदनाया प्राप्तिः पूर्व्वम् यतः पदार्थे विहिते सति पश्चात्तत्स्मरणार्थं मन्त्रः प्रयुज्यते अतः समत्वमेवमादिति प्राप्ते सिद्धान्तमाह" भा० "गुणानां तु भूयस्त्वात्" ९सू० "तुशब्दः पूर्वपक्षनिरासार्थः । नैतदुभयं समम् किन्तु मन्त्रपाठ एव बलवान् । कुतः ?

प्रोक्षणादावपि । अथ मुख्यक्रमः अनेन क्रमेण यदाङ्गान्यनुष्ठीयन्ते तदाङ्गानां नियता प्रधानप्रत्यासत्तिरनुगृहीता भवति यत्र अङ्गप्रधानयोर्यदनुष्ठानमेव व्यवधानं भवति इतरथा तु पदार्थान्तरेण प्रधानस्य प्रथमाङ्गं क्रियमाणं प्रधानेनात्यन्तं व्यवहितं स्यात् ।

अथ प्रवृत्तिक्रम उच्यते यत्र बहूनि पूर्वोऽपि भवन्ति समानदैवतानि यथा वाजपेये पशवः तत्र चोदाकरणादयः संनिपातिनः प्रतिपश्वावर्तनीयाः । तेषां चावृत्तिर्नैकस्य पशोः कार्त्स्न्येन कृत्वा परस्यापि तथैव क्रियन्त इत्येवम् । किं तर्हि? सर्वेषामुपाकरणं यत्र कुतश्चित् पशोरारभ्य कृत्वा तत सर्वेषां नियोजनमित्युक्तम् । तत्र प्रथमे पदार्थे उपाकरणे अनियम एव यत कुतश्चित् पशोरारम्भः कर्त्तव्यः । द्वितीयश्च पदार्थो नियोजनरूपः किं प्रथमो यत आरब्धः तत एवारम्भणीयः? उत तत्राप्यनियम एवेति? तत्र क्रमनियमकारणानां श्रुत्यर्थपाठादीनामभावादनियमे प्राप्ते उच्यते प्रवृत्त्यैव नियमः । प्रथमः पदार्थो येन क्रमेण कृतः स एव क्रम उत्तरेष्वपि नियोजनादिषु नियम्यते । कुतः? पदार्थैः सह प्रधानं कर्त्तव्यमिति वचनात् सर्वे पदार्थाः प्रधानकालास विप्रकृष्टव्याः कथं? पदार्थैः सह प्रधानस्य वचनम् यावता "दर्शपूर्णमासाभ्यां यजेत प्राजापत्यं चरन्तः" इत्यादिषु प्रधानमात्रं श्रूयते उच्यते, समीहितं भावयेद्यागेनेत्यर्थ इति हि यजेतेत्यस्यार्थः । तत्र यस्यामेव वेलायां स्वर्गो भावने कर्त्तृत्वं प्रतिपद्यते तस्मिन् क्षणे करणेतिकर्त्तव्यते अपि व्याप्रियेते । अयमर्थः नात्र प्रधानं कार्यत्वं श्रूयते किं तु प्रधानेन स्वर्गः कार्य इति करणविभक्तिनिर्देशाद्यागेनेष्टं कार्यमस्मिन्काले कुर्यादिति तेन स्वकार्यं इतिकर्त्तव्यताकेन कर्त्तुं शक्यते नान्यथा । तस्मात्त्रितयस्य फलकरणेतिकर्त्तव्यस्य युगपद्व्यक्तेस्तत्प्रधानेन कर्तव्यतयोच्यते । ततोऽन्यथा करणेतिकर्तव्यताकत्वमेव न स्यात् न हि पदार्थाङ्गापि करणं भवति । तथा भविष्यति भाव्ये भूते च करणे अयमेव दोषः न हि विनष्टं करणं भवतीति । तथा करणेतिकर्तव्यतयोरपि मिथो विप्रकर्षे अयमेव दोषः । न हि विनष्टमनागतं वानुग्राहकं भवति । तेन यद्यवस्तु ध्यामेककालतैषां त्रयाणाम् । तत प्रधाने सेतिकर्तव्यताके एकस्मिन् क्षणे सह कर्त्तव्ये प्राप्ते सति एकः कर्त्ता बहूनि प्रधानानि इतिकर्तव्यतो वा असमर्थः कर्त्तुं, यौगपद्येनेत्यवश्यम्भावी क्रियाणामपि विप्रकर्षः । इतरेणापि विप्रकर्षेण सहैव पदार्थाः कृता भवन्ति । प्रयोगवचनो हि यावतः पदार्थाननुष्ठापयति तावद्भिरव्यवहिततया यावान् कालो व्याप्यते तावानेक कालः तावति च काले सर्वेषां कालो विधीयते न त्वेकस्मिन् क्षणे अनवधारणविधिप्रसङ्गात् । तेन तत्कालत्वेनैषां साहित्यम् नैकक्षणवर्तित्वम् । यद्येवम् प्रयोगवचनेनैव क्रमस्य सिद्धत्वात् श्रुत्यादिभिः किं क्रियते? अनियतक्रमेणानुष्ठाने प्राप्तेऽतीति क्रमनियमे तेषां व्यापारः । यस्मात् प्रयोगविधिर्नैकक्षणवर्त्तित्वं विधत्ते प्रत्यासत्तिमात्रम् । तस्मात् प्रधानं चिकीर्षितमनागतं कृतं वा तेषां प्रधानार्थानामनुष्ठापकम् । करिष्यमाणेन कृतेन वा प्रधानेन प्रत्यासत्तिमात्रमङ्गानां तत्साहित्यम् नैकक्षणवर्तित्वम् । तत्राग्न्यन्वाधानादीनां करिष्यमाणं प्रधानं निमित्तम् स्विष्टकृदादीनां तु कृतम् । तेनैवमप्यनुभाविनि विप्रकर्षे केचित्पदार्थाः अव्यवहिताः प्रधानेनापेक्ष्यन्ते केचिद्द्वाभ्यां क्षणाभ्यां व्यवहिताः केचिद्बहुभिरिति । एवं वाजपेयपशुष्वपि अन्वन्वाधानादि प्रागुपाकरणात् साधारणत्वात् सर्वपशूनां सह अनुभूतम् । उपाकरणादयोऽपि संनिपत्योपकारकास्तन्त्रे प्राप्तिपरावर्तयितव्या अपि साहित्येनैव पशुभिरनुभवितव्याः । यदैकस्योपाकरणम् तदैवेतरेषामपि कुत? सहचोदितत्वात्पशूनां प्राप्तानाम् । तत्रैव सहानुभवितव्ये सति यत्र पशौ प्रथममुपाकरणं क्रियते तस्य प्राथम्येन पठेन यद्यपि द्वितीयः पदार्थो नियोजनरूप स्तात्पर्ये तथापि सहवचनादेव एकविप्रकर्षवधिरव्यवहितं द्वितीयं पदार्थमाकाङ्क्षति । द्वितीयस्तु पशुर्विप्रकृष्टोपाकरणक्षणैर्व्यवहितमेकेन प्रथमस्य पशोर्नियोजनक्षणेन च व्यवहितं स्वीयं द्वितीयं पदार्थमाकाङ्क्षति । एवं तृतीयादयोऽपि पशवः सजातीयविजातीयव्यवहितानात्मीयान् पदार्थानपेक्षन्ते । अन्त्यस्तु विजातीयैः पूर्वोपाकृतानामेकविंशते पशूनां नियोजनक्षणैर्व्यवहितमेव द्वितीयं पदार्थमपेक्षते । तदेव संनिपत्योपकारकाणामोच्च ईदृशी एकविंशतिक्षणव्यवधानापेक्षा प्रधानं प्रत्यनि भवति । ततश्च यावद्भिर्नाव्यवहितं सर्वैः पदार्थं कर्त्तुं तावद्भिर्व्यवधानमगत्यावश्यं कर्त्तव्यम् अतोऽभ्यधिकैस्तु न व्यवधातव्यम् । यद्येक पदार्थमेकस्य कृत्वा द्वितीयोऽपि पदार्थस्तस्यैव क्रियते ततः सहवचनं नोपपद्येत । एवं सर्वेषु तृतीयादिष्वपि पदार्थेषु योज्यम् । प्रथमपदार्थक्रम एव द्वितीयादिष्वपि समाश्रयितव्य इत्ययं क्रमः अय प-

[illegible]

रिदं हौत्रमिति प्रकृतिप्रत्ययरूपावयवशक्तिजन्यार्थयोगशब्दरूपसमाख्यया हौत्रादिकर्त्तव्यत्व प्रतीयते। एवं, हौत्र जुहोति औद्गात्रं जुहोतीत्यादौ हौत्रादेर्होमकर्तृत्व प्रतीयते। होता ऋग्वेदी अध्वर्युर्यजुर्वेदी उद्गाता सामवेदी "अध्वर्यूद्गातृहोतारो यजुःसामर्ग्विद क्रमादिति" कोषात्। न च समुदाये शक्ति प्रमाणाभावात् असएवोक्त भट्टपादै "पाकन्तु पचिरेवाह कर्त्तारं प्रत्ययोऽप्यकः। पाकविशिष्ट पुनः कर्त्ता वाच्योनान्यस्य कस्यचित्"। पाकविशिष्ट पाकयिविशिष्ट

शवरभाष्ये उदा० यथा "अथ प्रकरणस्य क्रमस्य च विरोधे किमुदाहरणम्।। राजसूयप्रकरणेऽभिषेचनीयक्रमे शौनःशेपाख्यानादि आम्नात, यदि प्रकरण बलवत् सर्वेषां, तदङ्गम्, यदि क्रम, अभिषेचनीयस्यैव। किं तावत् प्राप्तम्?—तुल्यबले एते कारणे—इति। कुत ?। न तावत् विशेषमुपलभामहे,नायमस्मात् इद बलीय -इति। तस्मात् तुल्यबले एते कारणे—इति। अपि च प्रकरण वाक्येन बाधित, तस्मात् बाध्येत क्रमेणापि—इति"। "एव प्राप्ते ब्रूम,—प्रकरण क्रमात् बलीय । कुत!। अर्थविप्रकर्षात्। कोऽत्रार्थविप्रकर्ष ।। प्रकरणवत साकाङ्क्षत्वात तत्सन्निधानाम्नातेन परिपूर्णेनाप्यवक्तव्येन एकवाक्यत्वम्, न तु क्रमवत , क्रमेण आम्नातेन, अनेकत्राम्नायमानस्य सन्निधिविशेषाम्नानमात्र हि क्रमः तत्र सन्निधिविशेषाम्नानसामर्थ्यात् क्रमवतः सन्निधाधाम्नातस्यानुपलभ्यमानमेव आकाङ्क्षावत्त्वमस्ति —इत्यवगन्तव्यम्। प्रकरणे तु प्रकरणवत प्रत्यक्षम्, न च प्रकरणवता क्रमवता च यौगपद्येन एकवाक्यता सम्भवत्याम्नातस्य—इति विरोध। तत्र प्रकरणे प्रत्यक्ष साकाङ्क्षत्व, क्रमस्यानुमानिको बाधितुमर्हति। साकाङ्क्षत्वात् एकवाक्यत्वम्, एकवाक्यत्वादभिधानसामर्थ्यं, सामर्थ्यात् श्रुत्यर्थ—इति सन्निकृष्ट प्रकरणस्य श्रुत्यर्थो, विप्रकृष्ट क्रमस्य। तस्मात् क्रमप्रकरणयो प्रकरण बलवत्तरम्—इति"।

"अथ यदुक्त,—वाक्येनापि हि तत् बाधितम्, अतोऽन्येनापि तत् बाधितव्यम्—इति, नैतत्, बाधितस्यानुपपत्तौ न्याय्यो, न बाधित बाधितव्यम्—इति"।

अथ क्रमसमाख्ययोर्विरोधे किमुदाहरण। किं बलवत्तरम्।—इति। पौरोडाशिकम्—इति समाख्याते काण्डे सान्नाय्यक्रमे "शुन्धध्वं दैव्याय कर्मणे"—इति शुन्धनार्थो मन्त्र समाम्नात। तत्र सन्दिह्यते,-किं समाख्यानस्य बलीयस्त्वात् पुरोडाशपात्राणां शुन्धने विनियोक्तव्य ,(मन्त्र) उत क्रमस्य बलीयस्त्वात् सान्नाय्यपात्राणाम् ?—इति। किं तावत् प्राप्तम् ?—तुल्यबले एते कारणे स्याताम्। कुत ? अविशेषात्, यदि वा समाख्यैव बलीयसी, बाधितो हि क्रम प्रकरणेनापि इति"। "एव प्राप्ते ब्रूमः,—क्रमो बलीयान्। कुत ?। अर्थविप्रकर्षात्। क पुनरत्रार्थविप्रकर्ष ?। निर्ज्ञाते प्रकरणेन केनापि सहैकवाक्यत्वे यत् सन्निधावाम्नायते, तत्र आकाङ्क्षा परिकल्प्यते, नैकवाक्यतेत्यवगम्यते, लौकिकस्य शब्द समाख्या, न च, लोक एवंविधेषु अर्थेषु प्रमाणम्। तस्मात् क्रमो बलीयान्"

विवृतमेतत् तत्त्वबोधिन्यां यथा

"स्थानप्रकरणयोर्यथा। पञ्चविंशसोमयागावयवा परस्परनिरपेक्षा अपि प्रत्येक फलवन्तः सप्रधानाः। ते च मिलिता राजसूयः। तन्मध्येऽभिषेचनीयाख्य कश्चित् सोमयागविशेष तत्सन्निधौ अक्षदेवनादिकं श्रूयते। यथा "अक्षैर्दीव्यति राजन्य जिनाति शौनःशेपमाख्यापयतीति" जिनाति जयति। शौनःशेप बह्वृचब्राह्मणे आम्नात शुनःशेपमुनिविषयमुपाख्यानमिति माधवाचार्य। एतेन शुन शेपमुनेश्चरित्र पुराणप्रसिद्धमित्युदीच्यव्याख्यान निरस्त, वैदिके कर्म्मणि वैदिकोपाख्यानस्यैवोचितत्वाच्च "शौनःशेप शृणोतीति" पाठकल्पनमपि कल्पनमेव माधवाचार्य्यादिभिर्वेदवैराख्यापयतीत्यस्य लिखितत्वात्। तत्र च सान्निध्यरूपस्थानबलात् अक्षदेवनादेरभिषेचनीयाङ्गत्व लभ्यते प्रकरणात्तु सर्व्वयागात्मकराजसूयस्य इति कर्त्तव्यताकाङ्क्षया अक्षदेवनादयो विहिता इति। प्रकरणबलात् राजसूयाङ्गत्वमक्षदेवनादेः राजसूयस्य यज्ञयागात्मक इति तत्र सर्व्वेषामङ्गत्व, सर्व्वाङ्गत्वञ्च राजसूयघटकीभूतसर्व्वयागजन्यफलाभिरक्षा पूर्व्वोपकारद्वारा सर्व्वोपकारकत्वम्। अत्र आकाङ्क्षायाः प्रत्यासत्तिवाक्यलिङ्गश्रुतिरूपविलम्बकल्पन व्यवधानम् अभिषेचनीयस्याक्षदेवनादेराकाङ्क्षा नास्ति तस्य ज्योतिष्टोमविकृतित्वेन प्रकृतिवद्विकृतिन्यायात् अतिदिष्टै प्रकृतीभूत ज्योतिष्टोमाङ्गैरेवेतिकर्त्तव्यताकाङ्क्षानिवृत्तेरिति सन्निधिपाठबलात् आकाङ्क्षामुत्थाप्य तद्द्वारा वाक्यलिङ्गश्रुतीनां कल्पनीयतया चतुर्भिर्व्यवहितमङ्गत्वमित्यतः प्रकरणाद्विलम्बेन बोधक स्थान दुर्बलमिति। तथाच

[illegible]

[illegible]

ङ्गीकृतक्रमेण स्नातव्यम्" "तदुपग्रहणार्थं मया क्रमः सङ्गीकृत" "सिंहोऽपि क्रमं कृत्वा नि॰ तृत" इति च प्रसृत॰ भरतस्तैव । परिपाट्याम् "प्रथक्रमे वक्रमनुलिङ्गक्रम" रघुः "नैवक्रमेणोपररोध सूर्य्यम्" रघु । "सक्रमेणांशुपरिपाट्या" स॰ छु॰। आनुपूर्व्ये "क्रमाद्गतप्रचयरोस्य्योपमा" "रघु क्रमादुग्रौवनभिन्नशैशव" रघु । आनुपूर्व्यी च वस्तुभेदात् भिन्ना तत्र पदस्यानुपूर्वी अव्यवहितोत्तरोच्चार्य्यमाणत्वम् इतरस्य तु अव्यवहितोत्तरकालवर्त्तित्वम् यथा प्रथमं शैशवं ततो यौवनं ततो जरेति वयोविशेषाणाम्, विद्यानान्तु वेदपूर्व्वकत्वमितरविद्यानां तथात्वात् । एवं पदार्थगतानुपूर्व्यं विशेष यथायथमूह्यं । सच अयुगपत्त्वाय । "अर्थक्रियाकारित्वं च क्रमाक्रमाभ्यां व्याप्तं न च क्रमाक्रमाभ्यामन्यः प्रकारः समस्ति" सर्व्व॰ स॰ बौ॰ द॰ । "क्रमशास्त्र क्रमाभिधानव्याप्तम्" दायभाग । अनुष्ठाने । "इत्थमस्य विततक्रमे क्रतौ" माघः "विततक्रमे विततानुष्ठाने" मल्लि॰ । १०विन्यासे "उत्क्रान्तवर्ण्णक्रमधूसराणाम्" रघु । "उत्क्रान्तवर्णक्रमाः शीर्णवर्णविन्यासाः" मल्लि॰ । ११पद्मे च न॰ "क्रमः शक्तौ परीपाट्यां क्रमं चरणपद्मयोरिति विश्वोक्तेः पादे क्लीबतापि ।

क्रमक त्रि॰ क्रमं वेदपाठभेदमधीते वेद वा क्रमा॰ वुन् । १वेदपाठविशेषरूपक्रमाध्यायिनि २तद्वेत्तरि च ।

क्रमजित् पु॰ नृपभेदे "अनूपराजोऽश्वर्षः क्रमजिच्च सुदर्शनः" भा॰ स॰ ४अ॰ ।

क्रमज्या स्त्री ज्योतिषोक्ते स्पष्टाधिकारे सि॰ शि॰ उक्ते चतुर्विंशत्यर्द्धजीवाभेदे तन्मानं तत्रोक्तं यथा

"तत्त्वाश्विनो नन्दसमुद्रवेदाश्चन्द्राद्रिषट्का गगनाङ्कनागाः पञ्चाभ्ररुद्रास्तिथिविश्वतुल्या आद्या निरुक्ता भवबाणचन्द्राः । मन्दाग्नमौर्व्वीरभुजो दिगङ्कचन्द्रा हुताशाभ्रकृपूर्णदस्राः । शरङ्गषट्काक्षतयः कुरामसिद्धा शराष्टपुयमाः क्रमेण । गजाश्विभान्यङ्कशराष्टदस्रास्तुरङ्गखभ्रपनरलोचनानि । अम्भोधिकुभ्रभ्रगुणास्तुरङ्गशैलेन्दुरामा रसभूतदस्ना । कुदन्तलोका द्विरङ्गदेवा गोऽब्धाब्धिलोकाः कृगुणाब्धिरामाः । भुजङ्गलोकाब्धिगुणाः क्रमज्याः" सू॰ "इह हि स्पष्टीकरणप्रभृति सर्व्वकर्मार्धज्याभिः प्रतिपाद्यते । यतो वृत्तमध्ये कोऽप्यवयवभूतः प्रदेशो मध्यमं कर्णेनोच्यते । तस्मान्मध्यसूत्रात् तिर्यक्स्थोपरि ज्यावयेऽर्द्धज्याप्ते भवति । अतोऽर्धज्याभिः सर्व्वं कर्म । तत्र भगणकलाह्नितवृत्तचतुर्थांशे द्वे शतान्येव चतुर्विंशतिज्यार्धानि भवन्ति" प्रमिता॰ । २४क्रमज्याशाश्व यथा

२२५ । ४४९ । ६७१ । ८९० । ११०५ ।१३१५ ।१५२० । १७१९ । १९१० । २०९३ । २२६७ । २४३१ । २५८५ । २७२८ । २८५९ । २९७७ । ३०८४ । ३१७७ । ३२५६ । ३३२१ । ३३७२ । ३४०९ । ३४३१ । ३४३८ ।

तासां तथामानं समर्थितं सू॰ सि॰ रङ्गनाथाभ्यां यथा "राशिलिप्ताष्टमो भागः प्रथमं ज्यार्धमुच्यते । तत्तद्विभक्तलब्धोनमिश्रितं तद्द्वितीयकम् । आद्येनैव क्रमात् पिण्डान् भक्ता लब्धोनसंयुता । खण्डकाः स्युश्चतुर्विंशज्ज्यार्धपिण्डाः क्रमादमी" सू॰ सि॰ ।

"एकराशिकलानामष्टादशशतानामष्टमो ऽयमंशस्त्याश्विमित॰ २२५ प्रथममाद्यं ज्यार्धं सम्पूर्णजीवार्धपिण्डकं कथ्यते तद्भिन्नं । तत्र प्रथमज्यार्धात् तेन प्रथमज्यार्धेन भक्ताल्लब्धेन हीनमन्यस्याभावात् प्रथमज्यार्धमनेन युक्तं तत् प्रथमज्यार्धं द्वितीयकं ज्यार्धं भवति द्विगुणप्रथममेकोनम् । तृतीयादीनामानयनार्थमुक्तप्रकारमतिदिशति आद्येनेति । प्रथमज्यार्धपिण्डेन । एवमुक्तरीत्या क्रमात् सिद्धपिण्डान् भक्ता लब्धैरूनमाद्यं खण्डमनेन युताः खण्डका अशिवाव्यवहितसिद्धज्यार्धपिण्डा अविद्धपिण्डा भवन्ति । यथा प्रथमखण्डं २२५ प्रथमभक्तं फलं १ तेन हीनं खण्डं २२४ तेन युक्तं द्वितीयखण्डं ४४९ । तत्र प्रथमभक्तं फलम् २ अर्धाधिकावयवस्यैकाधिकत्वेन ग्रहणस्य साम्प्रदायिकत्वात् । फलैक्येन ३हीन प्रथमम् २२२ अनेन द्वितीयखण्डो ४४९ युतस्तृतीयम् ६७१ । एवमिदं प्रथमखण्डभक्तं फलम् ३अनेन पूर्वफलैक्येन ३युतं जातं सर्व्वफलैक्यम् ६ अनेन प्रथमं खण्डं हीनम् २१९ अनेन तृतीयं ६७१युतं चतुर्थम् ८९० । एवमिदं प्रथमखण्डभक्तं फलं ४ पूर्व्वलब्धैक्येन ५हीनं प्रथमखण्डरूपं २१९ ज्यान्तररूपखण्डकमतेन ४ हीनं २१५ चतुर्थे ८९० युतं पञ्चमं ११०५ एवमन्येऽपि । यथोक्तरीत्याऽसङ्ख्यखण्डानां सम्भवात् खण्डनियममाह स्युरिति । एवं चतुर्विंशतिसङ्ख्याका ज्यार्धपिण्डाः कार्या न तदधिकाः । "एकत्रिंशाद्विंशाद्वा पञ्चात् पञ्चदशादपि । सप्तमाद्वादशात् सप्तदशाच्चार्धोत्तरं मतम्" इति ब्रह्मसिद्धान्तोक्तस्थलेऽर्धाधिकावयवस्यैकाधिकत्वेन न ग्रहणम् इतिध्येयम् । गणितस्याविक्षततयात् सिद्धाः पिण्डाः कथं नोक्ताः ? इत्यत आह क्रमादिति । अमी सिद्धाः पिण्डाः क्रमात्

[illegible]

क्रमिघ्न न० क्रमिं हन्ति हन–टक्। विडङ्गे रत्नमा०। २क्र- मिनाशकमात्रे त्रि० स्त्रियां ङीप्।

क्रमिज न० क्रमिभ्यो जायते जन–ड। १अगुरुचन्दने अमर० २लाक्षायां स्त्री रत्नमाला०

क्रमिशत्रु पु० क्रमेः शत्रुरिव। विडङ्गे रत्नमाला

क्रमु पु० क्रम उन्। गुवाके त्रिकाण्डशेष०

क्रमुक पु० क्रम–उन् स्वार्थे कन्। १पट्टिकालोध्रे २गुवाक- वृक्षे ३भद्रमुस्तके च अमर० ४भद्रमुस्तके ५कार्पासिका- फले न० मेदि० अथ राजनिघण्टौ क्रमुके उक्ता "वाराहराजकर्णं चादिरकदरकाश्चमन्दक्रमुकोत्पाद्य क्रमुके गामशाराद्रिविक्ष्वेष गुणपुर्णविनाशन। गेहपाण्डु- मयहरं कफमेदोविषोयप" राज० तद्गुणा उक्ता "पाखादिगाढकठका यशश्वात्" भाव० गौरा० ङीप्। ६गुवाके स्त्री शब्दरत्नमाला

क्रमेतर त्रि० इत०। क्रमात् वेदपाठप्रकारभेदात् भिन्ने। तत क्रमा० तदेव्यधीते वा ठक्। क्रामेतरक तदध्येतरि तदध्येतरि च त्रि०

क्रमेलक पु स्त्री० क्रामति क्रम–विच् एलति एल अच् कर्म०। उष्ट्रे स्वार्थे क। तत्रार्थे। उभयत्र जातित्वात् ङीप्।

क्रय पु० क्री–भावे अच्। पणपूरणादिमूल्यदानेन विक्रेतुः स्वत्वापनयनेन स्वत्वापादनव्यापारे (केना)। प्रतिरूपद्रव्य दानेन तथाविधे तु न क्रयव्यवहार इत्यत द्रव्यपद- मभूता पणपूरणेत्युक्तम्। क्रयस्य स्वत्वहेतुत्वञ्च पूर्व- स्वामिस्वत्वनाशादेव भवति सति तन्नाशत्वे सजातीयस्वत्वं प्रति सजातीयस्वत्वस्य प्रतिबन्धकत्वेन क्रीते स्वतोत्पत्त्य- भावात् अतोमूल्यदानेन तन्नाशस्यापाकरणम्। तस्य च स्व- त्वहेतुत्वम् "सप्त वित्तागमा धर्म्या दायोलाभः क्रयो- जय। विभागः संप्रयोगश्च सत्प्रतिग्रह एव च" स्मृते "स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमेषु" गोतम- स्मरणाच्च। क्रयादिरूपागमसहितभोगस्यैव स्वत्वे प्रामाण्यं वीरमि० व्यवस्थापितं यथा "सप्त स्वावरागमोपायान् प्रदर्श्य तत्र भुक्तेः प्रामाण्य- माह बृहस्पतिः। विद्यया क्रयबन्धेन शौर्य्यभार्या- न्वयागतम्। सपिण्डस्याप्रजस्यांश स्थावरं सप्तधा मतम्। विद्यमत्रक्रयाधाने रिक्थशौर्य्य प्रवेदनात्। प्राप्ते सप्त- विधे भोग आगम सिद्धिमाप्नुयात्"। विद्यया प्रतपवादिकमयोजिकया आसोपाय क्रयःप- सिद्ध बन्धो बन्धक सोपाधिकस्वत्वहेतुम दायश्च

पाल्यनिकस्वत्वहेतुत्वादन्यत्रास्य विवेचनीयम्। क्रय बन्धेनेति समाहारद्वन्द्व एकत्वम्। शौर्य्यागतं युद्धार्जि- तम्। भार्य्यागतं विवाहकाले प्राप्तम्। अन्वयागतं पि- त्रादिक्रमोपात्तम्। अप्रजस्य सपिण्डस्यांश रिक्थहरा- न्तराभावे पिण्डदानाद्यधिकारितया प्राप्तम्। मित्र- त्वादिना प्रागुक्तानेव सप्त स्वावरागमोपायाननूद्य तत्र भो- गस्य प्रामाण्यं विधीयते। तत्र प्रवेदन विवाह। स एव "क्रमागतं प्रापणिकं क्रयाधानागमान्वितम्। एव विपस्तु यो भोग स तु सिद्धिमवाप्नुयात्। अविभागक्रयप्राप्तं पितृलब्धन्तु राजत। स्थावरं सिद्धिमाप्नोति भुक्त्या चाविप्रवेषया। प्राप्तमात्रं येन भुक्तं लोकश्याविरिच- न्दिनम्। तस्य तत्सिद्धिमाप्नोति चाविप्रवेषया तथा। आध्यागमात् समारभ्य भुक्तिर्यस्याविघातिनी। विंश- त्यब्दस्वविच्छिन्ना तस्य तां न विचालयेत्"। मूल्य दास्यामीति नियम कृत्वापि प्रगृह्यापि क्रयसि- द्धि: यथाह विवादचि० कात्या० "पण्य गृहीत्वा योमूल्य- मदत्त्वैव दिशं व्रजेत्। ऋतुत्रयस्योपरिष्टात्तद्धनं वृद्धि- माप्नुयात्" अत्र विषये केलस्यापवादमाह बृहस्पतिः "गृहक्षेत्रादिकं क्रीत्वा तुल्यमूल्याक्षरान्वितम्। पत्रं का- रयते यत्तु क्रयलेख्यं तदुच्यते"। तस्मात्तु क्रयकालस्य अनुक्रय शब्दैर्दर्शितः"। वैदिककर्माङ्गपरिक्रयादौ प्रायेण यज- मानस्यैवाधिकार यथाह क्रयाधिकरणे जै०सू०भा०

"स्वामिकर्म परिक्रय कर्मणस्तदर्थत्वात्" ३।८।१ सू०।

"अस्ति परिक्रय ज्योतिष्टोमे "द्वादशशतं दक्षिणा पूर्व- भावयो अध्याहार्यम्"। तत्र सन्देहः किम् अध्वर्युणा परिक्रेतव्या ऋत्विजः, उत स्वामिना ? इति। किं प्राप्तम्? समाख्यानात् अध्वर्युणा,-इति प्राप्ते ब्रूम,-'स्वा- मिकर्म परिक्रयः' कस्मात् ? कर्मणः तदर्थत्वात्, फलकामो हि यजमान यस्य फलकामः, तेन स्वय कर्त्तव्यम्, स यदि परिक्रीणीते, तत स्वय सर्वं करोमि इति गम्यते, अथ न परिक्रीणीते, न सर्वं कुर्यात्। तस्मात् स्वामी परिक्रीणीते इति" शवरभाष्यम्

"वचनादितरेषां स्यात्" २सू०

"किम् एव उत्सर्गः ? न इत्युच्यते,-'वचनात् इतरेषां स्यात्'। यत्र वचन भवति, तत्र वचनप्रा- माण्यात् भवति परिक्रय,-'य एतामिष्टकाम् उपदध्यात् स त्रीन् वरान् दद्यात्'-इति" भा०।

सोमादिक्रयस्य द्रव्यसाध्यतया क्रीणां पिता विक्रीतस्यात

प्रादिना च श्रीमन्मद्गुरुपादिकामावे मयाधिकारिण वाचीनामवहुलो वक्तव्यार्थविचार इत्येवद् वे ३। ३।। एतादृशी चार्ये च मनयार्थिनं यथा

"गुरुपरम्परातु हर्ता खाय गुरुवंशज मतविशेषा- त्माम् मान्यत्वं कोषो गुरु। यथाप्योमितात् ।१०७(पू॰)

इंद्रो ह दास्त् अधिकार। गुरुपरम्पराम् गुरु- वनो हि गुर्वादीन हिंस। गुरुवंशज च तत्त् यथा 'श्रीहिरिकमेव कौरैमेव—इत्येवमादि। अथवा अनुमत्यं मूला 'मतविशेषाणां मतविशेषवंशजा हि भिन्न। भिन्ना विशुद्धिमो,प्रथमो च—शुद्धिम विशुद्धिमाव हि मनायावर्णोविक्व। शीलताव चतु मनानाम्। विप्रो हि भूयो, 'मयाविशेषं इति दुषो दृष्टाव "वार्णे मोचितुम्—इति च। न च यत्तद् इत्यर्थं—यदि बाधनवेतव्यार्थं प्रसिद्धार्थेति। एवं गुरुः। यथाव श्रीमित कोवाणु"वा "मयाव मम वैदर्थनम्" ।।१८०

"वा तथा चीना वशी अथाच पर्ति—इति शुक्ला पर्वति" वा

"मात्मन्दिर् यथान्मनम् ।।१४ (वा कि॰) "वा च वदन्ता महोपमावेन वा कर्मेण वा यमम् यथा- र्थितं मेन यवनो—इति। अन्यत्रैत—वरदसा च वा यता हि वा यमक यमूना यता मन् मतीर्थ नहिं मन्दः। अपि च वाभिमतत्वा कर्म कर्तव्य न च परिणाम वावनातीति वचमु। अत् तथा चान च यता देव दवाचनी मनु तव देव वा प्रसिद्धपर्वति—इति। एवं च वदति नाकी दावक न मन निष्ठ वा। एवं वद है। इसे वर्णनिकमणि यत है यथा महवम्" इति वा

यदेवतापरेवम् ।।१६० (पि) गुरुमनाम आत्मनीयति। न च वरदति—निर्देया कोन—इति ह यतो विधा यथोक्तावारिवेनम् नृशिलाचनम् वचया यथा वतिमन यथार्थेमाति वृत्तिविशेषाव यथार्थिका वरणम्, यदि च विवहरणानामा वरणा निर्देया च काम यथेन—इत्यं भी यदि न यथेन सम वचना वृत्तिर्वर्ति। न च तन्—वाचम्। अथाव यथाविधी यमी च विवनापीयन गुरु परितुष्टी यत् यथेन च—इति" वा॰

"वर्षेन च वर्णेनावात्" ।।१८२

वर्षेन च यदा यथेष्टं यावि एवं दावनाति।

वेदाद् विधी—"वर्षे" च वर्णे च वाचि च न यदि परित्यक्तः—इति। अत एवाह, 'वावादेये निर्देया- इति वर्णवाचनार्थं निष्ठ यमम् यथावतेव वृत्ति- रेकिम्। यथान् यथावमन्त्राम् यदेव मवादेव वचने- वंमनदावादविवृत्तम् वा

'ममत्व वर्णविमलम्'' ।१८४ ।(वा॰कि)

वन पुरः भूयो—वर्णवाक ह मन वाचो पुरा—इति, यतो हि चतुर्णीवनवानवो भवति। निवन विर् तर्व मयवर्णविवर्यं, शीलनाम् यथोमनाव कर्ता इति। वर्णे च वर्णितम्य विधुव माहवम्यां। यथाव वनि- व्यो वितम्—इति वा

"व्यवनापि दर्शयति ।।१८

'वमो हि वाचिवमन्द्र देव—इत्येव तवगुण विधी। यथा "मदा वमो। यथावमपि यथीतो हि ममा वदतात यथा। वदव्यावानात् देवर्वाचनाले'' वा॰।

"वाक्तोमु यथावदेवक काम् ।१८४

वाचानुमानामि इवनी—इत्येवं वाच् विनाम्। अत च मन्त्र—[illegible] गुरु वमी यथेन गुरु यथावता वा- वत् न वर्णवाचात्।—इति। [illegible]—[illegible] गुरु। १ । वदवमना निर्विभिनमात यथादेवातेन वर्त। 'यथेन—इति भूयते यथाव् देववर्णं विवाहो—यथा न ही गुरवो वर्त्ता व यथेनावाम्,यथा वर्णानि दृश्यम्। एवं भाव मूल—"वावोतु यथावाचो। वर्णित्वा वद वदति—"वर्षे" वार्ये च वाचि च वाचिवर्ति- वमः—इति यथा वत वर्ण परिणाम वदावता वद वावितवात्—इत्यतो—अविनयेन वविनयनं गुरु वाचितवं। न—इति मूल—एव विधि वर्ण योग् वादेवीन यथा वर्णपरवापो—वीतितेव—इत्य वत यथावीवितेन यथावानीविनेन च यात्वेन योग वचने अत वचवदवाचे दृष्यम्।

"मनु हवो वचनावन्त यथावानोतिवचाव् विवा वचनानावा वक्तीर्षितं भविन्यति—इति। न—इति वाच—वादन्तु देविनु भावः। देविनो यथावी यदि नदेव वाम् वावपुरंवागच वर्ण, दृष्यमो देवि वारी अत यथावदवारो विनवे नदुव वर्णेनीत वेवारी न यदीयवचना। अत तद वाच,—शीलत- वावा दुर्वव वदव वाम वापदुपा देववादं दुर्वव विनयदोवितेतीम्—इति। अत च, यदीति हि यथव

स्वामिनी इत्युच्यते, न क्रीता पत्नी—इति सम्बन्धि शब्दोऽयं यजमान—इति च स्वामी,क्रीत । तस्मात् स्त्रीपुंसयोरेकम् एवञ्जातीयकं कर्म्म—इति ।

"मन्त्र श्रुतिसामर्थ्यात्—'य -कश्चित्, यया कयाचित् सह सम्भूय यजेत' इति प्राप्ते इदम् उच्यते,—'यन्नया कश्चित् धर्म्म कयाचित् सह कर्त्तव्य ,सोऽनया सह—इति, तेन न श्रुतिविरोध स्मृते—इति गम्यते । अथ यदुक्तं,—केवलस्य पुंसोऽधिकार केवलायाश्च स्त्रिया , 'यजेत—इत्येकवचनस्य विवक्षितत्वात्—इति, तत् परिहर्त्तव्यम् । इद तावदय प्रष्टव्य —'यजेत'—इत्येकवचने विवक्षिते, षोडशभिरृत्विग्भि सहयागो भवति इत्येवम् उच्यते, प्रतिकारक क्रियाभेद ,याजमानेव पदार्थान् परिक्रयादीन् कुर्वन् 'यजते' इत्युच्यते यजमान , आध्वर्य्यवानेव कुर्वन् अध्वर्युर्यजति—इत्येवम् उच्यते,यथा सम्भरणमेव कुर्वती स्थाली पक्तिं करोति—इत्युच्यते, यस्य च कारकस्य य आत्मीयो व्यापार , स एकवचने विवक्षिते एकेन कर्त्तव्यो भवति—इति । एवम् याषाम् व्यापारो यजमानस्य, स तासाम् न सम्भूय कर्त्तव्य, एकैकेो याजमानेऽपरेणापर । द्वादशे वा शते एकेन पद्मस्थापयत्, अपरेणापि पट्टपद्दायत्—इति । इह तु पत्नीव्यापारः अन्य एव, न तत्र पत्नी प्रवर्त्तमाना यजमानस्य एकत्व विहन्ति,यथा अध्वर्युराध्वर्यवेषु प्रवर्त्तमान । यावद्भ च सह पत्न्या यष्टव्य, सत्यम हि इद दम्पत्योर्यैन तत्र यागोऽवश्य सह पत्न्या कर्त्तव्य ,इतरथा अन्यतरानिष्पत्त्यां त्याग एव न सवर्त्तेत,तथा हि द्वितीयया पत्न्या विना त्यागो नैवावकल्पते, यस्य द्वितीया पत्न्यस्ति, तत्र कात्स्न्यीम् एका करिष्यति । कृष्णसंस्कारार्थेषु नैव दोष , सम्भवन्ति हि तानि कर्त्तुम्—इति" भा०

"लिङ्गदर्शनाच्च" १८सू० ।

"लिङ्गं चाप्येवं दृश्यते,'योक्त्रेण पत्नीं सन्नह्यति मेखलया यजमानं मिथुनत्वाय"—इति । यदि स्त्रीपुंसा वेकत्र, योक्त्रस्य मेखलायाश्च विभागो वाक्यात् गम्यते, मिथुनसम्भवश्च यद्येतत् स्त्रीपुंससाधनकं कर्म्मेत्युपपद्यते, न अन्यथा" भा०

'क्रीतत्वात्तु भक्त्या स्वामित्वमुच्यते' १९सू०

"स्थिताद्उत्तरमुच्यते । यदप्युक्तं पत्नीं व्यपदर्शयति । नैतदस्ति, यदुक्तं स्वामी स्त्री—इति, क्रीता हि सा, इष्टार्थं स्वाम् अधिरूपतदामन्नतो यदस्य स्वामित्वम् उच्यते, तत् भक्त्या यथा पूर्णकोऽस्माकं बलीवर्द्दानाम् ईष्टे—इति, एव पत्न्यपि पारिणाह्यस्य ईष्टे—इति" भा०

"फलार्थित्वात्तु स्वामित्वेनाभिसम्बन्ध " २०सू०

"नैतदस्ति, क्रयो मुख्य , गौण स्वामित्वम् इति, फलार्थिनी हि सा, स्वर्त्तनादरिष्यते, स्मृत्यनुरोधात् अन्या स्यात्, स्वगती श्रुत्यनुरोधात्" भा०

"फलवत्ता च दर्शयति" २१सू०

"स पत्नी पत्न्या सुकृतेन गच्छता यज्ञस्य धुर्यौ युक्तावभूताम्, सञ्जानानौ विजहताम् अरातीर्दिवि ज्योतिरजरमारभेताम्" इति दम्पत्यो फलं दर्शयति । तस्मात् अप्युभावधिकृतौ इति सिद्धम् ' शबरभाष्यम् ।

"शूद्रामौपे क्रयक्रीते कर्म कुर्यात् पतत्यध " स्मृति ।

क्रयमक्षपाणि मु० चि० पी० धा० ततितानि यथा ।

"क्रयर्क्षे विक्रयो नेष्टो विक्रयर्क्षे क्रयोऽपि न । पौष्णाम्बुपाश्विनीवातश्रवश्चित्रा क्रये शुभा " मु०चि० ।

"अथ क्रयविक्रयनक्षत्रेषु परस्परनिषेध तदनुक्रयविक्रयनक्षत्राण्यनुष्टुभाह क्रयर्क्षे इति । क्रयनक्षत्रे विक्रयो न कार्य, तथा विक्रयर्क्षे क्रयोऽपि न कार्य, मन्त्रिदमयुक्तं विक्रयोनाम मौल्य गृहीत्वा वस्तुदान क्रयोनाम मौल्य दत्त्वा समग्रहण यदा येन क्रय कर्त्तव्य तदान्येन विक्रयोऽपि कर्त्तव्यस्तत्र क्रयविक्रयनक्षत्राणा महाभेदादुभयविधमुहूर्त्तानुपपत्ति उच्यते विक्रेता यदा मुहूर्त्तोविक्रयार्थं गृह्णाति तदा क्रयिणोऽनुष्ठा कृत्वा वा—पदिष्ट वस्तु गृहीतव्यम्,यत् क्रियते, तत्काल विक्रयशब्दवाच्य यदा तु क्रयिणा क्रयमुहूर्त्ते प्राप्यते तदा विक्रेत्रे मूल्यद्रव्य दत्त्वा ग्राह्यं क्रमविक्रेयवस्तु गृह्णाते तत्र सफ यच्छब्दवाच्यमिति मत्वाह समाधि । अथवा क्रयिविक्रेतोरन्यतरस्य कदाचित्मुहूर्त्तसमवायादुयोजनावश्यकत्वे । आवश्यकत्वे तु मुहूर्त्तगवेषणाया कालविलम्बनिष्पत्तादन्येन उदीचीन मुहूर्त्तविचारमनङ्गीकृत्य च सम वस्तुप्राप्तया वस्तुपरन्यासिद्धिसम्भवात् तदा विक्रेतुरेव मुहूर्त्त विचार । एव च क्रेतुरप्यवश्यविक्रेतव्यस्य वस्तुनो यदा गृहीता सम्पदेतदैव मुहूर्त्तमनालोच्य वस्तुदानमावश्यकम् मुहूर्त्तविचारस्त कालविलम्बे नावश्यम्भावात्तु उपपत्ते । तदा तु क्रयण एव मुहूर्त्तविचार । मन्येऽमपि क्रयविक्रयनक्षत्राणा पार्थक्येनाभिधानात्तयो परस्परगमननिषेधो न युज्यते यथा राजदर्शन विहितनक्षत्रेभ्योऽन्यनक्षत्रेषु राजदर्शन निषिद्धमि

[illegible]

क्रयविक्रयिक पु० क्रयविक्रयाभ्यां जीवति ठञ् । वणिग्जने "क्रयविक्रयादिभ्यः ठन्" पा० क्रयविक्रयपक्षस्य व्यवहारवत्ता विषयम् तेन व्यवहारादपि ठन् । क्रयिक विक्रयिक तेन जीवति त्रि० ।

क्रयशीर्ष न० कपिशीर्ष+पृषो० । कपिशीर्षे शिका० ।

क्रयाक्रयिका क्रयणाद्विक्रयः पाकृय शाक० स्वार्थे वा व्यव हरणम् । क्रये अक्रये च ।

क्रयारोह पु० क्रयस्य क्रयार्थमारोहत्यत्र आ+रुह आधारे घञ् चतुर्थ्यर्थे ६त० । हट्टे (हाट) हारा० ।

क्रयिक त्रि० क्रयेण जीवति क्रयात् व्यवहारादपि ठन् । वणिग्जने "पर्य्यागतान् क्रयिकलोकमनाप्तपण्येतित्यादि" माघ क्रय+प्रयोजनमस्यस्य ठन् । २क्रेतरि "धनेन क्रयिको हन्ति स्वादकचोपभोगत । घातको वधबन्धाभ्यामित्येष त्रिविधो वध" भा० अनु० ११५अ०

क्रय्य त्रि० क्रयाय क्रेतार क्रीणीयुरितिबुद्ध्या प्रसारितम् क्री–यत् "क्रय्यस्तदर्थे" पा० नि० । क्रयनिमित्त हट्टे प्रसारिते द्रव्ये "क्रय्यको सोमो राजा इति क्रय्य इत्याह सोमविक्रयी" शत० ब्रा० ३,३,३,१,

क्रयण त्रि० क्रुड–भङ्गे ल्यु । १स्वनितकर्त्तरि "यथा न क्राहि क्रयणस्य रेजते" ऋ० ५.४४.६, "क्रयण ए स्तुतिकर्त्तु" भा० भावे ल्युट् । २भङ्गकरणे न०

क्रविष्णु त्रि० क्रु–बा०इष्णु च् । क्रव्यादे राक्षसादौ "क्रव्याम् क्रविष्णुर्विविनोद एकपम्" ऋ० १,८७,४,

क्रविस् न०क्रम-इसुन्तुगागम । मांसे क्रव्ये । "यदश्वस्य क्रविषो मक्षोऽस्ति" ऋ०१,१६२,६,१२, "क्रविषः मांसस्य" भा०

क्रव्य न० क्रम-यत् नस्य रः । आमसासे अमर । "स्पष्टगत-मपि क्रव्यमव्ययमत्ति" मालती० । "क्रव्यादा प्राणिनां क्रव्य दुदुहु स्वकलेवरात्" भाग० ४,१८,२१, । मांस-भेदात्तद्गुणाश्च सुश्रुते उक्ता यथा

"अत ऊर्द्ध मांसवर्गानुपदेक्ष्याम तद्यथा—जलेशया आनूपा ग्राम्याः क्रव्यभुज एकशफा जाङ्गलाश्चेति षण् मांसवर्गास्तेषां यथोत्तरमुत्तरोत्तर प्रधानतमा । ते पुन-र्द्विविधा जाङ्गला आनूपाश्चेति । तत्र जाङ्गलवर्गोऽ-ष्टविध तद्यथा—जाङ्गला विष्किराः प्रतुदा गुहा-शयाः प्रसहाः पर्णमृगा बिलेशया ग्राम्याश्चेति । तेषां जाङ्गलविष्किरौ प्रधानतमौ तत्रैण हरिणर्क्ष्य कुरङ्ग करा-लकृतमालशरभश्वदंष्ट्रापृषतचारुष्करकृतगमातृकाप्रभृतयो जाङ्गला मृगा कषाया मधुरा लघवो वातपित्तहरा-तीक्ष्णा हृद्या बस्तिशोधनाश्च । कषायो मधुरो हृद्यः पित्तासृक्कफरोगहा । संग्राही रोचनो बल्यस्तेषा-मेणो ज्वरापह । मधुरो मधुरः पाके दोषघ्नोऽनल-दीपन । शीतलो बद्धविण्मूत्र सुगन्धिर्हरिणो लघु । एण कृष्णस्तयोर्ज्ञेयो हरिणस्ताम्र उच्यते । न कृष्णो न च ताम्रश्च कुरङ्ग सोऽभिधीयते । शीतासृक्पित्तश-मनी विज्ञेया मृगमातृका । सन्निपातक्षयश्वासका-सहिक्काऽरुचिनाशनत् । लावतित्तिरिकपिञ्जलवर्त्तीरवर्त्ति-कावर्त्तकनप्त्रीकावातीकचकोरकमयिन्दुमयूरक्रकरोपचक्र-कुक्कुटसारङ्गशतपत्रकुलिज्जिरिकुररयाष्टीकयवनयाप्रभृतय-स्त्वाह्वाविष्किरा लघव शीतमधुराः कषाया दोषशमनाश्च । संग्राही दीपनश्चैव कषायमधुरो लघु । लावः कटुर्विपाकश्च सन्निपाते च पूजित । ईषद्गु-रूष्णमधुरो वृष्यो मेधाग्निवर्द्धनः । तित्तिरि सर्वदोषघ्नो ग्राही वर्णप्रसादन । हिक्काश्वासानिलहरो विशेषाद्गौ-रतित्तिरि । रक्तपित्तहर शीतो लघुश्चापि कपिञ्जल । कफोत्थेषु च रोगेषु मन्दवाते च शस्यते । वातपित्तहरा वृष्या मेधाग्निबलवर्द्धनाः । लघव क्रकरा हृद्यास्तथा चैवोपचक्रका । कषाय स्वादुलवणस्त्वच्यः केश्यो रुचिप्रद । मयूर स्वरमेधाग्निदृक्श्रोत्रेन्द्रियदार्ढ्यकृत् । स्निग्धोष्णोऽनिलहा वृष्यः स्वेदस्वरबलावह । वृंहण प्राकृटो वन्यस्तद्वद्ग्राम्यो गुरुस्तु स । वातरोगक्षयवमी-विषमज्वरनाशन । कपोतपारावतभृङ्गराजपरभृत-कोयष्टिककुलिङ्गगृहकुलिङ्गगोक्ष्वेडडिण्डिमाणवकशतप-त्रकमातृनिन्दकभेदाशिसुकसारिकावल्गुलीगिरिशालट्टा-लदूषकसुगृहाखञ्जरीटहारीतदात्यूहप्रभृतय प्रतु-दा । कषायमधुरा रूक्षा फलाहारा मरुत्करा । पित्तश्लेष्महरा शीता बद्धमूत्राल्पवर्चस । सर्वदोषक-रस्तेषां भेदाशी मलदूषक । कषायस्वादुलवणो गुरु काककपोतक । रक्तपित्तप्रशमनः कषायविशदोऽपि च । विपाके मधुरश्चापि गुरु पारावत स्मृत । कुलिङ्गो मधुर स्निग्ध कफशुक्रविवर्द्धनः । रक्तपित्तहरो वेश्म-कुलिङ्गस्त्वतिशुक्रलः । सिंहव्याघ्रवृकतरक्षुऋक्षद्वीपिमा-र्जारशृगालमृगेर्वारुकप्रभृतयो गुहाशया । मधुरा गुरव स्निग्धा बल्या मारुतनाशना । उष्णवीर्य्या हिता नित्य नेत्रगुह्यविकारिणाम् । काककङ्ककुररचाषभास-शशघात्युलूकचिल्लिश्येनगृध्रप्रभृतय प्रसहा । एते सिंहादिभिः सर्वे समाना वायसादयः । रसवीर्य्यविपा-

[illegible]

गिरस्त्याश्चौषध्रकौपत्री गुणोत्तरौ । क्लिन्नत्वात् स्वाइ-पाकत्वात् तयोर्मोपत्रा गुणोत्तरा । नादेया गुरवा मर्ष्ये यस्मात् पुच्छास्यचारिण । सरस्तडागजानान्तु विशेषेण शिरोलघु । अदूरगोचरा यस्मात्तस्मादुत्सोदपानजा । किञ्चिन्मुक्ता शिरोदेशमल्यर्थं गुरवस्तु ते । घ-वस्ताद्रसो ज्ञेया स्वल्पा सरसिजा स्मृता । उरोवि-चरणात्तेषां पूर्वमङ्गं लघु स्मृतम् । इत्यानूपो महाभि-सन्दिर्मांसवर्गो व्याख्यात । तत्र शुष्कपूतिव्याधितविष-सर्पहतादिग्धविद्धजीर्णकृशबालानामसात्म्यचारिणां मां-साम्यभक्ष्याणि यस्माद्विगतव्यापन्नापहृतपरिणतत्वात्सप्-र्णवीर्यस्याद्दोषकराणि भवन्ति । घरोचक प्रति-श्याय गुरु शुष्क प्रकीर्त्तितम् । विषव्याधिहतं मृत्यु, पाक छर्दिश्च कोपयेत् । कासश्वासकरं वृद्ध त्रिदोष व्याधिदूषितम् । क्लिन्नमुत्क्लेशजनन कृश वातप्रकोपणम् । अयोऽन्य पादपादेय मांसमिति । स्त्रियवस्यादिषु पुमांसो विहङ्गेषु महाशरीरेभ्यस्तशरीरा अल्पशरीरेषु महाश-रीरा प्रधानतमा एकजातीयानां महाशरीरा प्र-धानतमाः । स्थानादितत मांसस्य गुरुलाघवमुपदे स्थाम तद्यथा—रक्तादिषु धातुषु यथापूर्वतरो-त्तरेषु गुरुतरास्तथा सक्थिस्कन्धक्रोडशिरपादकर-कटीपृष्ठचर्मकालेयकयकृदन्त्राणि । शिरःस्कन्धं कटी-पृष्ठ सक्थिनी चात्मपक्षयो । गुरुपूर्वं विजानीयाद्धाम-बस्तु यथोत्तरम् । सर्वस्य प्राणिनो देहे मध्यो गुरुरुदा हृत । पूर्वभागो गुरु पुंसामधोभागस्तु योषिताम् । उरोग्रीवं विहङ्गानां विशेषेण गुरु स्मृतम् । पक्षोत्-क्षेपात्समो दिष्टो मध्यभागस्तु पक्षिणाम् । अतीव रूक्ष मांसन्तु विहङ्गानां फलाशिनाम् । बृंहण मांसमत्यर्थं खगानां पिशिताशिनाम् । मत्स्याशिनां पित्तकर वातघ्न धान्यचारिणाम् । जलजानूपजा ग्राम्याः क्रव्यादैकश-फास्तथा । प्रसहाविलवासाश्च ये च जाङ्गलसंज्ञिता । प्रतुदा विष्किराश्चैव लघवः स्युर्यथोत्तरम् । स्वल्पाभि-ष्यन्दिनश्चैव यथापूर्वमतोऽन्यथा । प्रमाणाधिकास्तु स्वजातौ चाल्पसारा गुरवश्च । सर्वप्राणिनां सर्वशरीरे-भ्योऽपि प्रधानतमा भवन्ति यकृद्देशवर्त्तिनस्तस्मादादीत प्रधानस्याभावे मध्यमवयस्कं सद्यस्कमक्लिष्टमुपादेय मांसमिति । भवति चात्र । यद् शरीरावयवा स्वभावो धातव क्रिया । लिङ्गं प्रमाण संस्कारो मात्रा चास्मिन् परीक्षिता" ।

क्रव्यघातन पु० क्रव्यस्य क्रव्याय घात्यतेऽसौ हन—स्वार्थे णिच्—कर्मणि ल्युट् चतुर्थ्यर्थे ष० त० । १कृष्णमाले मृगे च० । क्रव्यार्थं घातयन्ति घाति—ल्यु । मांसार्थघातके रुरुरूपे मृगभेदे "यत्र निपतित पुरुष क्रव्यादा नाम रुरवस्तं क्रव्येण घातयन्ति" भाग० ५।२६।१५ तस्य त-थात्वोक्तं "क्रव्येण निमित्तेन मांसार्थम्" श्रीधर

क्रव्यभुज् पु० क्रव्य भुङ्क्ते भुज—क्विप् । १क्रव्यादे राक्षसे २क्रव्यादे रुरुरूपे मृगभेदे च "ससैन्यश्च क्रव्यभुग्यमांस योऽहिंस सर्पिः समधु पुटाह्वय" सुश्रु० । ३मांसभो-क्तृमात्रे त्रि० ।

क्रव्याद् पु० क्रव्य मांसमत्ति अद—क्विप् । १राक्षसे २मांसा-शिनि त्रि० मेदि० "क्रव्याद्गणपरीवारश्चिताग्निरिव जङ्ग-मः । रघु "क्रव्याद इत्यादय "मल्लि०"क्रव्याद्भिश्च हतस्या-न्यै:" मनु "क्रव्याद्भि व्याघ्रादिभि" कुल्लू० "श्वगृध्र गोमायुखरैर्दष्टो ग्राम्यै क्रव्याद्भिरेव" मनु० च ३शवदा-हके अग्निभेदे "अपाग्ने अग्निमामाद जहि निष्क्रव्यादं सेधस्त्रय स आमाद् येनेदं मनुष्या पचन्त्यश्नन्ति अथ येन पुरुष दहन्ति स क्रव्याद् एतावेवतदुभावतोऽपहन्ति" शत० ब्रा० १।२।१।४। "हे अग्ने ! गार्हपत्य । आमा-दमग्निमपजहि परित्यज तथा क्रव्यादमग्निं नि सेध नि शेष दूरे गमय" वेददी० "योऽग्नि क्रव्यात् प्रविवेश यो गृहम्" ऋ० १०।१६।१० क्रव्यादयोनिप्राप्तिश्च गुरुत-ल्पगमनमहापातकाद्यशेषपवता मनूक्ता यथा "तृणगुल्म-लतानाञ्च क्रव्यादा दंष्ट्रिणां तथा । क्रूरकर्मकृताञ्चैव शतशो गुरुतल्पग "

क्रव्याद पु० क्रव्यमत्ति अद अण् उप० स० । १राक्षसे २मांस-भोजिमात्रे त्रि० स्त्रियां टाप् सि० कौ० । "क्रव्यादः शव-भक्षणे" विधानपा० ५०पृ० उक्ते ३वह्निभेदे ।

यक्ष्मेव क्रव्यादस्तु भा० आ०७अ० भृगुणा सर्वभक्षत्वे शापे अग्नये दत्ते तत्परिहाराय ब्रह्मणकृव्यादमाह्वानम् "कृत्य देवमुखो भूत्वा यज्ञभागाग्रभुक् तथा । हुतभुक् सर्व-लोकेषु सर्वं भक्षतमेष्यति" इत्युपक्रमे "लोकानामिह सर्वेषां त्व कर्त्ता चान्त एव च । त्व धारयसि लोकांस्त्रीन् क्रियाणाञ्च प्रवर्त्तकः । स तथा कुरु लोकेश ! नोच्छिद्येरन् यथा क्रिया । कस्मादेव विमूढस्त्वमीश्वरः सन् हुताशन ।। त्व पवित्र सदा लोके सर्वभूतगतिश्च ह । स त्व सर्वशरीरेषु, सर्वभक्षत्वमेष्यसि । अपाने, ह्यर्चिषो यास्ते सर्वं भोक्ष्यन्ति ता शिखिन ! । क्रव्यादा

[illegible]

[illegible] क्राथ पु॰ [illegible]

[illegible]

क्रान्त [illegible]

क्रान्तदर्शिन् [illegible]

क्रान्ति स्त्री॰ [illegible]

स्थित गोले निरक्षदेशादिति तात्पर्यार्थः । भचक्रम् ध्रुवताभिः प्रबद्धम् तच्च चलम् । एतेन चन्द्रादीनां निरासः । यदा निरक्षे गता क्रान्तिवृत्तया कक्षया च वेति चक्रत्रा गच्छन् भगणपरिपूर्तिभोगं करोति । उत्तरगच्छद्गोलेन निरत क्रान्तिवृत्त कल्पितमिति भावः । ननु चन्द्राद्याः क्रान्तिवृत्ते कुतो न गच्छन्तीत्यत आह" रङ्ग॰ "चन्द्राद्याश्च स्वकैः पातैरपमण्डलमाश्रितैः । ततोऽपसृता दृश्यन्ते विक्षेपान्ते ष्वपक्रमात्" सू॰ "चन्द्रादयोऽष्टव्यतिरिक्ता ग्रहाः स्वैः स्वकीयैः पातैः पातापरदैवतैरपमण्डलं क्रान्तिवृत्तमाश्रितैः स्वस्वगोलस्थानेऽधिष्ठितैस्तत् क्रान्तिवृत्तान्तर्गतस्वभोगस्थानादित्यर्थः । तत्कार्यात् विक्षेपान्तरेणापसृता दक्षिणत उत्तरतो वा कर्षिता भवन्ति । अत आकर्षणवशात् क्रान्तिवृत्तान्तर्गतस्वभोगस्थानादित्यर्थः । दक्षिणत उत्तरतो वा विक्षेपान्तेषु गणितागतविक्षेपकलापरमस्थानेषु भूस्थजनैर्दृश्यन्ते । तथा च क्रान्तिवृत्ते यथा त्रिगुणक्रमभेऽर्धस्थितं तथा क्रान्तिवृत्ते पातस्थाने तत्षड्भान्तरस्थाने च सम्पर्कपरमविक्षेपकलाभिस्त्रिभान्तरस्थानादूर्ध्वाधःक्रमेण दक्षिणोत्तरतो स्वल्पं च का विक्षेपवृत्तं चन्द्रादिग्रहानुरोधेन च स भिन्नं कल्पितं तत्र गच्छन्तीति भावः" रङ्ग॰

क्रान्तिस्पष्टताप्रकारश्च सू॰ सि॰ रङ्गनाथाभ्यां दर्शितो यथा "अथ दिनरात्रिमानसाधनार्थं चरानयनं विवक्षु प्रथममुपयुक्तां स्पष्टक्रान्तिमाह" रङ्ग॰ "विक्षेपापक्रमैकत्वे क्रान्तिर्विक्षेपसंयुता । दिग्भेदे वियुता स्पष्टा भास्करस्य यथा गता" सू॰ सि॰

"अथ ग्रहस्य स्पष्टक्रान्तिरभीष्टा तत्र ग्रहस्यायनांशसंस्कृतस्य भुजज्यातः परमापक्रमज्येत्यादिना क्रान्तिरयनांशसंस्कृतग्रहगोलदिक्का ज्ञेया । तस्य विक्षेपोऽपि पूर्वोक्तप्रकारेण पातभगोलदिक्को ज्ञेय । गोलस्तु मेषादिषट्कमुत्तरस्तुलादिषट्कं दक्षिण । अथ ग्रहक्रान्त्योरेकदिक्त्वेन क्रान्तिः कदाचित् क्रमात्स्वविक्षेपेण युता तयोर्दिगन्यत्वे क्रान्तिर्विक्षेपेण वियुताऽन्तरिता शेषदिक्का स्पष्टा क्रान्ति स्यात् । ननु सूर्यस्य विक्षेपाभावात् कथं स्पष्टा क्रान्तिर्ज्ञेयत आह भास्करस्येति । सूर्यस्य यथागता पूर्वागता क्रान्तिरेव स्पष्टा क्रान्तिः । अत्रोपपत्तिः । विषुवद्वृत्तात् ग्रहबिम्बकेन्द्रपर्यन्तं याम्योत्तरं चान्तरं स्पष्टक्रान्तिरिति तयोरेकदिक्त्वे तद्योगतस्तदन्तर, भिन्नदिक्त्वे तदन्तरमित्युपपन्नमिति । अत ग्रहस्य क्रान्तिसंस्कारयोग्यत्वप्रतिपादिका क्रिया लोकभ्रमभयाय स्वल्पान्तरत्वाल्लोकैर्विदिता भगवता त्यक्ता । अन्यथा ग्रहस्य ध्रुवाभिमुखत्वे भगवदुक्तमायनदृक्कर्म कथमव्याहत इत्यादिहृदयम्" रङ्गनाथ ।

एवं स्पष्टक्रान्तिवशेन दिनरात्रिभेदः सू॰ सि॰ रङ्गनाथाभ्याम् "हानिवृद्धी सदा वाम याम्योत्तरविभागयोः" इति दिनरात्र्योर्भिन्नत्वे याम्योत्तरविभागयोर्भवत इत्युपक्रम्य विशदीकृत्य दर्शितो यथा

"मेषादौ तु सदा वृद्धिरुदगुत्तरतोऽधिका । देवांशे च क्षपाहानिर्विपरीतं तथाऽऽसुरे । तुलादौ द्युनिशोर्वाम क्षयवृद्धी तयोरुभे । देशक्रान्तिवशान्नित्यं तद्विज्ञानं पुरोदितम्" सू॰ "मेषादौ षड्भे उदग्गोले सूर्ये सति उत्तरतो यथोत्तरं यदा याम्युत्तरगोले देवांशे जम्बूद्वीपेऽधिका यथोत्तरमधिका वृद्धिर्निरक्षदेशीयदिने । तत्काराद्यथोत्तरं सूर्यस्योत्तरगमने यथोत्तरं दिने वृद्धिः परमोत्तरगमनात् परावर्तते । यथोत्तरं न्यूना वृद्धिरित्यर्थः । क्षपाहानी रात्रेरपचयः । च समुच्चये । आसुरे याम्यादिदक्षिणभागे तथा दिनरात्र्योः क्षयवृद्धी विपरीतं ज्ञेयम् । दिने हानी रात्रौ वृद्धिरित्यर्थः । तुलादौ षड्भे दक्षिणगोले सूर्ये सति तयोर्जम्बूद्वीपवडवादिदक्षिणभागयोर्दिनरात्र्योरुभे द्वे क्षयवृद्धी उभयोरपचयौ वाम व्यस्तम् । अयमर्थः जम्बूद्वीपे दिनरात्र्योरुत्तरगोलस्थवद्विपर्ययक्रमेण क्षयवृद्धी ज्ञः । वडवादि दक्षिणभागे दिनरात्र्योर्वृद्धिक्षयौ ज्ञः इति । ननु क्षयवृद्ध्योः कियत्प्रमाणमित्यत आह पूर्वोक्त चारत्रयति देशक्रान्तिवशादिति । तद्विज्ञानं तयोः क्षयवृद्ध्योर्ज्ञानं पुरस्तात् नित्य प्रत्यक्ष देशक्रान्तिवशात् । देशपलभा क्रान्तिरेतदुभयानुरोधात् पुरा पूर्वं स्पष्टाधिकारे "क्रान्तिज्या विषुवत्कर्णो क्षितिज्या द्वादशोद्धृता । त्रिज्यागुणाहोरात्रार्धकर्णाप्ता चरजासवः" । तत्कार्मुकमित्यनेन दिनरात्र्योरर्धं उक्तम् तद्द्विगुणं दिनरात्र्योरित्यर्थसिद्धम् । अत्रोपपत्तिः । निरक्षदेशे ध्रुवद्वयलग्नक्षितिजवृत्त तत्र उत्तरभागे स्वस्थानक्षितिजं स्वभूगोलमध्यस्थमुत्तरध्रुवादधो दक्षिणध्रुवादूर्ध्वमित्यत उत्तरगोले निरक्षक्षितिजादधो दक्षिणगोल ऊर्ध्वमिति पञ्चदशघटिका निरक्षदेशदिनार्धं क्षितिजान्तरासुयुक्तम् चरेण गोलक्रमेण युतहीनं दिनार्धं रात्र्यर्धं च विपरीतम् । एवं दक्षिणभागेऽभीष्टदेशे क्षितिजमुत्तरमुन्नतं दक्षिण-

[illegible]

किञ्च कर्किमियुनौ घटोदितौ" इति भास्कराचार्योक्त सद्वचते" रङ्गनाथ ।

क्रान्तिचित्र न० क्रान्तिज्ञानार्थं चित्रम् । सि० शि० उक्ते अयमण्डलाकारे पदार्थे यथा

"क्षेत्राणि यस्य ऽयमसमयानि संक्षेपतोऽयमभाणि चात्र । भुजोऽयमः कोटिगुणो द्युजीवा कर्णस्त्रिभज्या त्रिभुजे ऽयमोत्थे । मेषादिजीवा गुणितोऽयमूर्ते तद्भमिजे क्रान्तिगुणा भजा स्यु । तत्कोटय स्वद्युमिणाग्रवृत्ते व्यासार्द्धवृत्ते परिणा भवानाम् । चापेषु तास्नामवगम्यता ये तेऽवो विशुद्धा द्युज्या भिरर्चे" सि०शि०

क्रान्तिज्या स्त्री क्रान्तिवृत्तोदस्ये सि० शि० उक्ते अस-धेत्रासवयभेदे । यथानोलगन्दे ४२पृ० अयनांशादि उक्तानि । तन्मानानयनम् ।

"युक्तायनांशादपम प्रसाध्य क्रान्तौ च खेटात् स्वम् भुक्तभोगत्री । जिनांशमौर्व्या १३९७ गुणितार्कदोर्ज्या त्रिज्यो ३४३८ हृता क्रान्तिगुणोऽस्य वर्गम् । त्रिज्या कृतेः ११८१९८४४ शोध्यपदं द्युजीवा क्रान्तिर्भवेत् क्रान्तिगुणस्य चापम् । अयमप्रभामगुणितापमज्या तद्भाद गाझी भवति क्षितिज्या सि० शि० ।

"अथ खेटादिचयनपमम् । यथात् खेटाक्रान्ताद्यऽपम साध्यमानात् सायनांशादेव । तथा यस्मादुदयमस्थ्नितौ भुक्तभोगत्रकालौ साध्यौ तस्मादपि सायनांशादेव । सायनार्कस्य दोर्ज्या जिनभागज्यया गुणिता त्रिज्यया भक्ता क्रान्तिज्या स्यादित्यादि स्पष्टार्थम् ।

अत्रोपपत्ति । विपुवत्क्रान्तिवृत्तयोर्योस्योरन्तरमन्तर क्रान्ति । तयो सपाते क्रान्त्यभाव । ततस्त्रिभेऽन्तरे परमा जिन २४तुल्यभागा । अतस्तत्पातादारभ्य क्रान्ति सा-ध्या । उदयाद्य तत एव । स तु सपातो मेषादे भागम-मांशतुल्येऽन्तरे । अत सायनांशात् खेटात् क्रान्तिर्भुक्त-भोग्यकालौ चेयुक्तम् । यदि त्रिज्यातुल्यया भुजज्यया जिनांशज्यातुल्या क्रान्तिज्या लभ्यते तदेष्टज्यया-किमिति । फल क्रान्तिज्या विषुवद्वृत्तात् तिर्यग्रूपा भवति । क्रान्तिज्या भुजस्त्रिज्या कर्णस्तद्वर्गान्तरपदम-होरात्रवृत्तव्यासार्धम् । सैव द्युज्या" प्रमि० ।

देशभेदे कालभेदेन रवे क्रान्तिज्याज्ञानार्थं प्रश्नपूर्वक सि० शि० निर्णीत यथा

"मार्तण्ड समण्डल किल यदा दृष्ट प्रविष्ट सखे । काले पञ्चघटीमिते दिनगते यद्वा भवेत् तावति । केनाप्यु-

उज्जयिनीगतेन तरणे क्रान्ति तदा वेत्सि चेत्तन्त्रे त्वा निगिन मगणगणकोन्नतेभवन्माद्गमम्" ।

"हे गणक ! केनचित् किलोज्जयिनीगतेन यदा दिनगते पञ्चघटीमिते काले मार्तण्ड समण्डल प्रविष्टो दृष्टस्तदा कियती क्रान्तिज्या इत्येष प्रश्न । अथवान्य तावति पञ्चघटीमिते नत वा काले समण्डल प्रविष्टो दृष्ट-स्तदा च या क्रान्तिज्या ता त्व वेत्सि तदा गणकगण कोन्नतेभकुम्भाद्गम मिगाणोद्गत त्वामह मन्ये" प्रमि०

"या स्याद्युवेद्रुत्तकालजीवाभीष्टा द्युति सा प्रथम प्रकल्प्या । अक्षाग्रवासावतदृताक्षकर्णकयोर्हता स्यादपमज्यकाऽऽया । पलादिकैर्दृष्टि प्रसाध्या द्युसङ्गया क्रान्तिगुणोऽयकश्च । तदाद्यकृत्या विहृत स्फुट स्यात् प्रकल्पस्तौ समसण्डलस्थे" सि०शि० ।

"रवे समण्डलप्रवेशे य उन्नतकाल उद्दिष्टकाल जीवा ग्रा तावत प्रथममिष्टद्युति कल्प्या । ततो द्वादशगुणया-क्षया गुणया पलकर्णवर्गेण भाज्या । सा किल स्थूला क्रान्तिज्या भवति । तया क्रान्तिज्यया द्युज्यां कु-त्वा चरज्या चर च कृत्वा "अथोन्नताद्गमयुताक्षरेण" इत्या-दिनेष्टद्युति साध्या । तया पूर्वमागता क्रान्तिज्या गुणया । आद्यद्युत्या फलितया भाज्या । फल स्फुटासन्ना क्रा-न्तिज्या भवति । अत्रोपपत्ति । उन्नतकालजीवाद्युत्या प्रथम तद्युति कल्पिता । तथा अनुपातेन यद्युज्या । यदि पलकर्णेन द्वादशकोटिस्तदा तद्युतिकर्णेन किमिति । अत्र तद्युतेर्द्वादशगुण पलकर्णो हर । फल समसण्डलश-ङ्कु । पुनरन्योऽनुपात । यदि पलकर्णे भुजो लभ्यते तदा समसण्डलशङ्कुतुल्येन कर्णेन क्रान्तिज्या स्थूला । अस्या क्रा "अथोन्नताद्गमयुताक्षरेण इत्यादि तां तद्युति प्रकल्प्य पुन क्रा व्यासदविशेष । तत्वासन्न कार कृत । यदि कल्पि तद्येदानीमागतया कि आदिद्युपपन्नम् ।

"तदा नतज तिघ्नम् । तेन सङ्कुपलभ्य निलत्रक शाद्य

[illegible]

[illegible] कारकता [illegible] मात्र [illegible] मार्गेण [illegible] | "[illegible]" "[illegible] क्रिया [illegible]" इति [illegible] | [illegible] | [illegible] "[illegible]" इति [illegible] | [illegible] | [illegible] | [illegible] इति [illegible] | [illegible] "[illegible]" [illegible] | [illegible] इति [illegible] | किन्तु [illegible] "क्रिया न [illegible]" [illegible] तन्मात्रम् | [illegible] क्रियार्थे यथा "[illegible]" [illegible] | "[illegible] क्रियागुणैः" माघ | प्रयोगे "[illegible] यथा [illegible] प्रतिपन्नक्रिया [illegible]" भट्टि० [illegible] (अनुष्ठाने) "[illegible] क्रिया केवलमुत्तरम्" भार० | "[illegible] क्रिया" रघु | "[illegible] क्रियाणां [illegible]" "[illegible] क्रियार्थेन समाम्नाय" कु० र० | शिक्षायाम् "क्रिया हि [illegible]" रघु "चिकित्सायां "क्रिया (माया) [illegible]" रघु० | कर्मणि (यत्ने) "[illegible]" [illegible] | [illegible] क्रियाभिमानं [illegible] यथा" माघ० | "यदा [illegible] क्रिया [illegible]" भा०भा० | "क्रियैव काम [illegible] इति मत [illegible] नाधिकरणता" ति० त० रघु० | [illegible] क्रियाप्रयोगेष्वपि [illegible] क्रियायत्नातिसिद्धि | "क्रियां [illegible] यो [illegible]

[illegible] | [illegible] "[illegible] क्रिया [illegible]" [illegible] क्रियां [illegible] क्रियाम् | [illegible] "क्रिया-[illegible]" [illegible] | [illegible] | "[illegible]" इति च [illegible] | "क्रियाभिसिद्धये [illegible]" [illegible] | [illegible] "[illegible]" [illegible] | क्रिया-[illegible] | [illegible] क्रियाविशेषणम् [illegible] | क्रियाविशेषम् [illegible] यथा

"[illegible] कारकं [illegible]" | [illegible] | [illegible] क्रिया-[illegible] | [illegible] क्रियाणाम् उदा० क्रिया-[illegible] | [illegible] "[illegible] क्रिया कार्या [illegible]" म० त० मरीचि | "[illegible] क्रिया कार्या [illegible]" शु० त० मरीचि | "[illegible] क्रिया [illegible] जायते" तत्रैव [illegible] | "[illegible]" ति० त० [illegible]

क्रियाधान्य पु० क्रियायाः [illegible] कल्पोविधि | [illegible] उत्तरतन्त्रे [illegible] क्रियाभेदे | "अथातः क्रियाफलं व्याख्याम" इत्युपक्रमात् तन्त्रोक्ते [illegible]

क्रियाकार पु० क्रियां [illegible] करोति [illegible] उप० स० | [illegible] ति० | [illegible] कार्यकारकमात्रे त्रि० स्त्रियां टाप् [illegible] ङीष् इति भेदः |

क्रियाद्वेषिन् त्रि० क्रियां [illegible] साक्षिलेख्या-दिकं द्वेष्टि द्विष-णिनि [illegible] विवादे [illegible] "अन्यवादी क्रियाद्वेषी [illegible]

निरवात। यादृशमकामी च जीवः बहुविधा स्फुरन्” क्रियाः भावाः सहकत यथा केषां च व्यक्तिषयक क्रिया चेषा कर्मविधि। तां क्रियां दैवि योगोऽपत् क्रियाद्वेषी च कथते नीरधि भावा।

क्रियापाद पु० क्रिया क्रियमाणान्न पादस्य। चतुष्पादत्वात् वारे वास्त्राधकारणस्य यतोऽत्र भार्ते। पूर्वं तत्र यथा वार्तिकशौचोपकार सूत्र। इति व्याकरणव्याख्या समीपो अनिर्णयक स्व। तत्र व्याकरणव्याख्या नहिमर्षादि योगविघोऽयं निर्णीत यथा

अत क्रियावादः। तत्र मनुष्योऽनित्यानापत्तिर्न प्रथमं निरूपते। नियतयोगिना तत्र व्याकरणव्याख्यानम् च ननु च क्रियावाभोदयोऽविनाम् यत्वात्। अत तु व्याकरणव्याख्याम च बीजावत् क्रियावाचकायत्वात् यतनेन। प्रत्ययविधान यावोदयोर्विधानविधाने विभक्तिर्यो क्रियोपात्तकार्यः तत्र आत्मा या क्रियामाह क्रिया कालीचारो नामयोगिनश्च इत्यादि सम्बन्धनिमित्त क्रियामते तत्र तत्र विधायक वा वाचकं उच्यते। तत्र च इत्यन्वयि”इति तु विभक्ति वारके तैव बन्धोर्निमाणता। कर्मविभक्तेः तत्र द्वैत- भोगत्व नास्ति। वाच्ये कर्मविशेष वै विभक्ति कर्त्ता प्रतिपादित्व तैयादृश क्रियाविशेषार्थ च क्रिया क्रियार्थे एकत्वे तत्र क्रियोपपाद अचित इति निर्णीतं क्रियाकी व्याकरणेऽपि क्रियाया विधायक्यमिति चानत्। तत्र तु वाद्विशेषविकल्पे भवत्त्व कर्मद्वयात् व्याकरणेन धात्वर्थविधान तत्र। धात्वर्थयोरपि क्रियेति वोधिते कर्त्रा यथि निर्दीव कथते। कर्तृप्रकार्यविशेषेपि कारकविभक्ते। क्रियाकर्त्ता क्रियोपपाद। तत्र सत्यपि मुक्ता पूर्णेषर कर्मोऽर्थिङ्का कृत्य कारणा। क्रियाद्येतु प्रतिपादते बोधित विविषाविविध। क्रियायति वाचते वाचकत्व वेद क्रियाया विशेष। पूर्णेन पूर्वसङ्केतरूपेण। वर्णवाच्यत्व। निर्दिष्टा नु च्यत्व नहि। यदि तु वाते सत्व क्रिया विचारविषय विकारविषयेऽपि वाचा “याज्ञवल्क्यादयोऽपि तु सम्यो निर्दिष्टेषु क्रि- यात्। क्रियोऽपि पूर्ववाही तु कर्मिणी च वा जयेत्। वाङ्मात्रात्काठापलो वाङ्मात्रे वाचो च वाचिति इति वाचक अयस्य वाच्यवाचकवाचक्ये वाचक तु प्रतिपादन सम्बन्धे वि सर्वेव वाक्यमालिनीकारक-

व्याकरणविद एव प्रसिद्धिम क्रियायोऽस्य स्वरूपमान्यमो- चित ॥ कर्मविभक्तिविशेषणयुक्तस्यैव कर्मत्वमतिवीति तैरेव निर्णयात्। क्रियोऽपि तु नास्ति क्रियायोग यदि प्रतिपादितैर्व्यं क्रियाभाव एव सम्बन्धविभागोऽर्थि- तविभागव्यापारोऽभावः विभागोऽपि भवितव्यता वाच- कयोरभिमत वाच्यत्वेऽविभागार्थेन एव क्रिया। कर्मविभक्तौ तु वैयाकरणि वाक्यसमौकि क्रियत्व इ क्रिया वाचीमर्थः। इत्युक्तिः “प्रतिपादकयोरक्ते सकर्मी कारकमत। सावर्ण्ये सावयवं कारकं च भायेत्” इत्यभिधानविधाकरणम्। एतद् प्रतिक्र- क्रियोपसर्गविषयम्। साधुत्व माहात्म्य तस्मै चेति शब्दज्ञानवतीम अत्र स्वभावः। तत्र “कारके वक्तव्ये विभक्ति तत्र भेदात्। वाक्योक्ता विशेषेण कारके वाक्यदृशेन्”। इति सम्बन्धि प्रयोजनार्थेति हेतु वाची। वैयाकरणितु व्याकरणोद्देशेन्यार्थेन शाब्दिको वैयाकरणेन क्रमेण प्रमाणं। व्याकरणेन प्रयुक्तं वाचिकीति वैयाकरणेन। वैयाकरणिना तु “कारकं वा प्रयोजितिर्ति” वाचिता स्वरूपार्थः स्वरूपवाचक- वाचकोऽपि वाचकार्थत्वेन वाचिकीविषयकत्वात् इत्युपपादनम्। कारकं वा प्रयोजितिर्ति वाचोत्तम- वेदार्थं तत्र प्रश्न।। अत क्रियास्वरूपसम्बन्धो अतः कृतकारिता। यथा कविना कृत्यादिकथा प्रति- निवृत्ते कर्तरीत्येव प्रतिपादिना वाचो नराणां कर्ता एवं भवत। तथाविधस्य कथयति क्रियावद्। तथाप्रसिद्ध- व्याकरणकारक वाचकानां तत्पूर्वे प्रतिपाद्यमानादिति। तत्- व्यापारत्व प्रतिपादयमानविषयत्वं व्यावर्तयेत्। कारको- पकारक एव क्रियोऽनेकम्। एवकैवात्र स्वभावाव्याकरणे- विना निर्दिष्टोऽपि इत्यादि वाङ्मयवाचकस्वरूपमपि वाचकार्थम्। वाक्यवेदान्त प्रतिपादिवाक्यस्वभावनाव च कर्मोपरि अस्वभावितप्रकार अस्वव्यापारप्रकारं पुनरुक्तम्। कथनान्तरार्थं क्रियोपपत्तिवेदं सत- वाचकत्वेनापि क्रियात्वर्थनियमात्। तत्र क्रियाविस- र्जनार्थे “इति वचनात्”कारके प्रतिपादितमिति वचनात्तत्र अस्य वाचकत्वेन योजनाय इति वाचि वदति तदपि क्रियाविवेचनेः पूर्वविद्यासिद्धकं वेदविद्यामात्रम् “कारके प्रतिपादितेति” वचनात् प्रतिपादित एव क्रिया यथाश्रुति पूर्वपदवाचकवाचकस्वरूपतिरेव व्याख्यानकत्वेन च तथापि क्रिया कर्तोऽपि निर्ण-

